ब्रह्माधिपतिः ब्रह्मणो वेदस्याधिपतित्वेनोपासकः । तथा ब्रह्मणो हिरण्यगर्भस्याधिपतिः तादृशो यो ब्रह्मा प्रसिद्धः परमात्मा सोऽयं ममानुग्रहाय शिवः शान्तोऽस्तु सदाशिवः स एव सदाशिवः सत्यज्ञानानन्दस्वरूपब्रह्मैव ओं अहं प्रपद्यामीति ॥

## No. 14104. वेदान्तविषयः. VEDĀNTAVIṢAYAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 78b of the MS. described under No. 139, wherein this has been omitted to be included in the list of other works therein given.

Similar to the work described under No. 4743 ante.

**Beginning :**

इदं विश्वं विशिष्टज्ञानवत्पूर्वकं चित्रकार्यत्वात्, चित्रादिवत् विमतः शिवः वृत्त्यादिभ्यो भिद्यते वृत्त्यादिसाक्षित्वात् यद्वृत्त्यादिभ्यो न भिद्यते तद्वृत्त्यादिसाक्षी न भवति यथा वृत्त्यादिः, विमतः शिवः सत्यो भवितुमर्हति मिथ्याधिष्ठानत्वात् असत्यरजताधिष्ठानशुक्तिवत्, विमतश्चिद्रूपः जडमात्रावभासकत्वात् यच्चिद्रूपं न भवति यथा घटादिः, विमतः परमानन्दरूपः परमप्रेमास्पदत्वात् त(य)-द्वृत्त्यादि साक्षात्परमानन्दरूपं न भवति तत् पर(मप्रे)मास्पदमपि न भवति यथा घटादिः ।

**End :**

अनुभूतेरभावेऽपि ब्रह्मास्मीत्येव चिन्त्यताम् ।
अप्यसत्प्राप्यते ध्यानं (नात्) नित्याप्तं ब्रह्म किंपुनः ॥
देहाभिमानं विध्वस्य ध्यानादात्मानमव्ययम् ।
पश्यन्मर्त्योऽमृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ॥

---

## No. 14105. हनुमद्यन्त्रोद्धारणम्. HANUMADYANTRODDHĀRAṆAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 87b of the MS. described under No. 139 and not on fol. 87a as stated therein.

Complete.

Similar to the work described under No. 8157 ante.

**Beginning :**

आदौ चन्द्रं समालिख्य त्रिकोणं वर्तुलं तथा ।
बहिरष्टदलं पद्मं षोडशारं ततो बहिः ॥

तद्बहिर्वृत्तमालिख्य द्वात्रिंशद्दलमेव हि ।
चतुष्षष्टिदलोपेतं शोभनं वृत्तमुज्ज्वलम् ॥
तद्बाह्ये भूपुरद्वन्द्वं वज्रकोणसमन्वितम् ।
मायाबीजं लिखेद्बीजान् त्रिकोणेषु तथा ।लिखेत् ॥

**End :**

वेदादिः प्रथमो ज्ञेयो रामदूताय उद्धरेत् ॥
स्वाहान्तमेवं वश्यार्थमष्टोत्तरमुदीरितम् ।
पूजां वै वैष्णवे पीठे शैवे वा विदधीत वै ॥
एतद्यन्त्रं समालिख्य गुलिकीकृत्य धारयेत् ।
सर्वशत्रुक्षयकरं सदा विजयवर्धनम् ॥
रौद्राभिचारकोद्दण्डं परमन्त्रेषु भीषणम् ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥

---

No. **14106**. लिङ्गतर्पणम्.
LIṄGATARPAṆAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 217.

Incomplete.

On the propitiation of the Jaṅgama and Sthāvara Liṅgas of the Vīra-Śaivas by the repetition of certain Mantras.

**Beginning :**

यद्गुरुसमर्पितं लिङ्गं तद्गुरुं भोक्तनाशुचि (?) ।
रूपान्तरु(प)भुक्तं च भुक्तं च तदनर्पितम् ॥
लिङ्गजङ्गमपादाब्जसम्भूताय शिवार्पणे ।
परमानन्दरूपाय पादतीर्थाय नमो नमः ॥

**End :**

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेद्वै विरूपाक्षं सबाह्याभ्यन्तरश्शुचिः ॥

तर्पणमन्त्रः—

आत्मात्मानमिष्टलिङ्गं तर्पयामि । अन्तरात्मात्मानं प्राणलिङ्गं तर्पयामि । परमात्मात्मानं चाक(ण)लिङ्गं तर्पयामि ॥

## No. 14107. रुद्रमङ्गलाशंसनम्, आन्ध्रभाषासहितम्.
## RUDRAMAṄGALĀŚAṀSANAM WITH TELUGU MEANING.

Pages, 3. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 217.

Complete.

Similar to the work described under No. 11202 of the D.C.S. MSS., Vol. XIX. This work is in prose and contains benedictions addressed to God Śiva.

**Beginning**:

श्रीवह(महा)देवाय शैव(।)रामाम(र)द्रुमाय सोमशे(ख)राय दिव्यसुन्दराय भीमभुजबलाय दैत्यभि(दु)राय तुहिनशैलजामनोनलिनदिनेशाय मङ्गलं मङ्गलम् ।

**End**:

चिन्तितार्थदायिने भसितविलेपनाङ्गाय शान्ताय श्रीगिरीशाय मङ्गलं मङ्गलं मङ्गलं मङ्गलं जयमङ्गलाय भवते । अङ्गजारिभुजङ्गभूषण लिङ्गतुरङ्ग जय जय

* * * *

[illegible]

[illegible]

## No. 14108. गायत्रीमन्त्रजपक्रमः.
## GĀYATRĪMANTRAJAPAKRAMAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 19*b* and not on 20*a* of the MS. described under No. 217.

Complete.

Similar to the work described under No. 6204 of the D.C.S. MSS., Vol. XII.

**Beginning**:

प्रातस्सन्ध्यां गायत्रीं कुमारीं रक्तवर्णां रक्ताम्बरधरां हंसवाहनां ब्रह्मदैवत्यामक्षसूत्रकमण्डलुधारिणीमृग्वेदसहितामादित्यपथगामिनीमोङ्काराशिखामावाहनीयामावाहयेत् ।

मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्र्य(स्त्री)क्षणै-
र्युक्तामिन्दुनिबद्धरत्नमकुटीं तत्त्वार्थवर्णात्मिकाम् ।
गायत्रीं वरदाभयाङ्कुशकशां शुभ्रं कपालं गदां
शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥
सुरभिज्ञानचक्रं च मत्स्यः कूर्मोऽथ पङ्कजम् ।
लिङ्गनिर्याणमुद्राश्च दर्शयेज्जपपूर्तये ॥

**End:**

सन्ध्या सात्र सरस्वती भगवती पीताम्बराडम्बरा
सन्ध्या सामवपुर्लतापरिणमद्गात्राचिता वैष्णवी ।
तार्क्ष्यस्था मणिनूपुराङ्गदमणिग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रसगदा भूतिश्रियै चास्तु नः ॥

ऐं ब्रह्मणे सूर्याय प्रातस्सन्ध्यायै नमः, ह्रीं सूर्याय रुद्राय माध्याह्नि
कसन्ध्यायै नमः, सौः विष्णवे सूर्याय सायंसन्ध्यायै नमः ॥

---

## No. 14109. हेरम्बोपनिषद्.
## HERAMBOPANIṢAD.

Pages, 3. Lines, 5 on a page.

Begins on fol. 44a of the MS. described under No. 217.

Complete.

Similar to the work described under No. 422 of the D.C.S. MSS., Vol. I, Part 3.

**Beginning:**

हेरम्बाय नमः । ओं भद्रं कर्णेभिः—ओं शान्तिश्शान्तिश्शान्तिः ।
अथातो हेरम्बोपनिषदं व्याख्यास्यामो गौरी सा सर्वमङ्गला सर्वज्ञं परमेश्वरं
प्रतिसमेत्योवाच—

अधीहि भगवन्नात्मविद्यां प्रशस्तां यया जन्तुर्मुच्यते सर्वदुःखैः ।
यया विद्यादात्ममोहादिमुक्तः प्राप्नोति लोकं परमं च शुभ्रम् ॥
तां वै सहोवाच महानुकम्पस्स सिन्धुर्बन्धुर्भुवनस्य गोप्ता ।
श्रद्धस्वैतद्गौरि सर्वात्मना त्वं हेरम्बतत्त्वे प(र)मात्मसारे ॥

**End:**

य इमां हेरम्बोपनिषदमधीते स सर्वान् कामान् लभते । स सर्वपापैः

प्रमुक्तो भवति । स सर्वैर्देवैर्ज्ञातो(भवति) । स सर्वैर्देवैः पूजितो भवति । स सर्वविद्पारायणपुण्यं लभते । गणेशसायुज्यमवाप्नोति य एवं वेदेत्युपनिषत् ॥

**Colophon:**

हेरम्बोपनिषत्समाप्ता ॥

---

No. **14110.** प्रतिष्ठाकारिका.

PRATISṬHAKĀRIKĀ.

Pages, 23. Lines, 5 on a page.

Begins on fol. 60*b* of the MS. described under No. 217.

Incomplete.

Similar to the work described under No. 5526 of the D.C.S. MSS., Vol. XI.

**Beginning:**

चण्डरुद्राय गोस्थाने वाप्यां कुम्भोदराय च ।
कूपे तु शङ्कु(ङ्कु)कर्णाय गङ्गायै च नदीतटे ॥
क्षेत्रपालाय वै क्षेत्रे सरस्वत्यै सभास्थले ।
दुर्गां ज्येष्ठा बलिं चैव भीमरुद्राय गोपुरे ॥

* * * *

अदीक्षितश्चतुर्वेदी प्रविशेद्गर्भगेहकम् ।
प्रमादाद्गर्भगेहं च प्रतिष्ठां पुनराचरेत् ॥
आ[रु](र्षि)कं दैविकं प्रोक्तं स्वायम्भुवमितिस्त्रयः (त्रिधा) ।
मोहाद्यन्त्रादिकं कृत्वा कर्तारिष्टं तथा नृणाम् ॥

**End:**

पीठे करे लिङ्गमुपस्थितं च उदङ्मुखं गोमुखमुत्तमं शिवे ।
तस्मात्रिकालेष्वखिलोपचारैरघोरवक्त्रे च बुधस्समर्चयेत् ॥
गन्धं वामुखं चैव पुष्पमीशानवक्त्रके ।
धूपं सद्येन वक्त्रं स्याद्दीपं चाघोरमेव च ॥
तत्पुरुषं तु निवेद्यं स्यात्पञ्चवक्त्रेषु बुद्धिमान् ।

---

No. **14111.** लिङ्गन्यासः.

LIṄGANYĀSAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 60*a* of the MS. described under No. 217.

Incomplete.

On the ceremonial touching of certain parts of the body at the time of the worship of the Liṅga image of God Śiva accompanied by the repetition of the Pañcākṣaramantra, i.e., the five-syllabled prayer formula relating to God Śiva.

**Beginning:**

महोग्राय ओं नं फट् इति पादौ न्यसेत् । महाभीमाय ओं मं फट् इति जङ्घे न्यसेत् । महाशर्वाय ओं शिं फट् इति कटिदेशे न्यसेत् । महापिनाकिने ओं वां फट् इति नाभौ न्यसेत् । महाकपर्दिने ओं यं फट् इति हृदयदेशे न्यसेत् । महावीराय हुं फट् इति गले न्यसेत् । महालिङ्गाय वषट् ओं फट् इति मुखे न्यसेत् ।

**End:**

परमात्मलिङ्गाय स्वाहेति षष्ठी सर्वाङ्गुलैः परमात्मलिङ्गश्रो(श्रो)त्राहुतमिति प्राणाहुतीर्जुहुयात् । गायत्र्या चान्ने प्रोक्ष्य तदन्नं बादरिकप्रमाणं पूर्वदक्षिणपश्चिमोत्तराणि तन्मध्ये च पञ्च मन्त्रानुक्त्वा जुहुयादिति तुर्यप्रकरणेन शैवानां विधिरिति य एवं वेद ॥

महोग्राय गुरुसन्निधौ द्वादशाब्दं

* * * *

ब्रह्मविद्यायां महाशैवविधिं व्याख्यास्यामः । ओं शान्तिश्शान्तिः । शं न ईशानाःसुमित्रा नः ॥

---

## No. 14112. ब्रह्मयज्ञप्रयोगः.

## BRAHMAYAJÑAPRAYOGAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 82a of the MS. described under No. 217.

Complete.

Slightly different from the work described under No. 3746 ante.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ श्रीपरमेश्वरमुद्दिश्य श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञेन यक्ष्ये । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । हस्ताववनिज्य त्रिराचामेत् । द्विः परिमृज्य सकृदुपस्पृश्य पत्सव्यं पाणिं पादौ प्रोक्ष्य[ति] शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य ।

**End:**

वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । अनेन ब्रह्मयज्ञेन भगवान् सर्वात्मकः ॥

## No. 14113. भस्मजाबालोपनिषत्.
## BHASMAJĀBĀLŌPANIṢAD.

Pages, 2. Lines, 12 on a page.

Begins on fol. 9*a* of the MS. described under No. 203.

Complete.

Same work as that described under No. 669 ante, but with some difference in the beginning.

**Beginning:**

अथ ज(न)को ह वैदेहो याज्ञवल्क्यमुपसमेत्योवाच भगवन् त्रिपुण्ड्र-विधिमनुब्रूहि इति । स होवाच याज्ञवल्क्यः प्रमाणमस्य त्रिधा ललाटादाच-क्षुषः [आ]भ्रुवोर्मध्यं तथा । अथ जनको ह वैदेहस्स होवाच भगवन् यद्द्रव्यं तदाग्नेयमाग्नेयं भस्म सद्यादिपञ्चब्रह्ममन्त्रैः परिगृह्याग्निरिति भस्मेत्य-भिमन्त्र्य मा नस्तोक इति शिरोललाटवक्षस्स्कन्धेषु धारयित्वा ।

---

## No. 14114. भूतिस्नानविधिः.
## BHŪTISNĀNAVIDHIḤ.

Page, 1. Lines, 12 on a page.

Begins on fol. 10*b* of the MS. described under No. 203, which was omitted to be included in the list of other works.

Almost complete.

Similar to the work described under No. 5485 of the D.C.S. MSS., Vol. XI.

**Beginning:**

वातुलतन्त्रे—

आचारलिङ्गाय नम इत्याद्यैष्वड्भिरात्मनः ।
पादयोर्नाभिदेशे च हृदये चानने तथा ॥
मस्तके च शिखायां च समभ्युक्ष्य तथा पुनः ।
शिखादिपादपर्यन्तं तत्तत्स्थानेष्वनुक्रमात् ॥
महालिङ्गाय नम इत्याद्यैः संप्रोक्ष्य पूर्ववत् ।
भूतिस्नानं प्रकुर्वीत सृष्टिसंहारभेदतः ॥

**End:**

नमश्शिवायेति भस्म सप्तकृत्वोऽभिमन्त्रितम् ।
उद्धूलयेच्छरीरं तु त्रिपुण्ड्रं चापि धारयेत् ॥
सप्तकोटिमहामन्त्रा मम वक्त्राद्विनिर्गताः ।
मह्य नमश्शिवायेति मन्त्रादन्यं न रोचते ॥

No. **14115.** पञ्चाक्षरीमन्त्रः.
PAÑCĀKṢARĪMANTRAḤ.

Page, 1. Lines, 12 on a page.

Begins on fol. 15*a* of the MS. described under No. 203, wherein this was omitted to be included in the list of other works given therein.

Incomplete.

Same work as that described under No. 6571 ante, but with slight difference in the beginning.

**Beginning:**

अस्य श्रीपञ्चाक्षरीमन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः, श्रीसदाशिवो देवता, ह्रमिति बीजम्, उमेति शक्तिः, उदात्तस्वरः, श्वेतवर्णः, श्रीसदाशिवप्रीत्यर्थे जपे विनियोगः ।

---

No. **14116.** अंशुमद्भेदः—काश्यपीयः.
AṂŚUMADBHEDAḤ : KĀŚYAPĪYAḤ.

Pages, 2. Lines, 12 on a page.

Begins on fol. 15*a* of the MS. described under No. 203.

Contains a portion of the 48th Paṭala.

Slightly different from the work described under No. 13032 ante.

**Beginning:**

अंशुमान काश्यपे

प्राच्यां वै वृषभः स्थाप्योऽलङ्कारस्त्वग्निगोचरे ।
अग्निस्थाने तु दुर्गा वा याम्ये वै सप्त मातरः ॥

* * * *

धनदो राजा पृथिवी मरुतः शनैश्चरः । मूर्त्यष्टका ।
वृषलक्षणमाख्यातं शृणु वह्नेस्तु लक्षणम् ।
द्विवक्त्रं चैकनेत्रं च द्विनासी च षडक्षकम् ॥

**End:**

उमश्शनैश्चरश्चैवं द्वात्रिंशत्परिवारकाः ।
भवश्चतुर्भुजश्शान्तो जटामकुटमण्डितः ॥

* * * *

अनिलः प्रत्युषश्चैव प्रभासश्च तथैव च ।
वसवश्चाष्टका एते रक्तवर्णा . . . . ॥

### No. 14117. बृहज्जाबालोपनिषद्.
### BṚHAJJĀBĀLŌPANIṢAD.

Pages, 8. Lines, 12 on a page.

Begins on fol. 18a of the MS. described under No. 203.
Contains the Brāhmaṇas 1 to 7 complete and the 8th incomplete.
Same work as that described under No. 629 ante.

---

### No. 14118. प्राणप्रतिष्ठामन्त्रः.
### PRĀṆAPRATIṢṬHĀMANTRAḤ.

Page, 1. Lines, 12 on a page.

Begins on fol. 21b of the MS. described under No. 203.
Complete.
Similar to the work described under No. 6677 ante.

**Beginning:**

प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः, ऋग्यजुस्सामाथर्वणानि छन्दांसि, सकलजगत्सृष्टिकरी प्राणशक्तिर्देवता, आं बीजं, ह्रीं शक्तिः, क्रों कीलकं, सकलमन्त्रयन्त्रप्रतिष्ठार्थमस्मिन्देहे विनियोगः ।

**End:**

सुखं चिरं तिष्ठतु स्वाहा ॥

---

### No. 14119. तैत्तिरीयोपनिषद्.
### TAITTIRĪYŌPANIṢAD.

Pages, 27. Lines, 12 on a page.

Begins on fol. 22a of the MS. described under No. 203.
Complete.
Same work as that described under No. 486 ante.

---

### No. 14120. छान्दोग्योपनिषद्.
### CHĀNDŌGYŌPANIṢAD.

Pages, 9. Lines, 6 on a page.

Begins on fol. 24b of the MS. described under No. 300.
Contains the fifth Adhyāya only.
Same work as that described under No. 451.

---

### No. 14121. सन्ध्यावन्दनमन्त्रः.
### SANDHYĀVANDANAMANTRAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 48a of the MS. described under No. 401, wherein this was named as Gāyatrīhṛdaya in the list of other works given therein.

Almost complete.

Similar to the work described under No. 5629 of the D.C.S. MSS., Vol. XII.

**Beginning:**

ममोपात्तदुरितक्षयद्वारा श्रीमहाविष्णुप्रीत्यर्थं प्रातस्सन्ध्यावन्दनं करिष्ये ।
देव्यास्त्रिकोणमालिख्य मध्ये श्रीं ह्रीं च विन्यसेत् ।
प्रणवेन च संवेष्ट्य श्रीकेशवाय नम इति कीलकम् ।
आपो हि ष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः, गायत्री छन्दः, आपो देवता ।

**End:**

अथ सायम्—

सायं चैव सरस्वती भगवती पीताम्बराडम्बरा
श्यामा सामवपुर्लता परिणमद्गात्राश्रिता वैष्णवी ।
तार्क्ष्यस्था मणिनूपुराङ्गदमणिग्रैवेयभूषोज्ज्वला
हस्तालम्बितशङ्खचक्रसगदाभीतिः प्रसन्नास्तु नः ॥

---

## No. 14122. गीतगोविन्दः.
## GĪTAGŌVINDAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 57a of the MS. described under No. 401.

Contains the Aṣṭapadis 10—12.

Same work as that described under No. 11937 ante.

---

## No. 14123. दर्शस्थालीपाकविधिः.
## DARŚASTHĀLĪPĀKAVIDHIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 83b of the MS. described under No. 401.

Complete.

Similar to the work described under No. 3630 of the D.C.S. MSS., Vol. VII.

**Beginning:**

श्रीगोविन्द गोविन्द अद्य ब्रह्मणः द्वितीयपरार्धे श्वेतवराहकल्पे वैवस्वतमन्वन्तरे कलियुगे प्रथमपादे तिथौ दर्शस्थालीपाकेन यक्ष्ये । स्थण्डिलं

कृत्वा प्राचीः पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत् । अथोदीचीः पुरस्संस्थं पश्चिमारम्भमालिखेत् । अवाक्करोऽभ्युक्ष्य, निधाय वह्निम् ।

**End:**

प्राणायामः. परिषेचनम् । प्रणीतास्वप अनीय प्रतिजलमू(मुत्सृ)ज्य ब्रह्मोद्वासनं, कायेन वाचा ॥

---

No. **14124.** ऐतरेयोपनिषद्.
AITAREYÔPANIṢAD.

Pages, 5. Lines, 4 on a page.

Begins on fol. 16*b* of the MS. described under No. 292, wherein this work was omitted to be included in the list of other works given therein.

Complete.

Same work as that described under No. 323 ante.

---

No. **14125.** ईशावास्योपनिषद्.
ÎŚÂVÂSYÔPANIṢAD.

Pages, 2. Lines, 4 on a page.

Begins on fol. 21*a* of the MS. described under No. 292.

Complete.

Same work as that described under No. 300 ante.

---

No. **14126.** मुण्डकोपनिषद्.
MUṆḌAKÔPANIṢAD.

Pages, 2. Lines, 4 on a page.

Incomplete.

Begins on fol. 24*a* of the MS. described under No. 713 ante.

Same work as that described under No. 715 ante.

---

No. **14127.** छान्दोग्योपनिषद्.
CHÂNDÔGYÔPANIṢAD.

Pages, 3. Lines, 4 on a page.

Begins on fol. 31*b* of the MS. described under No. 292, wherein this work was omitted to be included in the list of other works given therein.

Contains a small portion of the fifth Adhyâya.

Same work as that described under No. 451 ante.

No. **14128.** पञ्चीकरणव्याख्या.

PAÑCĪKARAṆAVYĀKHYĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 322.

Wants the beginning; otherwise complete.

Similar to the work described under No. 4642 ante.

**Beginning:**

विराडित्युच्यते । एतत्स्थूलशरीरमात्मनः । इन्द्रियैरर्थोपलब्धिर्जागरितम् । . . . . . . . . . . . . . . . . . . . . एतत्त्रयमकारः । अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सप्तदशकलिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते । एतत्सूक्ष्मशरीरमात्मनः । करणेषूपसंहृतेषु जागरितसंस्कारजप्रत्ययस्सविषयस्स्वप्नः । तदुभयाभिमान्यात्मा तैजसः । (एत)त्त्रयमुकारः ।

**End:**

देहेन्द्रियमनोबुद्धिप्राणाहङ्कृतिविलक्षणं सच्चिदानन्दानन्ताद्वयं प्रत्यग्भूतं परं ब्रह्मैवाहमस्मि इत्यहं ब्रह्मेत्यभेदेनावस्थानं समाधिः । ओं अहं ब्रह्मास्मि ॥

---

No. **14129.** महावाक्यार्थविवरणम्.

MAHĀVĀKYĀRTHAVIVARAṆAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 12*b* of the MS. described under No. 322.

Complete.

Same work as that described under No. 4715 ante.

---

No. **14130.** ध्यानक्रमः.

DHYĀNAKRAMAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 18*a* of the MS. described under No. 322.

Deals with the contemplation or Dhyāna in general.

**Beginning:**

नत्वा गुरुं ब्रह्मविदां वरेण्यं जित्वान्तरस्थं तद(षड)मित्रवर्गम् ।
स्थित्वा सदैकान्तविशुद्धदेशे ध्यात्वा शिवं भ्रूयुगमध्यपद्मे ॥
श्रुत्वा तदानाहतदिव्यनादं धृत्वा विभिन्नामरबिन्दुरत्नम् ।
पीत्वा सुधां चन्द्रमसः पतन्तीं छित्त्वा च सङ्कल्पविकल्पजालम् ॥

**End:**

वक्त्रे चांपूर्य वायुं हुतवहनिलयेऽपानमाकृष्य धृत्वा
स्वाङ्गुष्ठाद्यङ्गुलीभिर्वरकरतलयोः षड्भिरेवं निरुध्य ।
श्रोत्रे नेत्रे च नासापुटयुगलमपि ध्यानमार्गेण धीराः
पश्यन्ति प्रत्ययांस्तान् प्रणवबहुविधान् ध्यानसंलीनचित्ताः ॥

---

No. **14131.** प्रणवमन्त्रः.

PRAṆAVAMANTRAḤ.

**Pages,** 6. Lines, 6 on a page

Begins on fol. 19*a* of the MS. described under No. 322.

Incomplete.

Similar to the work described under No. 6637 ante.

**Beginning:**

शुक्लाम्बरधरं विष्णुं ( . . . ) विघ्नोपशान्तये ॥

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
यदबोधादिदं भाति यद्बोधात्प्रविलीयते ।
नमस्तस्मै परानन्दवपुषे परमात्मने ॥

* * * *

हृदयकमलमध्ये परब्रह्मस्वरूपं प्रणवं ध्यात्वा षट् प्राणायामान् कुर्यात् । तदनु प्रणवेन करशुद्धिं कृत्वा अङ्गुलिन्यासं कुर्यात् ।

* * * *

प्रणवेन तालत्रयदिग्बन्धनाग्निप्राकारान्निधाय तत्करं ब्रह्मरन्ध्रे निधाय प्रणवस्य अन्तर्यामी ऋषिः, देवी गायत्री छन्दः, परमात्मा देवता ।

**End:**

ओं अर्धमात्राया वर्ण ऋषिः, विराट्छन्दः, पुरुषो देवता, क्लीं बीजं, सर्वे वर्णाः, तुर्यावस्था, भूर्भुवस्सुवस्स्थानानि, उदात्तानुदात्तस्वरितस्वराः.

* * * *

जगदङ्कुरकन्दाय सच्चिदानन्दमूर्तये ।
गलिताखिलभेदाय नमश्शान्ताय विष्णवे ॥

## No. 14132. पञ्चीकरणम्.
## PAÑCĪKARAṆAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 21*b* of the MS. described under No. 322, wherein this work was omitted to be included in the list of other works given therein.

Incomplete.

Same work as that described under No. 4635 ante.

---

## No. 14133. आतुरसन्न्यासविधिः.
## ĀTURASANNYĀSAVIDHIḤ.

Size, 10¾ × 1¼ inches. Pages, 5. Lines, 6 on a page.

Begins on fol. 33*a* the MS. described under No. 322.

Complete.

Similar to the work described under No. 3542 ante.

**Beginning:**

अस्माद्गार्हस्थ्याश्रमात् परमहंससन्न्यासाश्रमं प्रविशामीति सङ्कल्प्यापां समीपं गत्वा स्नात्वाचम्य पात्रान्तरेणोदकमादाय दक्षिणेन पाणिनाप्सु जुहुयात् ।

**End:**

प्रणवजपे विनियोगः । ओमिति ततो भिक्षुर्जपति । पुत्रबन्धुगृहादिकं न विशेत् ॥

**Colophon:**

इत्यातुरसन्न्यासविधिः ॥

---

## No. 14134. क्रमसन्न्यासविधिः.
## KRAMASANNYĀSAVIDHIḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 322.

Complete.

Similar to the work described under No. 3841 of the D.C.S. MSS., Vol. VII.

**Beginning:**

अथातश्शौनकादयो विधिं व्याख्यास्यामः । पूर्वेद्युर्नान्दीश्राद्धं कुर्यात् । केन प्र(कारेण) . . . देवर्षिदिव्यमनुष्यभूतपितृमातृआत्मेत्यष्टौ श्राद्धानि विहितानि । प्रथमं सत्यसंज्ञिका विश्वे देवाः

* * * *

तत्रायं प्रयोगः—कर्ता स्नात्वा पादौ प्रक्षाल्याचम्य प्राङ्मुख उपविश्यात्मशुद्धिं कुर्यात् ।

कृच्छ्रांस्तु चतुरः कुर्यात्साधनार्थमनाश्रमी ।
आश्रमी कृच्छ्रमेकं न कृत्वा सो योग्यतावि . . ? ॥

**End:**

दण्डं नमस्कृत्य सद्गुरून् विधिवत्प्रणम्य शुभमुहूर्ते (गुरु)भ्यस्सकाशात् ब्रह्मबुद्ध्या तद्वाक्यश्रवणं कुर्वन् यावज्जीवं तदधीनो भवेत् ॥

**Colophon:**

इति शौनकमते एकदण्डसन्न्यासविधिः समाप्तः ॥

---

## No. 14135. सन्न्यासिकृत्यम्.
## SANNYĀSIKṚTYAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 322, wherein this work was omitted to be included in the list of other works given therein.

Complete.

On the conduct of a person immediately after becoming a Sannyāsin who is here required to remove the tuft of hair in the head and to cast away his clothes and the sacred thread muttering at the same time the Vyāhṛtimantra.

**Beginning:**

तदनन्तरं सन्ध्यानुष्ठानप्रकारः । प्राणायामषट्कं कृत्वा प्रणवस्यान्तर्यामी ऋषिः, देवी गायत्री छन्दः, परमात्मा देवता, दक्षिणहस्तेन जलं गृहीत्वा, प्रणवेन द्वादशवारमभिमन्त्र्य शिरः प्रोक्षयेत् ।

* * * *

महावाक्योपदेशप्रकारः—आदौ विष्णुप्रार्थना ।

तत्र यमः—

गत्वा तोयान्तिकं विप्रो भक्त्या संप्रार्थयेद्धरिम् ।
सर्वदेवात्मने तुभ्यं तोयाहुतिमहं हरेः ॥
दत्वा सर्वेषणां त्यक्त्वा युष्मच्चरणमागतः ।
त्राहि मां सर्वलोकेश गतिरन्या न विद्यते ॥
सन्न्यस्तं मे जगन्नाथ पाहि मां मधुसूदन ।
त्राहि मां सर्वदेवेश वासुदेव सनातन ॥

**End:**

शिखाः छित्वा विसृज्य यज्ञोपवीताच्छादने कृत्वा उदकाञ्जलिं व्याहृतिना(भिः) अप्सु जुहुयात् । ततो दिगम्बरो भूत्वा उदङ्मुखो गच्छेत् ॥

---

No. **14136.** छान्दोग्योपनिषद्.

CHĀNDŌGYŌPANIṢAD.

Pages, 14. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 322, wherein this work was omitted to be included in the list of other works given therein.

Contains the sixth Praśna.

Same work as that described under No. 451 ante.

---

No. **14137.** प्रायश्चित्तविषयः.

PRĀYAŚCITTAVIṢAYAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 322, wherein this work was omitted to be included in the list of other works given therein.

Incomplete.

Similar to the work described under No. 3485 ante.

**Beginning:**

तत्रापि मन्दमध्यमाधिकारिभिरवशीकृतचित्तैः कृच्छ्रचान्द्रायणप्रणवजपप्राणायामादयः कार्याः । वशीकृतचित्तैस्तु ध्यानमेव कार्यम् ।

उक्तं च—

प्रायश्चित्तेषु सर्वेषु येके (एकं) ध्यानं विशिष्यते ।
प्रणवस्य जपो वाथ मूलमन्त्रस्य संस्मृतिः ॥

**End:**

य(अ)वशेनापि यस्मिन् कीर्तिते सर्वपातकैः ।
पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

---

No. **141 8.** सन्न्यासप्रयोगः.

SANNYĀSAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 57*a* of the MS. described under No. 322, wherein this was omitted to be mentioned in the list of other works.

Incomplete.

On the ceremonial procedure to be observed for entering the order of a Sannyāsin of the Ekadaṇḍi type.

**Beginning:**

स्नात्वाचम्य प्राणायामत्र(यं) कृत्वा ततः तीर्थदेशं गत्वा मृत्पात्रद्वयं सम्पाद्य ताभ्यामुदकं गृहीत्वा अप्सु जुहुयात् । तत्र होमप्रकारः—दक्षिणेन पाणिना तयोरेकपात्रमादाय पात्रान्त(र)स्थजले एष वा अक्षय्यः प्राणः प्राणं गच्छ स्वां योनिं गच्छ स्वाहा—इति तत्पात्रस्थमुदकमप्सु जुहुयात् । इति प्रथमाहुतिः ।

**End:**

पात्रे निश्शेषं तत्पात्रस्थोदकमादाय ओं भूर्भुवस्सुवः मया सन्न्यस्तं स्वाहा इति तृतीयाहुतिं पिबेत् ।

अनन्तरमाचम्यान्यपात्रस्थमु(द)कमञ्जलिना पूर्णमादाय

* * * *

ओं भूः गायत्रीं व्याहृतौ प्रविलापयामि । ओं भुवः भर्गो देवस्य धीमहि सावित्रीं व्याहृतौ, ओं सुवः धियो यो नः प्रचोदयात् सरस्वतीम्.

---

## No. 14139. शिवोऽहंपञ्चकम्.

## ŚIVOHAMPAÑCAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 322, wherein this was omitted to be included in the list of other works.

Complete.

Same work as that described under No. 4630 of the D.C.S. MSS., Vol. IX.

---

## No. 14140. मृत्तिकास्नानविधानम्.

## MṚTTIKĀSNĀNAVIDHĀNAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 322.

Incomplete.

Same work as that described under No. 3759 ante, but with slight difference.

No. 14141. भागवतधर्माः.
BHĀGAVATADHARMĀḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 59b of the MS. described under No. 322.

Complete.

On the conduct and duties of persons devoted to the worship of God Viṣṇu.

**Beginning:**

ज्ञानस्वरूपमत्यन्तं निर्मलं परमार्थतः ।
तमे(दे)वार्थस्वरूपेण भ्रान्तिदर्शनतस्स्थितम् ॥

* * * *

तस्माद् गुरुं प्रपद्येत जिज्ञासुश्श्रेय उत्तमम् ।
शब्दे परे च निष्णातं ब्रह्मण्युपरमाश्रयम् ॥

तत्र भागवतान् धर्मान् शिक्षेद्गुर्वात्मदैवतः ।
अमाययानुवृत्त्या यैस्तुष्येदात्मात्मदो हरिः ॥

सर्वतो मनसोऽसङ्गमादौ सङ्गं च साधुषु ।
दयां मैत्रीं प्रश्रयं च भूतेष्वद्धा यथोचितम् ॥

**End:**

परिचर्यां चोभयत्र महत्सु नृषु साधुषु ।
परस्परानुकथनं पावनं भगवद्यशः ॥

मिथो रतिर्मिथस्तुष्टिर्निर्वृतिर्मिथ आत्मनः ।
स्मरन्तस्स्मारयन्तश्च मिथोऽघौघहरं हरिम् ॥

भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम् ।

* * * *

इति भागवतान् धर्मान् शिक्षन् भक्त्या तदुत्थया ।
नारायणपरो मायामञ्ज(ञ्ज)स्तरति दुस्तर(रा)म् ॥

---

No. 14142. परमरहस्यशिवतत्त्वविद्योपनिषद्.
PARAMARAHASYAŚIVATATTVAVIDYŌPANIṢAD.

Pages, 4. Lines, 7 on a page.

Begins on fol. 41b of the MS. described under No. 254 and not on fol. 41a as mentioned therein.

Complete.

An Upaniṣad inculcating the greatness and importance of the worship of God Śiva. Markaṇḍēya is said to have revealed the secret details regarding the due worship of God Śiva to the sages Śaunaka and others.

**Beginning:**

भद्रं • शान्तिश्शान्तिश्शान्तिः ।

ब्रह्मावर्ते महाभाण्डे वटे मूले महासत्राय समेता महर्षयश्शौनकादयस्ते ह समित्पाणयस्तत्त्वजिज्ञासवो मार्कण्डेयं चिरजीविनमुपसमेत्य पप्रच्छुः— कन त्वं चिरंजीव्यसि, केन वानन्दमनुभवसीति? परमरहस्यशिवतत्त्वज्ञाने-(ने)ति स होवाच । किं परमरहस्यम्? शिवतत्त्वज्ञानम् । तत्र को देवः के मन्त्राः, का निष्ठा, किं तज्ज्ञानं, कः परिकरः, को विधिः, कः कालः, किं स्थानम्? स होवाच—येन दक्षिणाभिमुखशिव (अ)परोक्षीकृतो भवति ।

**End:**

य इमां परमरहस्यशिवतत्त्वविद्यामधीते सर्वपापेभ्यो मुक्तो भवति य एवं वेद स कैवल्यमनुभवति ॥

**Colophon:**

इत्याथर्वणे कौषीतकशाखायां परमरहस्यशिवतत्त्वविद्योपनिषत्समाप्ता ॥ सह नाववतु—शान्तिः ॥

---

## No. 14143. विषयवाक्यदीपिका.

## VIṢAYAVĀKYADĪPIKĀ.

Substance, palm-leaf. Size, 13¾ × 1⅜ inches. Pages, 169. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same work as that described under No. 5001 ante. By Raṅga-rāmānujasvāmin.

---

## No. 14144. यमुनापूजा.

## YAMUNĀPŪJĀ.

Substance, palm-leaf. Size, 14⅜ × 1½ and 12 × 1⅜ inches. Pages, 4. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1a. The other works herein are Anantavratakalpa 3a, Tarkabhāṣā 17a, Ṛgvēdalakṣaṇa 23a, Ṛksaṁhitā 43a, Āśvalāyanapūrvaprayōga 55a.

Complete.

Same work as that described under No. 8419 ante.

No. **14145.** अनन्तव्रतकल्पः.
ANANTAVRATAKALPAḤ.

Pages, 26. Lines, 7 on a page.
Begins on fol. 3*a* of the MS. described under No. 14144.
Imperfect and in disorder.
Same work as that described under Nos. 8167 and 8168 ante

No. **14146.** तर्कभाषा.
TARKABHĀṢĀ.

Pages, 12. Lines, 7 on a page.
Begins on fol. 17*a* of the MS. described under No. 14144.
Incomplete.
Same work as that described under No. 4104 ante. By Kēśavamiśra.

No. **14147.** ऋग्वेदलक्षणम्.
ṚGVĒDALAKṢAṆAM.

Pages, 39. Lines, 7 on a page.
Begins on fol. 23*a* of the MS. described under No. 14144.
Incomplete.
Similar to the work described under No. 8*5 ante.

**Beginning:**

सादिमादिमेतमेत यस्य तस्य तं पुनाना हरिमिन्दुं प्रधारा वर्जेम् ।
एत गन्त वरुण गन्त वयमुक्त्वा गन्त अन्यत्र गन्ता गन्त वर्जेम् ।

**End:**

रेतो रेतश्च रेजश्च रेवन्ते रुद्र रेवती ।
रूपैश्च ऋसमानैश्च रुद्रैस्तारिरिषीष्टि च ॥
राजा राट् च राशिश्च रायो रायेरबर्यसि ।
अभीतिरपसो रक्षो रमस्वद्रमसं रसम ॥
ररारा च रराक्तां च रवथेन रपांसि च ।
रनो रघः प्रवादौ तु रेफास्तां सप्तविंशतिः (?) ॥

No. **14148.** ऋक्संहिता.
ṚKSAṀHITĀ.

Pages, 24. Lines, 7 on a page.
Begins on fol. 43*a* of the MS. described under No. 14144.
Contains extracts from the second and third Maṇḍalas.
Same work as that described under No. 1 ante.

## No. 14149. आश्वलायनपूर्वप्रयोगः.
## ĀSVALĀYANAPŪRVAPRAYŌGAḤ.

Pages, 64. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 14144.

Wants the beginning and the end.

Same work as that described under No. 3563 ante.

---

## No. 14150. श्रीसूक्तम्.
## ŚRĪSŪKTAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 206*a* of the MS. described under No. 2892

Complete.

Same work as that described under No. 17 ante.

---

## No. 14151. ब्रह्मचारिव्रतविषयः.
## BRAHMACĀRIVRATAVIṢAYAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 208*a* of the MS. described under No. 2892, wherein this was omitted to be included in the list of other works.

Wants the beginning and the end.

On certain religious observances of the Brahmacārins (students of the Vēdas).

**Beginning:**

श्रीशादाश्विकानुप्रवचननियमी तिष्ठेदहःशेषमस्तमिते ब्रह्मोदनमनुप्रवचनीयं श्रावयित्वाचार्याय निवेदयेत । आचार्यः समन्वारब्धो जुहुयात् । सदसस्पतिं सावित्रीं द्वितीयमृषिभ्यस्तृतीयं सौविष्टकृतं चतुर्थं ब्राह्मणान् भोजयित्वा वेदनसमान्तं वाचयीत । अत ऊर्ध्वं क्षौर . . . शनौ ब्रह्मचारिणावलङ्कुर्वाणौ अधश्शायिनौ ।

**End:**

व्याहृतिभिः समुच्चयेन एकैकां च नत्वार्यमा भवसि उवाहे तथा ।

---

## No. 14152. प्रायश्चित्तविषयः.
## PRĀYAŚCITTAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 208*b* of the MS. described under No. 2892, wherein this was omitted to be included in the list of other works.

Complete.

Similar to the work described under No. 3486 ante.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां तिथौ मम औपासनान्तरितादिपुनरसन्धान-पर्यन्तमेकैकस्य मासस्य मासस्य प्राजापत्यात्मकं प्रायश्चित्तं षण्मासावर्ति एकैकमासस्य प्राजापत्यकृच्छ्रद्वयात्मकं प्रायश्चित्तं होमद्रव्यार्थं धान्यकृच्छ्रं मम शरीरशुद्ध्यर्थं स्वर्णकृच्छ्रं चैतानि कृच्छ्राणि शास्त्रीयाणि स्वीकृत्य ममौपासनाधिकारसिद्धिमनुगृह्णन्तु । परिषदुपदिष्टप्रायश्चित्तमध्ये हिरण्यधान्य-कृच्छ्राण्याचरिष्ये ।

**End:**

मासि मासि तु कृच्छ्रं स्यात्षण्मासाद्द्विगुणं भवेत् ।
त्रिगुणं नवमासे तु अत ऊर्ध्वं चतुर्गुणम् ॥

---

## No. 14153. उपनयनसङ्कल्पः. UPANAYANASAṄKALPAḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 210*b* of the MS. described under No. 2892.

Complete.

On the performances of certain religious ceremonies by a person preliminary to investing his son with the sacred string.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां तिथौ मम कुमारस्यातिशयननार्थं श्वो भूते जातकर्मनामकरणान्नप्राशनचौलोपनयनाख्यैः कर्मभिः संस्कारिष्यमाण-स्तदादावाभ्युदयिकं कर्तुं तदङ्गत्वेन देवताह्वानार्थमिदां वाचयिष्यमाणः तदादौ मम

* * * *

नवसूत्रधारणं कर्तुं तदादौ तदङ्गत्वेन शुद्ध्यर्थसमृद्ध्यर्थमभ्युदयार्थं च ब्राह्मणैस्सह मम पुण्याहवाचनाख्यं कर्म करिष्ये ।

* * * *

क्षुद्रपापनिवारणशुद्धिद्वारास्य कुमारस्योपनयनाधिकारसिद्ध्यर्थं ममोपनेतृत्वाधिकारसिद्ध्यर्थं प्रायश्चित्तं परिषदुपस्थानपूर्वकं प्राच्योदीच्याङ्गसहितं करिष्ये ।

**End:**

सर्वे त्रयः श्रवतः परिहिता भवन्ति भवन्ति ॥

---

No. 14154. ऐतरेयब्राह्मणम्.
AITARĒYABRĀHMAṆAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 235*a* of the MS. described under No. 2892, wherein this was omitted to be included in the list of other works.

Contains the 13th and 14th Khaṇḍa of the 13th Adhyāya.

Same work as that described under No. 32 ante.

---

No. 14155. उपाकर्मविधिः.
UPĀKARMAVIDHIḤ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 246*a* of the MS. described under No. 2892.

Complete.

Similar to the work described under No. 3576 ante.

**Beginning:**

अथोपाकर्मविधिरुच्यते ।

अत्राश्वलायनः—

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन तु ।
तन्मासे हस्तयुक्तायां पञ्चम्यां वा करिष्यते ॥
अपुष्यो(दृष्टचौ)षधयस्तास्मिन् मासे तु न भवन्ति च
तदा भाद्रपदे मासि श्रवणेन करोति तत् ॥
वेदोपकरणप्राप्तिः कुलीरस्थे दिवाकरे ।
उपाकर्म न कर्तव्यं कर्तव्यं सिंहयुक्तके ॥

कात्यायनः—

उदयव्यापिनी चैव विष्णुभे घटिकाद्वयम् ।
तत् कर्म सफलं ज्ञेयं तस्य पुण्यमनन्तकम् ॥

**End:**

अनध्यायान् श्रुतौ सिद्धान् परिहृत्य(त्व)धीयते ।
यस्तु पूर्वमर्धीतेऽसौ प्रारभेत शुभेऽहनि ॥

**Colophon:**

इत्युपाकर्मविधिः ॥

## No. 14156. चूर्णिका.
## CŪRṆIKĀ.

Pages, 3. Lines, 13 on a page.

Begins on fol. 74a of the MS. described under No. 8562.

Benedictory prose passages invoking blessings on a married couple.

**Beginning:**

स्वस्त्याशीतिसहस्राणां ह . . हरदैवत्यानां पुरुहूतहुतवहदण्डधरनिशाचरपाशपाणिसमीरण(धनद)शशिशेखराणामायुष्मतः कमलासनस्य सकलदुरितनिवारणपारावारस्याद्यन्तरहितस्य गौरीमनोवल्लभस्य पुष्परससायकस्य तस्य . . . कुमुदचन्द्रस्य रामचन्द्रस्य प्रज्ञागुरोः

**End:**

श्रीलक्ष्मीनारायणस्य प्रसादेन दम्पत्योरिक्षुक्षौद्रदाधिमधुघृतजारिकमरीचिकादिमङ्गलद्रव्याणि सर्वौषधयः सर्वसस्यानि सर्वमङ्गलकराणि भवेयुः । तिथिवारनक्षत्रयोगकरणजन्मलग्नहोराद्रेक्काणनवांशद्वादशांशत्रिंशदंशकानां निरन्तरमनुकूलाः सर्वे ग्रहाः सुनक्षत्राश्च शुभैकादशस्थानफलदाः सुप्रसन्ना भवन्तु ॥

---

## No. 14157. वरमङ्गलाष्टकम्.
## VARAMAṄGALĀṢṬAKAM.

Pages, 2. Lines, 13 on a page.

Begins on fol. 75b of the MS. described under No. 8562, wherein this was included under the general name Maṅgalāṣṭaka in the list of other works.

Complete.

Similar to the work described under No. 11333 ante. The stanzas here invoke the blessings of God Vēṅkaṭēśa.

**Beginning:**

श्रीकान्ताकुचकुङ्कुमोद्भूतरजःपुञ्जैस्सुरञ्जीकृतं
वक्षो यस्य महात्मनः समुचितप्रख्यैः सुहारैर्घनम् ।
श्रीलक्ष्म्या वरमन्दिरं सुविततं श्रीवत्सलक्ष्माङ्कितं
दद्याद्वेङ्कटशैलवास्यय हरिः सान्द्रं सदा मङ्गलम् ॥

**End:**

इत्येतद्वरमङ्गलाष्टकमिदं श्रीविट्ठलेशार्पितं
यो मर्त्यः प्रपठेच्च तस्य मधुजित्कल्याणपारम्परीम् ।
दत्ते पुत्रसुपौत्रगोकुलधनं सज्ज्ञानमानन्ददं
सत्सेवां हरिभक्तिदां सुविशदां शं तीर्थहृत्प(प्र)गः ॥

---

No. **14158.** मङ्गलाष्टकम्.

MAṄGALĀṢṬAKAM.

Pages, 3. Lines, 13 on a page.

Begins on fol. 76*a* and not on 75*b* of the MS. described under No. 3562.

Complete.

Similar to the work described under No. 11331 ante. By Rāma, son of Narasiṁha of Gautamagōtra.

**Beginning:**

शर्वाहीशविपेन्द्रपूर्वकसुरैस्सेव्याङ्घ्रिपद्मद्वयः
श्रीवाणीविमलः सुभक्तिविमलज्ञानादिदः सद्गुरुः ।
श्रीवाणीकरकञ्जलालितपदः श्रीशाङ्घ्रिभक्त्यारतः
सर्वज्ञस्सकलेश्वरो हिततमो दद्यात्सदा मङ्गलम् ॥

**End:**

इत्येतच्छुभमङ्गलाष्टकमिदं श्रीरामनाम्ना कृतं
श्रीमद्गौतमगोत्रजस्य नरसिंहार्यस्य पुत्रेण तु ।
माङ्गल्यादिशुभक्रियादि सततं भक्त्या पठेद्यो नरः
तस्य श्रीनृहरिर्दिशत्प्रमतिगो दद्यात्सदा मङ्गलम् ॥

---

No. **14159.** वरमङ्गलाष्टकम्.

VARAMAṄGALĀṢṬAKAM.

Pages, 3. Lines, 13 on a page.

Begins on fol. 77*a* of the MS. described under No. 3562, wherein this was included under the general name Maṅgalāṣṭaka, in the list of other works.

Complete.

Same work as that described under No. 11331 ante, but with the additional stanza at the end which is given below.

इत्येते(वं) वरमङ्गलाष्टकमिदं पापौघविध्वंसिनी (सकृत)
पुण्या(ण्यं) नः(सं)मति कालिदासकवित(ना)वृत्तः(त्तैः) प्रबन्धीकृता(तम्) ।
यः प्रातश्शृणुयात्स हीनम(वृ)जिना(नो)ज्ञानं(नी) च भक्ते(कथ)न्वित(तः)
गङ्गासागरसङ्गमं(वत्) प्रतिदिनं कुर्वन्तु ते मङ्गलम् ॥

---

## No. 14160. वधूवराशीर्वादः.
## VADHŪVARĀŚĪRVĀDAḤ.

Page, 1. Lines, 13 on a page.

Begins on fol. 78a of the MS. described under No. 3562, wherein this was omitted to be included in the list of other works.

Complete.

Similar to the work described under No. 11834 ante.

The stanzas exhort blessings upon a married couple.

**Beginning** and **End**:

विघ्नेश्वरो विघ्नविदूरकारी निर्विघ्नकार्येषु फलं प्रसिद्धम् ।
विघ्नेश्वरो नाम सुरेषु पूज्यः वधूवराभ्यां वरदा भवन्तु ॥
सर्वेषु कार्येष्वचलार्थसिद्धिः वागीश्वरी सत्यवती च दुर्गा ।
सरस्वती नाम विधातृपत्नी वधूवराभ्यां वरदा भवन्तु ॥
शिवस्य पत्नी गिरिराजपुत्री सुवर्णदिव्याम्बरवस्त्रभूषा ।
कल्याणगौरा शुभमङ्गलाभा वधूवराभ्यां वरदा . . . ॥
वसन्तलक्ष्मीर्वनराजलक्ष्मीः क्षीराब्धिपुत्री कमलायताक्षी ।
श्रीविष्णुपत्नी भुवनैकमाता वधूवराभ्यां वरदा भवन्तु ॥

---

## No. 14161. वरमङ्गलाष्टकम्.
## VARAMAṄGALĀṢṬAKAM.

Pages, 3. Lines, 13 on a page.

Begins on fol. 78a of the MS. described under No. 3562, wherein this was omitted to be included in the list of other works.

Complete.

Similar to the work described under No. 11833 ante. Apparently by Rājarājēśvara.

**Beginning:**

लक्ष्मीर्यस्य परिग्रहः कमलभूस्सूनुर्गरुत्मान् रथः
पौत्रश्चन्द्रविभूषणः सुरगुरुश्शेषश्च शय्या पुनः ।

ब्रह्माण्डं वरमन्दिरं सुरगणा यस्य प्रभोस्सेवकाः
स त्रैलोक्यकुटुम्बपालनपरः कुर्याद्धरिर्मङ्गलम् ॥

**End:**

इत्येतद्धरमङ्गलाष्टकमिदं (श्री)राजराजेश्वरी-
राख्यातं जगदात्म . . . . . . . . . . . . ।
माङ्गल्यादिशुभक्रियासु सततं सन्ध्यासु वा यः पठेत्
धर्मार्थादिसमस्तवाञ्छितफलं प्राप्नोत्यसौ मानवः ॥

---

No. **14162.** ऐतरेयब्राह्मणम्.
AITARĒYABRĀHMAṆAM.

**Pages, 2.** Lines, 13 on a page.

Begins on fol. 79*a* of the MS. described under No. 3562, wherein this was omitted to be included in the list of other works.

Contains the 12th and the 13th Khaṇḍas of the 12th Adhyāya.

Same work as that described under No 32 ante.

---

No. **14163.** अर्कविवाहः.
ARKAVIVĀHAḤ

Substance, palm-leaf. Size, 10¼ × 1¼ inches. Pages, 6. Lines, 6 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Dvibhāryāgnisaṁskāra 5*a*, Vratacatuṣṭaya 15*a*, Pūrvāparaprayōga 22*a*.

Complete.

Similar to the work described under No. 3583 ante.

**Beginning:**

अथार्कविवाह उच्यते ।

उद्वाहे प्र(प)तिसिद्ध्यर्थं तृतीयां न कदाचन ।
मोहादज्ञानतो वापि यदि गच्छेत्स मानुषीम् ॥
नश्यत्येव न सन्देहो गार्ग्यस्य वचनं तथा ।
अन्यत्र धर्मयागस्य नोद्वहेन्मानुषीं स्त्रियम् ॥
तृतीयां यदि चोद्वाहेत्तर्हि सा विधवा भवेत् ।

तृतीयविवाहनिषेधस्य मानुषीवि(ष)यत्वात् । तदार्ककन्याविवाहः स्यात् ।

**End:**

चतुर्थे दिवसे वृक्षसमीपं गत्वा पूर्ववत्स्थहोमाग्नि(ग्नी)विसृज्य ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा पश्चान्मानुषीं कन्यामुद्वहेत् । पुत्रपौत्रधनधान्यसमृद्धिभिः ॥

**Colophon:**

इत्यर्कविवाहस्समाप्तः ॥

---

## No. 14164. द्विभार्याग्निसंस्कारः.

## DVIBHĀRYĀGNISAṀSKĀRAḤ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 14163.

Incomplete.

Similar to the work described under No. 3639 ante.

**Beginning:**

अथ द्विभार्याग्निद्वयसंस्कार उच्यते । यस्य लौकिकाग्नौ द्वितीयविवाहः स्यात् द्वितीयविवाहप्रभृति विवाहं(हे)चोभावग्निं विधिवत्पृथगुपासीत(यातास्) । अथैकादशाहे द्वादशाहे वोभावग्नि पृथक् स्थापयित्वा प्राणानायम्य, गृह्याग्निसाध्यानां कर्मणां तन्त्रानुष्ठानसिद्ध्यर्थमौपासनाग्निद्वयसंसर्गं करिष्य इति सङ्कल्प्य, द्वितीयामौ(या औ)पासनाग्नौ आज्यसंस्कारान्ते द्वितीयायामन्वारम्भणी(या)यां चतुर्गृहीतमाज्यं गृहीत्वा ।

**End:**

द्वितीयोद्वाहमारभ्य पृथगुक्त्वानलद्वयम् ।
साङ्गं बोधायनः प्राह दशाहादिदिनत्रये ॥
गृह्याग्निर्जयहोमान्तं तन्त्रानुष्ठानसिद्धये ।

---

## No. 14165. व्रतचतुष्टयम्.

## VRATACATUṢṬAYAM.

Pages, 10. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 14163.

Incomplete.

Deals with the procedure relating to the performance of four Vratas or religious observances, viz., Prājāpatya, Saumya, Āgnēya, Vaiśvadēva. These Vratas are observed immediately after the due completion of the Vedic study, i.e., the Brahmacarya stage.

**Beginning**:

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ इमं कुमारं प्राजापत्यसौम्याग्नेय-वैश्वदेवाख्यैः कर्मभिरेकतन्त्रेण संस्करिष्य इति सङ्कल्प्याग्निं प्रतिष्ठाप्याग्ने-रुत्तरतश्चतस्र औदुम्बरसमिधः संमीलनवस्त्रमदंति(कुम्भं) चासाद्य ततश्वेत-तण्डुलोपरि ऋषीन्निवीती तर्पयेत् ।

**End**:

अग्ने व्रतपते वैश्वदेवव्रतमचारिषम् । तन्मे राधि । वायो व्रतपते । तन्मे राधि । आदित्यव्रतपते । तन्मे राधि । व्रतानां व्रतपते । तन्मे राधि । जयादिब्रह्मविसर्जनान्ते शंनोऽनुवाकपठनम्.

---

No. **14166.** पूर्वापरप्रयोगः.

PŪRVĀPARAPRAYŌGAḤ.

Pages, 181. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 14163.

Incomplete.

On the ceremonies to be performed in relation to a person from conception onwards as well as after his death.

**Beginning**:

अथ गर्भाधानमुच्यते—ऋतुस्नातायां शुभेऽहनि मङ्गलस्नातौ भूत्वा पुण्याहं वाचयित्वा पत्नीं दक्षिणत उपवेश्य स्वयमुत्तरत आसीनः प्राणा-नायम्य एवङ्गुणविशेषणविशिष्टायां शुभे मुहूर्ते मम पत्न्या गर्भाधानं करिष्य इति सङ्कल्प्य ।

**End**:

एवं कृत्वा वृषभस्य रोमत्वग्दाहजनितदोषमायश्चित्तार्थं तिलानुदा कुम्भांश्च वासोहिरण्यगोदानदशदानानि करिष्ये । गोमिथुनमध्वर्यवे दद्यात् ।

Foll. 112*b* and 113*a* contain a few Aparakārikas.

---

No. **14167.** नवग्रहस्तोत्रम्.

NAVAGRAHASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 47*a* of the MS. described under No. 3237.

Complete.

Same work as that described under No. 9537 ante.

## No. 14168. वायुस्तोत्रमन्त्रपुरश्चरणपद्धतिः.
## VĀYUSTŌTRAMANTRAPURAŚCARAṆAPADDHATIḤ.

Size, 6¾ × 1¼ inches. Pages, 8. Lines, 6 on a page.

Begins on fol. 116a of the MS. described under No. 3237.

Complete.

Deals with the manner of the ceremonial repetition of the Vāyustōtra which is in praise of Vāyu, the god of wind.

**Beginning:**

हितं न जाने श्रीजाने नापि शक्तोऽस्य साधने ।
वेत्सीश त्वं समर्थश्च तत्तदेव विधेहि मे ॥

भूशुद्धिप्राणायामगुरुनमस्कारपरपुरुषशोषणदाहनप्लावनबीजत्रयप्राणायाम-तत्त्वन्यासमातृकान्यासान् कृत्वा अस्य श्रीवायुस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, हरिवायुर्देवता ।

* * * *

नमस्तस्मै नमस्तस्मै नमस्तस्मै च वायवे ।
श्रीमदानन्दतीर्थार्यहृदयामलमन्दिर ॥

**End:**

सम्पत्सिद्ध्यर्थं सम्पद्रक्षणार्थमाद्यन्तं प्रतिदिनं सप्तवारं जपन् होमादिकं कुर्यात् ॥

**Colophon:**

वायुस्तोत्रमन्त्रपुरश्चरणपद्धतिः ॥

---

## No. 14169. विश्वामित्रसंहिता.
## VIŚVĀMITRASAṀHITĀ.

Size, 6¾ × 1¼ inches. Pages, 24. Lines, 6 on a page.

Begins on fol. 120a of the MS. described under No. 3237.

Complete.

Deals with the auspicious time for the performance of the religious rites during the life time of a person. The time considered inauspicious for the performance of these ceremonies is also mentioned. According to the colophon this forms part of the Jayōttarasaṁhitā.

**Beginning:**

विष्णुप्रजेशरविमित्रसमीरपौष्णमूलोत्तरावरुणभानि निषेककाले ।
पूज्यानि पुष्यवसुशीतकराश्विचित्रादित्याश्च मध्यमफला विफलास्त्वितरन्ये ॥

षष्ठ्यष्टमीं पञ्चदशीं चतुर्थीं चतुर्दशीमप्युभयं रहित्वा ।
शेषाश्शुभास्स्युस्तिथयो निषेके . . शशाङ्केऽस्तमिते . . ॥

**End:**

ऋक्षाणां पूर्वभागे तु ऋक्षकर्म समाचरेत् ।
तिथीनां पश्चिमे भागे तिथिकर्म समाचरेत् ॥

**Colophon:**

इति जयोत्तरसंहितायां विश्वामित्रसंहिता ॥

---

## No. 14170. कालनिर्णयः.
## KĀLANIRṆAYAḤ.

Size, 6¼ × 1½ inches. Pages, 2. Lines, 6 on a page.

Begins on fol. 132*a* of the MS. described under No. 3237, wherein this was omitted to be included in the list of other works.

Wants the beginning and the end.

Similar to the work described under No. 13517 ante.

**Beginning:**

. . . समृद्धिः स्याच्चान्द्रे सर्वविनाशनम् ।
देवकार्याणि सर्वाणि सौरमासेषु कारयेत् ॥
सिंहमासे तु रोहिण्यां . . . कृष्णाष्टमी ।

**End:**

स्वकालोऽप्यन्यकालो वा पूर्वकर्मवशाद्भवेत् ।
निमित्तमात्रं दैवज्ञः तद्दशाच्च शुभाशुभम् ॥

---

## No. 14171. आतुरसन्न्यासप्रयोगः.
## ĀTURASANNYĀSAPRAYOGAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 46 of the MS. described under No. 2902, wherein this has been omitted to be included in the list of other works.

Complete.

Similar to the work described under No. 3542 ante.

**Beginning:**

ममेह जन्मनि जन्मजन्मान्तरकृतप्रारब्धागामिसञ्चितपापक्षयद्वारा ब्रह्मी-
भावसिद्ध्यर्थमातुरसन्न्यासं करिष्य इति सङ्कल्प्य, जलाहुतिमन्त्रः—

एष एवाग्निर्वैः प्राणः प्राणं गच्छ स्वां योनिं गच्छ स्वाहा । आपो वै सर्वा देवतास्सर्वाभ्यो देवताभ्यो जुहोति स्वाहा ।

**End:**

ओं भूः संन्यस्तं संन्यस्तं मया सन्न्यस्तम् । ओं भुवः सन्न्यस्तं सन्न्यस्तं मया सन्न्यस्तम् । ओं सुवः सन्न्यस्तं सन्न्यस्तं मया सन्न्यस्तम् । ओंभूर्भुवस्सुवः सन्न्यस्तोऽहमिति चतुर्थमुच्चैरुच्चरेत् ॥

---

No. 14172. इतिहासोपनिषद्.
ITIHĀSÔPANIṢAD.

Pages, 10. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 2902.

Complete.

Same work as that described under No. 299 ante.

---

No. 14173. सोमोत्पत्तिः.
SÔMÔTPATTIḤ

Pages, 4. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 2902.

Complete.

Same work as that described under No. 2592 ante.

---

No 14174. अजपाविधानम्.
AJAPĀVIDHĀNAM.

Pages, 8. Lines, 7 on a page.

Begins on fol. 28*a* of the MS. described under No. 2902, wherein this has been omitted to be included in the list of other works.

Complete.

Similar to the work described under No. 7732 ante.

**Beginning:**

ओं गुरुवन्दनादिपूर्वकं प्राणायामत्रयं कृत्वा ममाशेषपापक्षयार्थं परमात्मप्रीतिं कामयमानो गणेशब्रह्मविष्णुरुद्रजीवगुरुसदाशिवप्रीत्यर्थं पूर्वदिनकृतषट्छतोत्तरैकविंशतिसहस्रमजपाजपं तत्तद्देवेभ्यो निवेदनं करिष्ये ।

अस्य श्री अजपागायत्रीनिवेदनमन्त्रस्य हंस ऋषिः, अव्यक्तगायत्री छन्दः, परमहंसो देवता, अकारो बीजम्, उकारश्शक्तिः, मकारः कीलकम् ।

मतान्तरे हं बीजं, सः शक्तिः, सो हं कीलकं, मम समस्तपापक्षयार्थे विनियोगः ।

**End:**

इति पञ्चोपचारं कृत्वा पूर्वदिनैकसहस्त्रमजपाजपमहं निवेदयामि ।
ध्यानम्.

विश्वव्यापिनमादिपूरुषमजं विश्वं जगत्कारणं
विश्वोद्बुद्धसमस्तपत्रकमलेति . क्षरैर्मण्डितः ।
विश्वोत्पत्तिविपत्तिरक्षणयुतं . . . ह्लादयन्
स्वात्मानन्दमनुप्रविश्य विहरेत् स्वच्छन्दतः सर्वदा ॥

पुनः प्राणायामः, पुनः षडङ्ग(न्यास)ः । संहारमुद्रां प्रदर्श्य यथासुखं विहरेत् ।

* * * *

हंसं हंसमिति जीवं परमात्मनि संयोज्य पृथिवीमुपसंहरामि ॥

---

## No. 14175. मातृकासरस्वतीमन्त्रः.
## MĀTṚKĀSARASVATĪMANTRAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 31*b* of the MS. described under No. 2902, wherein this was omitted to be included in the list of other works.

Incomplete.

Similar to the work described under No. 6933 ante.

**Beginning:**

अस्य श्रीमातृकासरस्वतीमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, मातृकासरस्वती देवता, हलो बीजानि, स्वराः शक्तयः, ब्रह्म बीजं, मायाशक्तिः सुषुम्ना नाडी, सरस्वती शक्तिः, मम समस्तपापक्षयार्थे जपे विनियोगः ।

**End:**

गणेशं नादरूपं च अक्षरं च सरस्वती ।
उच्चारणात्परा शक्तिरर्धमात्रा वरानने ॥

* * * *

अर्धेन्दुमौलिम(ज)नुतामरविन्दसंस्थां वर्णेश्वरीं प्रणमत स्तनभारनम्राम् ।

## No. 14176. श्रावणशनिवारव्रतम्.

## ŚRĀVAṆAŚANIVĀRAVRATAM.

Pages, 3. Lines, 9 on a page.

**Begins** on fol. 34a of the MS. described under No. 2902.

Complete.

Same work as that described under No. 8558 ante.

Foll. 35b and 36a contain the investigation of the meaning of certain words and also 2 or 3 witty stanzas.

---

## No. 14177. ज्यौतिषविषयः.

## JYAUTIṢAVIṢAYAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 37b of the MS. described under No. 2902.

Similar to the work described under No. 13566 ante.

**Beginning:**

राशिकूटः—

यदि पृच्छति दैवज्ञः सर्वज्ञोरिक्तपाणयः ।
विधवा वा भवेत्कन्या म्रियते च वरस्तदा ॥
प्रश्नलग्नवशतः करग्रहैः आवि शसतु शुभाशुभो विधिः ।
स्याद्विवाहसमये ग्रहस्थितिः सप्तमेऽपि शुभदाः शुभग्रहः ॥

दिनकूटः —

जन्मर्क्षमृक्षमित्याहुर्नामर्क्षाभ्यामथापि वा ॥
स्त्रीजन्मतारापूर्वाभ्यां ब्रूयात्प्राज्ञः शुभाशुभम् ॥

**End:**

सूर्यनक्षत्रमारभ्य नित्यनक्षत्र गण्यते ।
नव त्रीणि चतुः पञ्च स योगः खचरस्तथा ॥
विवाहेषु च वैधव्यं सीमन्ते च शिशुक्षयः ।
मौञ्जीबन्धे बटु(टो)र्नष्टं प्रयाणे मरणं ध्रुवम् ॥
प्रवेशे मृत्युमाप्नोति इत्येत खचरस्तथा ।

---

## No. 14178. कुण्डाकृतिः.

## KUṆḌĀKṚTIḤ.

Pages, 17. Lines, 9 on a page.

Begins on fol. 46a of the MS. described under No. 2902.

Complete.

This work describing the dimensions of sacrificial altars is also called Kuṇḍalakṣaṇa. The author is Rāmacandra of Bharadvājagōtra. He is said to have come to Naimiṣa from Mālava. The date of the work is given as 1566 Vikrama. For further particulars about the author see page LIX of the 5th Report of Operations in search of Sanskrit MSS. in the Bombay circle by Peterson.

**Beginning:**

इष्टापूर्तेष्वक्रमाद्यं यदाहुः यस्योनत्वाधिक्यतो भूरिदोषाः ।
कुण्डं साङ्गं भूरिभेदं तदत्र ब्रूते रामो नैमिषस्थो विचार्य ॥
त्रसरेणू रथरेणुर्वालाग्रं तदनु लिक्षा च ।
यूका यवोऽङ्गुलमिति परमाणोः क्रमतोऽष्टगुणितानि ॥
कृतमुष्टिकप्रकोष्ठो मुष्टीरत्निर्निरष्ठमोऽशकरः ।
सोऽरत्निस्त्वकनिष्ठः कर एव कलांशरहितः स्यात् ॥

**End:**

कश्चिन्न वेद गणितं यदि वेत्ति शुल्वं शुल्वं न वेद यदि वेत्त्यपरोऽङ्कशास्त्रिम् ।
विद्वान् द्वयं न(व)विधागमपण्डितोऽन्यः तद्वयानवानपि सुपर्णचितौ पटुः कः ॥

* * * *

श्रीमद्रत्नपुराधिपेन महितश्रीरामचन्द्रेण यो
भारद्वाजकुलाम्बुधेर्विधुरिव श्रीम(मि)श्ररामद्विजः ।
बन्धूनां परिणीतयेऽभ्युपगतोऽसौ मालवो नैमिषं
तेनर्ग्वेदविदेरितेन रचिता रामेण कुण्डाकृतिः ॥
रसगगनतिथिप्रमाद(ण)वर्षे गतवति विक्रमभूमिपस्य कालात् ।
क्रतुविधिफलदायके मखेज्ये कृतिरियमस्तु ममार्पिता सुरेशे ॥

**Colophon:**

इति रामचन्द्रकृतं कुण्डलक्षणं समाप्तम् ॥

---

No. 14179 कार्तवीर्यार्जुनयन्त्रोद्धारः.

KĀRTAVĪRYĀRJUNAYANTRODDHĀRAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 55*a* of the MS. described under No. 2902.

Complete.

Similar to the work described under No. 7791 ante. This Kārtavīryārjunamantra is considered to be efficacious in the accomplishment of one's desires.

**Beginning:**

आदौ चतुर्दलं पद्मं लिख्यादष्टदलं बहिः ।
तद्बहिः षोडशदलं तद् द्वात्रिंशद् दलं बहिः ॥
कर्णिकायां न्यसेद्बीजं कार्तवीर्यस्य भूपतेः ।
वेदादिनतिमध्यस्था साध्याढ्येन समायुतम् ॥

**End:**

तद्यन्त्रं कालसंस्थानाद्ध्यायन्त्रं प्रसूतये ।
राजाभिषेको जयति शत्रुदिक्ष्वत्र वाजिना ॥
त्रैलोक्यानि समा येन रक्षयेत्तु समाहितः ।
बहूनां किं प्रयोगेण यन्त्रमेतदनुत्तमम् ॥
सर्वकाममवाप्नोति कुर्यान्मन्त्री समाहितः ।

**Colophon:**

इति कार्तवीर्यार्जुनयन्त्रोद्धारस्समाहितः ॥

---

No. **14180.** सीतारामचक्रम्

SĪTĀRĀMACAKRAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 55*b* of the MS. described under No. 2904, wherein this was omitted to be included in the list of other works.

Incomplete.

Stanzas considered useful in making certain predictions based upon the names of Rāma, Sītā and others (taken from the Rāmāyaṇa) enclosed in a particular diagram.

**Beginning and End:**

स्थानभ्रष्टस्य रामस्य सीताया दुःखमेव च ।
लक्ष्मणः कार्यसिद्धिं च सर्वलाभो विभीषणः ॥
मरणं कुम्भकर्णस्य रावणस्य कुलक्षयम् ।
अङ्गदेन ध्रुवं राज्यं सुग्रीवे बन्धुदर्शनम् ॥
इन्द्रजितेन कल्याणं कार्यनाशेन शूलिनाम् ।
धनलाभो हनूमांश्च जी(दी)र्घमायुश्च जाम्बवान् ॥
नारदः कलहश्चैव भरतः कार्यसिद्धिदः ।
कैकेयः कार्यनाशाय गुहेन प्रियदर्शनम् ॥
पञ्चरेखाङ्कितं चक्रं तिर्यग्रेखास्तु पञ्चमम् ।
भवेयुः कोष्ठकादीनामीशादि गणनं भवेत् ॥

## No. 14181. पञ्चीकरणम्.
## PAÑCIKARAṆAM.

Size, 8 × 1⅜ inches. Pages, 2. Lines, 9 on a page.

Begins on fol. 90a of the MS. described under No. 2902.

Incomplete.

By Śaṅkarācarya. Same work as that described under No. 4635 ante in the beginning but differs considerably towards the end.

Explains also the various states of consciousness such as wakefulness, dream, sleep, and samadhi in relation to the Praṇava and enjoins the meditation of the Brahman.

**Beginning:**

ओम् । पञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सर्वं विराडित्युच्यते । एतत्स्थूलशरीरमात्मनः इन्द्रियैरर्थोपलब्धिर्जागरितम् । तदुभयाभिमान्यात्मा विश्वः एतत् अकारः । अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यं च सप्तदशक लिङ्गं भौतिकं हिरण्यगर्भ इत्युच्यते । एतत्सूक्ष्मशरीरमात्मनः करणेषु उपसंहृतेषु जागर्ति । तत्संस्कारजप्रत्ययः सविषयः स्वप्नः । तदुभयाभिमान्यात्मा तैजसः एतत्त्रयमुकारः । शरीरद्वयकारणमात्माज्ञानं साभासमव्याकृतमित्युच्यते ।

**End:**

विज्ञानं प्रज्ञानं ब्रह्म ओं ब्रह्म ज्योतिरहं इति निर्गुणं द्वापञ्चशतं जपेत् । सगुणं द्वासहस्रं जपेत् ॥

---

## No. 14182. गण्डान्तशान्तिमन्त्रः.
## GAṆḌANTAŚANTIMANTRAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 21a of the MS. described under No. 2840.

Incomplete.

Gives the Vedic Mantras to be repeated at the time of performing certain pacificatory ceremonies for averting the evils due to certain events occurring during inauspicious periods of time called Gaṇḍānta.

**Beginning:**

समाप सोमम्, पूषा गा इत्येतस्या ऋचः भरद्वाज ऋषिः, गायत्री छन्दः, पूषा देवता । पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः । पूषा वाजं सनोतु नः । अश्विना यज्व रीरिष इत्येतस्या ऋचः मधुच्छन्दा ऋषिः,

गायत्री छन्दः, (अश्विनौ)देवता । अश्विना यज्व रीरिषो द्रवत्पाणी शुभस्पती । पुरूभुजा च नस्यतम् ।

**End:**

आपो हि ष्ठा एतोन्विन्द्रमृतं च हिरण्यवर्णाः, बलिस्याः, सहस्रशीर्षा, पवमानः सु, तच्छं योरिति । तच्छं योः शंयुर्गायत्री.

---

No. **14183**. त्र्यम्बककल्पः.

TRYAMBAKAKALPAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 2840.

Complete.

Similar to the work described under No. 7863 ante.

**Beginning:**

अस्य त्रियम्बकमन्त्रस्य वसिष्ठ ऋषिः, अनुष्टुप्छन्दः, मृत्युञ्जयत्रियम्बकरुद्रो देवता, देवदेव्यौ प्रणवौ बीजशक्ती, रं बीजं, यं कीलकं, शुक्लवर्णम् । (अनुदात्तस्वरः ।) यजुर्वेदस्वरूपं, गार्हपत्यस्थानं, समस्तशत्रुसमस्तव्याधिपरिहारार्थे जपे विनियोगः ।

* * * *

त्वावतस्त्वद्व्रतप्राणः त्वच्चित्तोऽहं सदा मृड ।
इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्रियम्बकम् ॥

**End:**

. . . . . . शवर्णे रविसर्गवर्णासरत्कार्णिकां
किञ्जल्कालिखितास्व(रं) भतिदला प्रारब्धवर्गाष्टकम् ? ।
क्षाबिम्बेण . . . . . जाश्राशासुसंवेष्टितं
वर्णाब्जं शिरसि स्मरेद्विषगतप्रध्वंसि मृत्युञ्जयम् ? ॥

**Colophon:**

इति त्रियम्बककल्पस्समाप्तः ॥

---

No. **14184**. रजस्वलाशान्तिः.

RAJASVALĀŚĀNTIḤ.

Pages, 3. Lines, 3 on a page.

Begins on fol. 90*b* of the MS. described under No. 3232.

Incomplete.

Similar to the work described under No. 3380 ante.

**Beginning:**

रजसि प्रथमे स्त्रीणां शान्तिं वक्ष्यामि शौनक ।
तिथिलग्नर्क्षयोगेभ्यो लग्नाच्च ग्रहसप्तमे ॥
ग्रहेभ्यो दुःस्थितेभ्यश्च तत्तद्दोषहराय च ।
अघमर्षादिलोभार्थं (?) दम्पत्योरभिवृद्धये ॥

**End:**

होमार्थं च जपार्थं च वरयेदृत्विजो बहून् ।
यजमानो द्विजैस्सार्धं शान्तिहोमं समाचरेत् ॥
गृहादीशानदिग्भागे देवतायतनेऽपि वा ।
द्रोणप्रमाणकैर्व्रीहिधान्यराशित्रयं भवेत् ॥
. . . . . . . . वस्त्रैश्च परिवेष्टितम् ।
कुम्भैश्च तीर्थसलिलैः.

---

No. **14185**. इतिहासोपनिषद्.
ITIHĀSŌPANIṢAD.

*Pages*, 10. Lines, 9 on a page.

Begins on fol. 15*a* of the MS. described under No. 3521, wherein this was mentioned as Itihāsa in the list of other works.

**Complete.**

Same work as that described under No. 298 ante.

---

No. **14186**. सोमोत्पत्तिः.
SŌMŌTPATTIḤ.

**Pages**, 3. **Lines**, 9 on a page.

**Begins** on fol. 20*b* of the MS. described under No. 3521, wherein this was omitted to be included in the list of other works.

**Complete.**

Same work as that described under No. 2592 ante.

---

No. **14187**. रुद्रप्रश्नः.
RUDRAPRAŚNAḤ.

**Pages**, 2. **Lines**, 9 on a page.

**Begins** on fol. 31*a* of the MS. described under No. 3521.

Contains the Anuvākas 1 and 2 complete and 3 incomplete in the Namaka.

Same work as that described under Nos. 118 and 120 ante.

---

No. **14188**. वरमङ्गलाष्टकम्.
VARAMAṄGALĀṢṬAKAM.

**Pages**, 4. **Lines**, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 3521.

Complete.

Same work as that described under No. 11333 ante.

---

No. 14189. वट्वनुग्रहाष्टकम्.

VAṬVANUGRAHĀṢṬAKAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 33*b* of the MS. described under No. 3521, wherein this was included under Maṅgalāśāsana in the list of other works.

Complete.

Eight stanzas pronouncing benedictions on a bachelor to the effect that he should live long, get fame and become learned.

**Beginning:**

आदौ गणेशस्तदनु त्वया(यं)भूस्ततो गिरिशस्तदनन्तरं हरिः ।
एते सुरास्सौख्यकरा दिशन्तु वटोश्चिरायुश्शुभकीर्तिविद्याः ॥

**End:**

ताम्बूलगन्धाक्षतपुष्पधूपदीपाङ्कुराशीर्वचनानि यानि ।
पुण्यानि वाक्यानि दिशन्तु तानि वटोश्चिरायुश्शुभकीर्तिविद्याः ॥

---

No. 14190. पुनराधानम्.

PUNARĀDHĀNAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 34*b* of the MS. described under No. 3521, wherein this was omitted to be included in the list of other works.

Incomplete.

Similar to the work described under No. 3369 ante.

**Beginning:**

अथ पुनराधानं व्याख्यास्यामः—

आपस्तम्बानुसारेण कर्ता होमातीतप्रायश्चित्तं कृत्वा ततः होमद्रव्याणि ब्राह्मणाय दत्वा शुचिर्भूत्वा बध्वा दक्षिणत आसीनः अतिक्रमणोपासनाग्निं पुनस्सन्धास्य इति सङ्कल्प्य श्रोत्रियागारादग्निमाहृत्यायतने विधिनाग्निं प्रतिष्ठाप्य ।

**End:**

उद्बुध्यस्वाग्न उदुत्तममुद्वयम्.

Fol. 35*a* contains Rudravidhāna.

No. 14191. उदकशान्तिमन्त्रः.
UDAKAŚANTIMANTRAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 993.

Complete.

Same work as that described under No. 3573 ante.

---

No. 14192. उदकशान्तिप्रयोगः.
UDAKAŚANTIPRAYOGAḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 4a of the MS. described under No. 993, which was omitted to be included in the list of other works.

Incomplete.

Similar to the work described under No. 3574 ante.

**Beginning:**

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः ॥

* * * *

अद्भिरभ्युक्ष्य शकलं निरस्याप उपस्पृश्य पात्रसादनादिप्रोक्षणान्तं कृत्वा ।

**End:**

यातुधाना हेती रक्षांसि प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधाम्ययम्.

---

No. 14193. श्रावणहोमः.
ŚRĀVAṆAHŌMAḤ.

Pages, 7. Lines, 9 on a page.

Begins on fol. 20a of the MS. described under No. 239.

Complete.

On the performance of offerings to the sacred fire on the Upākarma day as a preliminary ceremony to the commencement of the study of the Vēda.

**Beginning:**

पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ।
श्रावण्यां बह्वृचाः कुर्युः ग्रहसङ्क्रान्तिवर्जिताः ॥

श्रावण्यां पौर्णमास्यामाचार्यश्शिष्यैस्सहितः प्राणानायम्य एवं विशिष्टेऽभ्युदये शुभे मुहूर्ते अध्यायोपाकर्म करिष्य इति सङ्कल्प्य नद्यादिपुण्योदकेषु स्नात्वा सर्वे निवीतिनो भूत्वा प्रजापतिं सोममग्निं विश्वान् देवान् सांहितीर्देवता उपनिषदो याज्ञिकीर्देवता उपनिषदो वारुणीर्देवता उपनिषदो ब्रह्माणं स्वयम्भुवं सदसस्पतिं चे(ति) नव ऋषीन् षोडशोपचारैस्तण्डुलैरभ्यर्च्य ।

**End:**

एतत्कर्मणः कर्मसमृद्ध्यर्थं जयादिहोमं करिष्ये—चित्तं च स्वाहा—चित्तायेदम् । जयादिब्रह्मविसर्जनान्ते नान्दीश्राद्धं कुर्यात् ॥

**Colophon:**

इति श्रावणहोमः ॥

---

## No. 14194 नान्दीप्रयोगः.

## NĀNDĪPRAYŌGAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 28a of the MS. described under No. 239.

Incomplete.

On details connected with the performance of a ceremony called Nāndī on marriage and other auspicious occasions.

**Beginning:**

नान्दीमुखे (खं) पिता कुर्यात्पुत्रीपुत्रविवाहयोः ।

उत्तरेषु विवाहेषु स्वयं कुर्यात्तु नान्दिकम् ॥ इति ।

अस्यां शुभतिथौ तत्तत्कर्माङ्गभूताभ्युदयिकं करिष्ये इति सङ्कल्प्य तत्र नान्दीप्रपितामहीपितामहीमातरः काश्यपगोत्रा नान्दीमुखाः नान्दी प्रपितामहपितामहपितरः काश्यपगोत्रा नान्दीमुखा उभाभ्यामुभाभ्यां सत्यवसुसंज्ञिका विश्वे देवाश्च षोडशोपचारैः सम्पूज्य पूजानन्तरं देवतानुमोदनार्थमिडावाचनं करिष्ये ।

**End:**

नान्दीदेवताश्शोभनदेवता युग्मास्समुच्चयाः अस्यां शोभनवेदिका(या)मागत्य सर्वास्सन्निहितास्सत्यः मामनुगृह्णन्तु ।

त्रयस्ते पितरः प्रोक्ताः चत्वारो लेपभाजनाः ।

नान्दीमुखाः . . . . . ससमादुपरि स्थिताः ॥

अनस्मद्वृद्धशब्दाश्च अपुत्राश्च समोत्रिणः ।

No. 14195. नवग्रहपूजाहोमादिः.
NAVAGRAHAPŪJAHOMĀDIḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 23b of the MS. described under No. 239.

Complete.

Similar to the work described under No. 3644 ante.

**Beginning:**

पृथिव्या मेरुपृष्ठ ऋषिः, कूर्मो देवता, सुतलं छन्दः, आसने विनियोगः । प्रणवस्य परब्रह्म ऋषिः, परमात्मा देवता, देवी गायत्री छन्दः, प्राणायामे विनियोगः । प्राणायामं कृत्वा एवंगुणविशेषणविशिष्टायां शुभतिथौ यजमानस्य अमुकगोत्रे अमुकनक्षत्रे अमुकराशौ जातस्य यज्ञेश्वरनामधेयस्य जन्मलग्नापेक्षया दुष्टारिष्टपरिहारद्वारा शुभफलप्राप्त्यर्थमादित्यादिनवग्रहदेवताप्रीत्यर्थमधिदेवताप्रत्यधिदेवतासहितं समिदाज्यचरुभिर्यथासङ्ख्याकं एभिर्ब्राह्मणैर्ग्रहार्चनपुरस्सरं नवग्रहमु(म)खं कारयिष्ये। तत्तद्ग्रहदेवताप्रीत्यर्थमर्चनादिजपहोमार्थ(दि) मदर्थं भवन्तः कुर्वन्त्विति ब्राह्मणान् वरयिष्ये ।

**End:**

तत्तद्ग्रहसमिधः ब्राह्मणानां दद्यात् । अधिदेवताप्रत्यधिदेवतासहितं समिच्चर्वाज्याहुतीर्हुत्वा प्रधानदर्व्या इन्द्रादिदिक्पालकदुर्गागणपतिदेवतादि यथावदाज्यं जुहुयात् । ततः हव्यवाहमभिमातिषाहमिति स्विष्टकृद्धोमं हुत्वा समिधमिध्मसन्नहनं चाग्नौ प्रहृत्य जयादि ब्रह्मविसर्जनान्तं कृत्वाराधनग्रहदेवतार्थं हुतशेषं चरुं समर्प्य पुष्पाञ्जलिं दत्वा प्रदक्षिणनमस्कारं कृत्वा ब्राह्मणाय दक्षिणां दद्यात् ॥

---

No. 14196. प्रयोगपद्धतिः.
PRAYOGAPADDHATIḤ.

Pages, 13. Lines, 9 on a page.

Begins on fol. 27a of the MS. described under No. 239, wherein this has been omitted to be included in the list of other works.

Wants the first two stanzas and the end.

Same work as that described under R. No. 1709 of the Triennial Catalogue of Sanskrit MSS., Vol. II, Part I-C. By Singabhaṭṭa.

---

No. 14197. पुनस्सन्धानम्.
PUNASSANDHĀNAM.

Pages, 5. Lines, 9 on a page.

Begins on fol. 32*b* of the MS. described under No. 239.

Complete.

Similar to the work described under No. 3691 ante.

**Beginning:**

पूर्वेद्युरुपोष्यापरेद्युः प्रातस्स्नात्वा शुचिर्भूत्वा नित्यकर्मादिकं कृत्वा नमस्सदसे नम इति मन्त्रमुच्चार्य सर्वेभ्यो महाजनेभ्यो नमः अशेषे हे परिषत् भवत्पादमूले मया समर्पितां परिषद्दक्षिणां स्वीकृत्य मदीयां विज्ञापनामवधार्यावयोः विच्छिन्नस्यौपासनाग्नेः पुनस्सन्धानयोग्यतासिद्धिरस्त्विति अनुगृहाण । पुनस्सन्धानयोग्यतासिद्धिरस्तु । होमातीतकालप्रायश्चित्तार्थमिदमाग्नेयं हिरण्यं ब्राह्मणाय संप्रददे न मम । एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ विच्छिन्नस्यौपासनाग्नेः पुनस्सन्धानाख्यं कर्म करिष्य इति सङ्कल्प्याग्निं प्रतिष्ठाप्य ।

**End:**

श्रीपरमेश्वरप्रीत्यर्थं पूर्वेद्युस्सायमद्य प्रातरौपासनहोमं तण्डुलैर्होष्ये । औपासनं कुर्यात् ॥

**Colophon:**

इति पुनस्सन्धानं समाप्तम् ॥

---

## No. 14198. भगवद्गीता.
## BHAGAVADGITĀ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 36*b* of the MS. described under No. 239.

Contains the 15th Adhyāya only.

Same work as that described under No. 1992 ante.

---

## No. 14199. चन्द्रशेखराष्टकम्.
## CANDRAŚEKHARĀṢṬAKAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 37*a* of the MS. described under No. 239 wherein this has been omitted to be included in the list of other works.

Complete.

Same work as that described under R. No. 824 (*m*) of the Triennial Catalogue of MSS., Vol. I, Part I-A.

---

## No. 14200. मार्कण्डेयस्तोत्रम्.
## MĀRKAṆḌĒYASTŌTRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 37*b* of the MS. described under No. 239, wherein this has been omitted to be included in the list of other works.

Almost complete.

Same work as that described under R. No. 324 (*j*) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A.

---

No. **14201.** सामवेदसंहिता ऋक्पाठः.
SĀMAVEDASAṀHITĀ ṚKPĀṬHAḤ.

Pages, 17. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 3511, wherein this work appears under the name Āgnēyarcah (Sāmavēda) in the list of other works.

Contains the first Adhyāya in the Āgnēyasāman.

Same work as that described under No. 42 ante.

Fol. 43*b* contains some Ṛgvēdasūktas, etc.

---

No. **14202.** दिक्पालनमस्कारः.
DIKPĀLANAMASKĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 5537, wherein this work was omitted to be included in the list of other works.

Complete.

Deals with the worship of the guardian deities held to be presiding over the universe at the eight cardinal points.

**Beginning:**

इन्द्राय नमः, इन्द्रासनाय नमः, इन्द्रमूर्तयेनमः ; आग्नेयाय नमः, अग्न्यासनाय नमः, अग्निमूर्तये नमः ; यमाय नमः, यमासनाय नमः, यममूर्तये नमः ।

**End:**

कुबेराय नमः, कुबेरासनाय नमः, कुबेरमूर्तये नमः ; ईशान्या(ना)य नमः, ईशानासनाय नमः, ईशानमूर्तये नमः ॥

---

No. **14203.** नवग्रहनमस्कारः.
NAVAGRAHANAMASKĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 43*b* of the MS. described under No. 5537, wherein this work was omitted to be included in the list of other works.

Complete.

Deals with the propitiatory worship of the presiding deities of the 9 Grahâs or planets.

**Beginning:**

सूर्याय नमः, सूर्याति(धि)देवताय(यै) नमः ; चन्द्राय नमः, चन्द्राति(धि)-देवताय(यै) नमः ; अङ्गारकाय नमः, अङ्गारकाति(धि)देवताय(य) नमः, बुधाय नमः, बुधाति(धि)देवताय(यै) नमः ।

**End:**

शनैश्चराय नमः, शनिश्चति(शन्यधि)देवताय(यै) नमः ; राहुआय(हवे) नमः, राहुआति(ह्वधि)देवताय(यै) नमः ; केताय(तवे) नमः, केतादि(त्वधि) देवताय(यै) नमः ॥

---

## No. 14204. श्रीसूक्तजपः.

## ŚRISŪKTAJAPAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 30a of the MS. described under No. 3645.

Foll. 27 to 29 contain some Kanarese verses and Snanamantra.

Wants the beginning and the end.

Same work as that described under No. 17 ante.

Fol. 31b contains sixth stanza of the first Adhyaya in Bhagavadgitâ.

---

## No. 14205. बिन्दुद्वादशीव्रतकल्पः.

## BINDUDVĀDAŚĪVRATAKALPAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 35 of the MS. described under No. 1014.

Incomplete.

Similar to the work described under No. 8383 ante.

**Beginning:**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम समस्तपापक्षयार्थं पुत्रपौत्राभिवृद्ध्यर्थं मध्या . . . . यनिष्ठत्वर्थमिह लोके सौभाग्यपरम्पराबाप्त्यर्थं परलोके वैकुण्ठप्राप्त्यर्थं धर्मार्थकाममोक्षचतुर्विधफलावाप्त्यर्थं भविष्योत्तरपुराणोक्तबिन्दुद्वादशीव्रतोद्यापनकल्पोक्तसम्पूर्णसकलफलावाप्त्यर्थमनाद्यविद्यावासनया प्रवर्तमानेऽस्मिन् संसारचक्रे.

**End:**

श्रीलक्ष्मीनारायणमुद्दिश्य श्रीलक्ष्मीनारायणप्रीत्यर्थं बिन्दुद्वादशीव्रतम्,

23621

No. 14206. आग्रयणस्थालीपाकः

ĀGRAYAṆASTHĀLĪPĀKAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 4a of the MS. described under No. 1014, wherein this work was omitted to be included in the list of other works.

Incomplete.

On the performance of a fire-offering on a new moon or full-moon day of the autumn season after the harvest and before cooking the newly harvested grain for food.

**Beginning:**

आग्रयणम्—

शरत्काले अमावास्यायां पौर्णमास्यां वा औपासनाग्निं प्रतिष्ठाप्य प्राणानायम्य नवान्नप्राशनार्थं नवैर्व्रीहिभिराग्रयणं करिष्य इति सङ्कल्प्य, तत्र इन्द्राग्नी विश्वे देवा द्यावापृथिवी प्रधानदेवताः स्विष्टकृत् तदङ्गदेवता व्रीहिमयं चरुद्रव्यमिति सङ्कल्प्य पत्न्यवहन्ति चरुं श्रपयित्वा ।

**End:**

यत्र यथा न पतति तथा उद्धियते ।

No. 14207. महान्यासः.

MAHĀNYĀSAḤ.

Pages, 5. Lines, 8 on a page. Character, Nandināgari.

Begins on fol. 7a of the MS. described under No. 2871.

Complete.

Same work as that described under No. 3751 ante, wherein see for the Beginning.

**End:**

पापक्षयाधिव्याधिविमोचनार्थी जीवितार्थी च कुर्यात् । एवं कुर्वन् सिद्धिमवाप्नोति । आचार्येभ्यो गां दक्षिणां दद्यात् । जितविभूषितवृषभैकादश (?) दद्यात् । तदलाभे एकां गां दद्यात् । एकादश ब्राह्मणान् भोजयेत् । ब्राह्मणेभ्यो दक्षिणां दद्यादित्याह भगवान् बोधायनः ॥

No. 14208. श्रीशैलसङ्कल्पः.

ŚRĪŚAILASAṄKALPAḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 1a of the MS. described under No. 8722.

Incomplete.

Same work as that described under No. 3831 ante but with slight difference here and there.

**Beginning:**

अस्य श्रीमहादिदेवस्य भगवतः सच्चिदानन्दविग्रहस्य परब्रह्मणः सकल-जगदुपादानभूतविरा(ड)ध्यासादिसद्विलक्षणप्रपञ्चबाह्याभ्य(न्त)रपरिपूर्णस्वरूपस्य नित्यनिरतिशयानन्दकन्दलितस्य श्रीशैलशिखरसिंहासनमध्ये अध्यासीनस्य ।

* * * *

अस्य महेश्वरस्य विवाहसमये संवत्सरायनऋतुमासपक्षतिथिवारनक्षत्रयोग-करणान्विते शिवतिथौ अस्य देवदेवस्य लीलाविवाहमहोत्सवार्थकन्यादानं करिष्ये । ज्ञातमानं भवति ।

**End:**

भक्तमहेश्वरप्रसादप्राणलिङ्गशरणैक्यषट्स्थलवीर(मा)हेश्वराचारनिश्चलव्रत-स्ता(स्था)नां रेवणसिद्ध . . . . रामपण्डिताराध्यचतुर्मठचतुर्गुरुचतुराचार्य ।

---

## No. 14209. शैवश्राद्धप्रयोगः
## ŚAIVAŚRĀDDHAPRAYŌGAḤ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 8*a* of the MS. described under No. 8722.

Incomplete.

On the procedure for the performance of the Śrāddha ceremony by the Śaivites.

**Beginning:**

अथ पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शिवतिथौ अस्मत्पितृमाचि(सि)का-राधननन्दिमहाकालसंज्ञस(नां) विश्वेषां देवानां स्थान(आ)हवनीयार्थे क्षणं दत्वा भवद्भिः क्षणप्रसाद(:)करणीयः । अस्मत्पितृपितामहप्रपितामहानां गोत्राणां शर्मणां पादार्चनं कृत्वा नन्दिमहाकालसंज्ञकविश्वेश्वरमहेश्वरसदाशिवस्वरूपाणां स्थानआवाह(हव)नीयार्थे क्षणं दत्वा ।

**End:**

एकरादिति वीरमाहेश्वरदेवताभ्यो नमः । कर्पूरदीपाराधनं समर्पयामि । यथासुखं जुषध्वम् । सर्वान् पदार्थम(न्) ಅಂ ತ್ರಿತೀರ್ಥ್ವಾಂಶ ಕಂಪ್ರುಯಜ್ಞ ಖ सत्यं सत्येन परिषिञ्चयामि । अमृतमस्तु अमृतोपस्तरणं स्वाहा ।

No. 14210. आपस्तम्बगृह्यप्रयोगः.
ĀPASTAMBAGṚHYAPRAYŌGAḤ.

Pages, 56. Lines, 5 on a page.
Begins on fol. 1a of the MS. described under No. 3440.
Incomplete
On the conduct of the house-hold rites and ceremonies according to the school of the Āpastamba.

**Beginning:**

अथ गार्ह्याणि कर्माणि उदगयनपूर्वपक्षाहःपुण्याहेषु कार्याणि यज्ञोपवीति(ना) प्रदक्षिणम् ।

* * * * *

स्थण्डिलं कल्पयित्वा प्राचीरुदकसंस्थाः उदीचीः प्राक्संस्थीस्तत्र तिस्रो रेखा लिखित्वाद्भिरवोक्ष्य शेषमुत्सृज्य भूर्भुवस्सुवरोमित्यग्निं प्रतिष्ठाप्य ।

**End:**

वैश्वदेवं करिष्य इति सङ्कल्प्यौपासने पचने वाग्नौ . . . स्वाहेति षड्भिः प्रतिमन्त्रं ब्रह्महस्तेन जुहुयादुत्तरतः उल्लेखास्तस्य हविष्यमुभयतः परिषेचनं बलीनाम्.

---

No. 14211. रामगद्यम्.
RAMAGADYAM.

Pages, 3. Lines, 5 on a page.
Begins on fol. 41a of the MS. described under No. 2818 wherein this work has been omitted to be included in the list of other works.
Wants the beginning.
A eulogy on God Rāma by describing him by means of different signifying epithets strung in a kind of rythmic prose.

**Beginning:**

देवकी(वादि) सकलसुरवरमणिमकुट

* * * *

रघुकुलतिलक, सूर्यवंशप्रदीप, [जनकरनिकरजनकराजस्य] जानकीमत्स्या (नस्स)रोराजहंस, विश्वामित्रयज्ञपरिपालन, ताटकामहाबलप्राणापहार, अहल्यामोक्षपादारविन्द, मिथिलराजयज्ञदीक्षितस्यदर्शन(सन्दर्शित)ईश्वरप्रभावमहाकोदण्डभग्न ।

**End:**

भरताग्रज धर्मपरिपालन शताश्वमेधयज्ञदीक्षित[स्य] भरतशत्रुघ्नसेवितादरसीतापते [सौन्दर्य] श्रीरामचन्द्रपाद नमस्ते नमस्ते ॥

## No. 14212. आतुरसन्न्यासविधिः.
## ĀTURASANNYĀSAVIDHIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 10a of the MS. described under No. 1234.

Wants the beginning.

Complete.

Similar to the work described under No. 3542 ante.

**Beginning:**

वस्सुवरोम् मया सन्न्यस्तं स्वाहेति द्वितीयं पिबेत् । अभयं सर्वभूतेभ्यो मत्तः स्वाहेति तृतीयं पिबेत् । ततोऽन्यत्तोयमञ्जलिना पूर्णमादाय प्रागादिदि . . . . . . . . . . भूस्सावित्रीं प्रवेशयामि । ओं भुवः सावित्रीं प्रवेशयामि ।

**End:**

या ते अग्ने . . . त्य एहीत्यग्निमात्मनि समारोप्य आतुरस्सन्न्यासं कुर्यात् ॥

---

## No. 14213. यतिसंस्कारप्रयोगः.
## YATISAṀSKĀRAPRAYŌGAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 12a of the MS. described under No. 1234, wherein this work was omitted to be included in the list of other works.

Similar to the work described under No. 3764 ante.

**Beginning:**

सर्वाङ्गवपनपूर्वकं स्नात्वा गृहस्थः शुद्धात्मा यतिसंस्कारमाचरेत् ।

आदौ प्रक्षालयेत् तद्देहं तीर्थतोयैरकल्मषैः।
पौरुषेण च सूक्तेन शङ्खतोयैस्स भक्तिमान् ॥

पञ्चामृतैः स्नापयित्वा प्रणवेन ततः परम् ।
अब्लिङ्गैर्वारुणैर्मन्त्रैर्विष्णुसूक्तेन वै तथा ॥

* * * *

तस्मात् गर्तं भृशं खनित्वा प्रच्छादयेत् । तत्संस्कारदेशे अश्वत्थं बिल्ववृक्षं वा स्थापयेत् ।

**End:**

एवं प्रतिदिनं कुर्यात् । एवं प्रकारेण दशादिनपर्यन्तं तर्पणानि पूजां बलिं च कुर्यात् । एतत्सर्वमुपवीती कुर्यात् ।

---

No. **14214.** यतिपार्वणप्रयोगः.

YATIPĀRVAṆAPRAYŌGAḤ.

Pages, 24. Lines, 5 on a page.

Begins on fol. 15*b* of the **MS.** described under No. 1234, wherein this work was omitted to be included in the list of other works.

Similar to the work described under No. 3763 ante.

**Beginning:**

एकादशदिने देशकालौ सङ्कीर्त्य तिथौ ब्रह्मीभूतस्य पितुः दर्शश्राद्धाधिकारसिद्ध्यर्थं पार्वणश्राद्धं करिष्य इति सङ्कल्प्य पूर्वाश्रमे नामगोत्रा(दि) उच्चार्य विश्वेदेवपूर्वकं स्वशाखोक्तप्रकारेण प्रत्याब्दिकवत् आसमिन्तादिकं सर्वं कुर्यात् । सर्वत्र केशव यदेव नारायण यदेव राम यदेव इति ब्रूयात् । एकादशेऽहनि पार्वणश्राद्धाधिकारसिद्ध्यर्थं पुण्याहवाचनं करिष्य इति सङ्कल्प्य पुण्याहं तदनन्तरं पार्वणं च कुर्यात । द्वादशदिने प्राणायामं कृत्वा ।

**End:**

धाता पुरस्तेति मन्त्रपुष्पम् । धाता पुरस्तादयमुदा—अयनाय विद्यते—पुरुषाधि—नमः—मन्त्रपुष्पं समर्पयामि । यज्ञेन यज्ञमयज-तेत्युद्वासनम्—यज्ञेन यज्ञमय—देवाः—पुरुषाधि—नमः—नमस्कारं समर्पयामि ॥

---

No. **14215.** अपरप्रयोगः.

APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, 7¾ × 1¾ inches. Pages, 90. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Deals with the procedure relating to the performance of funeral rites according to the school of Āpastamba.

**Beginning:**

अयातः पैतृमेधिकं व्याख्यास्यामः . . . . . . कालं पुरुषं स्नापयित्वा शुचौ स . . . . (गो)मयोपलिप्तं निधाय गोत्रनाम सङ्कीर्त्य . . . .

. प्राणोत्क्रमणसिद्ध्यर्थमुत्क्रा(न्तिगोदानं क)रिष्य इति सङ्कल्प्य गन्धपुष्पाक्षतै. . . . . . . . क्रान्तौ प्रवृत्तस्य सुखोत्क्रमण . . तुभ्यं गां सम्प्रय-च्छामि इमामुत्क्रान्तिसंज्ञिकाम् । . . . . दत्वा तस्य दक्षिणे कर्णे जपति—आयुषः प्राणं सन्तनु । प्राणादपानं सन्तनु ।

**End:**

ते अस्मिन् यज्ञे समवयन्ताम् । दक्षिणा प्रागग्रैर्दर्भैरग्निं परिस्तीर्य उत्तरेणाग्निं दर्भान् संस्तीर्य तेष्वेव पात्राणि प्रयुनक्ति । अग्नेर्दक्षिणतः . . . . -र्भेषु दर्भेषु एकोद्दिष्टवत् पात्राणि.

---

No. **14216.** वश्यप्रयोगः.

VAŚYAPRAYŌGAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 28*a* of the MS. described under No. 430, wherein this is mentioned under the name Bhartṛvaśyādiprayōga.

Contains the following :—

(१) आचार्यभिक्षाप्रयोगः.

(२) शत्रुवश्यप्रयोगः.

(३) भार्यापुरुषान्तरसंयोगशङ्कानिवृत्तिप्रयोगः.

(४) क्रयविक्रयलाभार्थप्रयोगः.

(५) भर्तृवश्यप्रयोगः.

(६) भृत्यपुनरागमनप्रयोगः.

On the procedure relating to the performance of certain rites considered efficacious in bringing one's enemy into one's power, in bringing the husband under the wife's influence, the servant under the master's control, etc.

**Beginning:**

अथ शिष्टानां मन्त्राणां विनियोगमाह—आचार्यार्थं भिक्षामीति सङ्कल्प्य अन्नमिव ते दृशे भूयासम् । वस्त्रमिव ते दृशे भूयासम् । वित्तमिव ते दृशे भूयासम् । श्रद्धेव ते दृशे भूयासम् ।

* * * *

ऋणादानादिव्यवहारेण जयलक्षणमाह । तस्य प्रयोग —सव्येन पाणिना छत्रं दण्डं चादाय अवजिह्वक निजिह्वकाय त्वा हविषा यजे । ततस्त्वं,

यदहं ब्रवीम्यधरो मत्पद्यस्व लक्ष्मि शर्मा(क्ष्मय)स्वाहा—लक्ष्मयशर्मण इदम्। अवाचीनपाणिना स्वाहाग्नौ जुहोति। परिस्तरणपर्युक्षणमुभयतस्तूष्णीं करोति। शत्रुनाम गृह्णाति । संवाददेशं गत्वा आ ते वाच(ा)मावास्यां दद आसनस्याः हृदयादधि । यत्र यत्र दे (ते) वाङ्निहिता तां तत आददे । तस्सत्वं, यदहं ब्रवीम्यधरो मत्पद्यस्व लक्ष्मयशर्मन् इत्यशत्रुं वश्यं जपेत् ।

**End:**

इन्द्रः पाशेन सिक्त्वा वो मह्यमिद्धशमानय स्वाहा—इन्द्रायेदम् । येन पथा दासाः पलायेरन् तस्मिन् पथि दारुमयाणि इध्मानि निधाय तेष्वेवानग्नौ जुहुयात् । केचिदिध्मानि अग्नौ निधाय तत्राग्नावेव होम इति.

---

No. **14217**. शान्तिप्रयोगः.

ŚĀNTIPRAYOGAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 30*b* of the MS. described under No. 480, wherein this was omitted to be included in the list of other works.

Incomplete.

On certain pacificatory rites for averting the evils attributed by the fall of the fruits of trees upon a person, by the falling of certain birds on a person, etc.

**Beginning:**

अन्यत्कर्म—

यदि वृक्षाद्यद्यन्तरिक्षात्फलमभ्यपतत्तदु वायुरेव । यत्तास्पृक्षत्तनुवं यत्रावास आपो बाधन्तां निरृतिं पराचैः । वृक्षफलेनोपहतं शरीरं प्रक्षालयीत। कर्मान्तरम् । ये पक्षिण पतयन्ति बिभ्यतो निरृतैस्सह । ते मा शिवेन शग्मेन तेजसो दन्तिवर्चसा । पक्षिणा स्पृष्टः स्नायात् ।

**End:**

कपोतदर्शनेऽमात्यानां शरीररेषणेऽन्येषु चाद्भुतोत्पातेष्वमावास्यायां निशायां यत्रापां न शृणुयात् तदग्नेरुपसमाधानाद्याज्यभागान्ते उत्तराहुतीः हुत्वा अद्भुतप्रायश्चित्तम्—रात्राविन्द्रे धनुरादित्ये अगारस्थूणानामङ्कुरारोपजनने गृहे मधुन उपवेशने पाकगृहे अरण्य.

## No. 14218. मृत्युलाङ्गूलमन्त्रः.

## MṚTYULĀṄGŪLAMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 62*b* of the MS. described under No. 430.

Complete.

Same work as that described under No. 6955 ante.

Fol. 63*b* contains a few stanzas on Dharmaśāstra.

---

## No. 14219. द्वादशीव्रतविषयः.

## DVĀDAŚĪVRATAVIṢAYAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 80*a* of the MS. described under No. 430, wherein this appears as Dvādaśarghyam in the list of other works.

A prayer addressed to God Viṣṇu with a view to make one's fast on the Ekadaśī day and the taking of food on the next day as efficacious as it ought to be.

**Beginning** and **End:**

एकादश्यां निराहारं कृत्वाहमपरेऽहनि ।
भोक्ष्यामि देवदेवेश शरणं मे भवाच्युत ।
उपवासं च तां चैव मया भुक्तं जनार्दन ।
तन्न्यूनमधिकं यान्ति सफलं कुरु केशव ॥
इति प्रार्थनं कृत्वा पारणं कुर्यात् ।

---

## No. 14220. जयादिप्रायश्चित्तहोमानुक्रमणिका.

## JAYĀDIPRĀYAŚCITTAHOMĀNUKRAMAṆIKĀ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 102*a* of the MS. described under No. 430, wherein this work was omitted to be included in the list of other works.

Wants the beginning and the end.

Contains a list of the Mantras that have to be repeated during the fire-offerings conducted as expiatory ceremonies for certain irregularities.

**Beginning:**

ऋताषाडृतधामाग्निर्गन्धर्वः सꣳहितो विश्वसामा सूर्यो गन्धर्वः सुषुम्नस्सूर्य-
रश्मिर्भुज्युस्सुपर्णः प्रजापतिर्विश्वकर्मा इषिरो भुवनस्य पते ।

**End:**

अस्कान् द्यौः इति स्कन्नादिदोषप्रायश्चित्तार्थं यन्म आत्मन इति मिन्दा-दोषप्रायश्चित्तार्थं पुनरत्वादित्या इति सर्वप्रायश्चित्तार्थम् ॥

---

No. 14221. अग्निमुखम्.
AGNIMUKHAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 7*b* of the MS. described under No. 950, wherein this work appears as Agnisandhānam in the list of other works.

Incomplete.

Similar to the work described under No. 3510 ante.

**Beginning:**

अथ गार्ह्येषु कर्मसु पुरस्तात्तत्रोपरिष्टात्त . . . . . . . . . . साधारणहोमधर्मा उ(प)दिश्यन्ते । तत्र यथायोगं सभार्यः सदर्भासनः पवित्रपाणिः कृतप्राणायामस्तत्तत्कर्मनाम्ना सङ्कल्प्याथ शुचिः शुचौ देशे सिकताः प्रकीर्य चतुरश्रं स्थण्डिलं कल्पयित्वा प्राचीरुदीचीश्च तिस्रस्तिस्रो रेखा लिखित्वाद्भिरवोक्ष्याग्ने नयेत्यग्निं प्रतिष्ठाप्याग्निं प्रज्वाल्यावोक्षणशेषमुत्सिच्यान्य-दुदकं प्रागुदग्वा निधाय ।

**End:**

आज्यं तु संस्कृत्य सकृद्गृहीत्वा परिस्तृतेऽग्नौ जुहुयादथाश्च ।
एकाहुतिं व्याहृतिभिश्च हुत्वा चतुर्गृहीतेन च सप्तहोता ॥
मनस्पतिं चापि चतुर्गृहीतया अस्मिन् यज्ञेऽपि चतुर्गृहीतम् ।
द्विषड्गृहीतेन च सप्तवत्या ततश्चरुस्तन्तुमती समर्थः ॥

---

No. 14222, दर्शान्नश्राद्धप्रयोगः.
DARŚĀNNAŚRĀDDHAPRAYOGAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 11*a* of the MS. described under No. 950.

Incomplete.

Same work as that described under No. 3634 ante, and with the additional stanza in the beginning as given below

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ॥

समस्तसम्पत् (. . . . . . . . .) स्तवः ॥
आपदन—स्तवः ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमः.

---

## No. 14223. धर्मशास्त्रश्लोकाः.
## DHARMAŚĀSTRAŚLŌKĀḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 950.
Incomplete.
A collection of stanzas taken from Dharmaśāstra works.

**Beginning:**

सन्ध्याया विधिना प्रातः रूपे तिष्ठतु मानुषी ।
सपत्नीकसमारूढा नक्षत्रो यागमाचरेत् (?) ॥

अग्नीत् पूर्ति निशि ज्ञेय(यं)सन्धानं सायमेव तु ।
प्रातः पूर्वं न कर्तव्यं कर्तव्यं सायमाहुतिम् ॥

**End:**

सालग्रामं च चक्राणि पुरुषसूक्तं तथैव च ।
तुलस्यां शङ्खतीर्थानि पश्चैते तीर्थलक्षणम् ॥

---

## No. 14224. पुण्याहवाचनम्.
## PUṆYĀHAVĀCANAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 88*a* of the MS described under No. 3122, wherein this work was omitted to be included in the list of other works.

Incomplete.

Deals with the performance of the ordinary purificatory religious ceremony.

**Beginning:**

(प्रसी)दन्तु भवन्तः । प्रसन्नास्स्मः । शान्तिरस्तु, पुष्टिरस्तु, तुष्टिरस्तु, वृद्धिरस्तु, अविघ्नमस्तु, आयुष्यमस्तु, आरोग्यमस्तु, स्वस्ति शुभं कर्मास्तु, कर्मसमृद्धिरस्तु ।

**End:**

शिवा वनस्पतयस्सन्तु, अहोरात्रे शिवे स्यातामुत्तरे कर्मण्यविघ्नमस्तु, उत्तरोत्तरमहरहरभिवृद्धिरस्तु, उत्तरोत्तराश्शुभाः क्रियास्सम्पद्यन्ताम् । मही . . . . पुरो गा विश्वे देवाश्च प्रीयन्ताम् ॥

---

## No. 14225. मूर्तिध्यानानि. MŪRTIDHYĀNĀNI.

Pages, 14. Lines, 6 on a page.

Begins on fol. 89*a* of the MS. described under No. 3122, wherein this work was omitted to be included in the list of other works.

On the form and manner in which certain deities should be contemplated upon.

**Beginning:**

रविं चतुर्भुजं वापि द्विभुजं पद्मधारिणम् ।
वरदाभयपद्मैश्च चतुर्भुजयुतं तथा ॥
करण्डमुकुटोपेतं प्रभामण्डलमध्यगम् ।
उषा च प्रत्युषा देवी सव्यासव्ये तु संस्थिते ॥
अरुणं त्वग्रतो ध्यात्वा पङ्गुतत्त्वस्वरूपिणम् ।
सप्ताश्वरथमध्यस्थं भास्करं भावयेद्बुधः ॥
ब्रह्माणीं ब्रह्मवद् ध्यायेन्माहेशीमीश्वरोपमाम् ।
कुमारवच्च कौमारीं वैष्णवीं विष्णुवत्तथा ॥

**End:**

अग्निहोत्रध्यानम् —

द्विमुखं चैकहृदयं चतुश्श्रोत्रं द्विनासिकम् ।
आस्यद्वयं च षण्णेत्रं पिङ्गलं सप्तहस्तकम् ॥

हरिहरस्वामिध्यानम् —

अथातस्संप्रवक्ष्यामि शिवकेशवरूपिणम् ।
शिरोदक्षिणपार्श्वे तु जटापटलशोभितम् ।

* * * *

चराचरान्तरात्मानं करुणापूरितेक्षणम् ।
मनोरथप्रदं ध्यायेद् देवं हरिहरात्मकम् ॥

Fol. 96 contains a deed of the gift of a land to a certain person.

## No. 14226. आपस्तम्बधर्मसूत्रम्.
## ĀPASTAMBADHARMASŪTRAM.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 59. Lines, 6 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Gāyatrīsāvitrīsarasvatīkavaca 31*a*, Śravaṇadvādaśīnirṇaya 32*a*.

Complete.

Same work as that described under No. 1215 ante.

---

## No. 14227. गायत्रीसावित्रीसरस्वतीकवचः.
## GĀYATRĪSĀVITRĪSARASVATĪKAVACAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under the previous number.

Complete.

Similar to the work described under No. 6177 ante.

**Beginning:**

अस्य श्रीगायत्रीसावित्रीसरस्वतीकवचस्तोत्रमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, ऋग्यजुस्सामाथर्वाणः छन्दांसि, ब्रह्मत्रयप्रणवस्वरूपी ब्रह्मशक्तिः. गायत्री देवता ओं बीजं, भर्गो देवः शक्तिः, धीमहीति कीलकं, गायत्रीप्रसादसिध्द्यर्थे जपे विनियोगः ।

गायत्री पूर्वतः पातु सावित्री पातु दक्षिणे ।
ब्रह्मसन्ध्या पातु पश्चादुत्तरां मे सरस्वती ॥

**End:**

चतुष्षष्टिकलाविद्याविलासैश्वर्यसिद्धिदम् ।
जपान्ते चैव गायत्र्या गयत्रीकवचं जपेत् ॥
गोब्राह्मणवधान्मित्रद्रोहाद्याखिलपातकैः ।
मुच्यते सर्वपापेभ्यः परं ब्रह्माधिगच्छति ॥

**Colophon:**

इति गायत्रीसावित्रीसरस्वतीकवचं सम्पूर्णम् ॥

---

## No. 14228. श्रवणद्वादशीनिर्णयः.
## ŚRAVAṆADVĀDAŚĪNIRṆAYAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 14226.

Incomplete.

On the conditions that should be satisfied for determining the Śravaṇadvādaśi day.

**Beginning:**

यो वर्णैरिज्यते नित्यैः कर्मभिश्चोदितैर्निजैः ।
तेभ्योऽपवर्गदो यश्च तं नमाम्यद्वयं हरिम् ॥
यत्र सोऽस्तमियाद्भानुः निशि यद्युक्तमिन्दुना ।
तत्रैवोपवसेद्दक्षे नक्षत्रं श्रवणं विना ॥
याः काश्च तिथयस्सर्वाः पुण्या नक्षत्रयोगतः ।
तास्वेव तद्व्रतं कुर्याच्छ्रवणद्वादशीं विना ॥

**End:**

उदयव्यापिनी ग्राह्या श्रवणद्वादशीव्रते ।

श्रवणद्वादशी(व्रत)कल्पे—

आभाकाशितपक्षे तु यत्र श्रवणरेवती ।
तिथिर्विद्धा प्रशस्या स्यात्पूर्वमं तु परित्यजेत् ॥

Then the following stanzas unconnected with the subject are found :—

आदौ मध्येऽवसाने वा यत्र कन्यां व्रजेद्रविः ।
स पक्षः सकलः पूज्यः श्राद्धषोडशिकं प्रति ॥

वृद्धमनुः—

मध्ये वा यदि वाप्यन्ते यत्र कन्यां रविर्व्रजेत् ।
स पक्षः सकलः पूज्यः श्राद्धं तत्र विधीयते ॥
आषाढीमवधिं कृत्वा यः पक्षः पञ्चमो भवेत् ।
तत्र श्राद्धं प्रकुर्वीत कन्यास्थोऽर्को भवेन्न वा ॥

Fol. 32*b*, contains some Smṛtivacanas.

---

No. **14229.** आप्रिया.

ĀPRIYĀ.

Size, 10¼ × 1¼ inches. Pages, 4. Lines, 6 on a page. Character, Telugu.

Begins on fol. 117*a* of the MS. described under No. 3482, wherein this work was omitted to be included in the list of other works.

Incomplete.

Similar to the work described under No. 1153 ante.

**Beginning:**

कर्मण्यस्सुदक्षो युक्तग्रावा जायते देवकामा वौ । वनस्पतेऽवसृजोप देवानग्निर्हविश्शमिता सूदयाति । सेदु होता सत्यतरो यजाति यदा देवानां जनिमानि वेदा वौ । आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैर्न रथं तुरोभः । बर्हिर्न आस्तामदितिस्सुपुत्रा स्वाहा देवा अमृता मादयन्तां वौ ।

अथ कण्वानामाप्रिया—ये—हे सुसमिद्धो न आवह देवाः अग्ने हविष्मते । होतः पावक यक्षि च वौ ।

**End:**

सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन । अग्नये जातवेदसा इ वौ । नराशंस सुषूमतीमं यज्ञमदाभ्यः । कविर्हि मधुहस्त्या वौ.

---

No. **14230.** गोपालकसन्ध्यावन्दनप्रकारः

GŌPĀLAKASANDHYĀVANDANAPRAKĀRAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 119*a* of the MS. described under No. 3482, wherein this work was omitted to be included in the list of other works.

Incomplete.

On the performance of the Tantric Sandhyavandana using the Mantra relating to Gōpāla or Lord Kṛṣṇa.

**Beginning:**

गोपालकसन्ध्यावन्दनप्रकारो लिख्यते--

प्रथमं वैदिकसन्ध्यावन्दनं कृत्वा दक्षिणहस्ततलेन जलमादाय वामकर हृदय(मन्त्रेण)सलिलं निधाय तदङ्गुष्ठविवरनिर्गतजलबिन्दुभिर्दक्षिणकरेण नेत्र-मन्त्रेण शिरसि सम्प्रोक्ष्यावशिष्टमस्त्रमन्त्रेण करेणादाय . . . . . निक्षिप्य पुनरप्येवं चतुः कृत्वोऽभ्यस्य दक्षिणकरेण हृदयमन्त्रेण जलमादाय वामनासा-पुटेनाघ्रायान्तर्ग . . . . . . . प्रक्षाल्य दक्षिणेन निस्सार्य विसृज्याञ्जलिना जल-मादायादित्यमण्डलगताय मारगायत्र्या त्रिरर्घ्यं निवेद्य तदङ्गादीन् न्यसेत् ।

**End:**

गोपीजनाय विद्महे गोपीवल्लभ(ाय)धीमहि । तन्नः कृष्णः प्रचोदयात्—इति गोपालगायत्री । अस्य मूलमन्त्रवदृष्यादिन्यासः । अथ वा मारगायत्री—

कामदेवाय हृत, विद्महे शिरः, पुष्पबाणाय शिखायै, धीमहि कवचं, तन्नोऽनङ्गः प्रचोदयात् नेत्रम् । नारदगायत्री—कृष्णा ऋष्यायाः शिरोललाटनेत्रहृदयदोःपत्सन्ध्यग्रेषु वर्णशो न्यसेत् । अयं मन्त्र एव गायत्रीमन्त्रः.

---

## No. 14231. प्रवराध्यायः.
## PRAVARĀDHYĀYAḤ.

Pages, 51. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 3470.

Complete; as found in the 19th Adhyaya called the Pravaradhyaya in the Dānakāṇḍa of Hēmādri's work.

Deals with the ascertainment of the Pravara or the group of Ṛṣis or sages who formed the ancestors of a family.

**Beginning:**

अथातः प्रवरान् व्याख्यास्यामस्ते यदि न विज्ञायन्ते कुलानि नश्ये रन्यज्ञेष्वप्रवरणाद्यज्ञानप्रवृत्तेरन्यद्विज्ञानात् पूतानि कर्माणि कुलानि पूतानीत्यतो वक्तव्यानीति विज्ञायते । तत्रासगोत्रामुद्वहेयुरसमानप्रवरामसमानपिण्डां मातृतः पञ्चमीं पितृतस्सप्तमीं समानपिण्डां काश्यपा आचक्षन्ते(ते) त्रीनतीत्य मातृतः, पञ्चातीत्य पितृतः इति वासिष्ठाः ।

**End:**

एवमष्टादश गणा उक्ता गोत्रविनिर्णये ।<br>
ऊनपञ्चाशदेवेति केचित्सूत्रकृतो विदुः ॥<br>
यः पठेत्प्रवराध्यायं नित्यं पर्वणि पर्वणि ।<br>
सम्यक् प्रवरविज्ञानाद्ब्रह्मलोके महीयते ॥

**Colophon:**

इति हेमाद्रौ दानकाण्डे प्रवराध्यायो नाम एकोनविंशोऽध्यायः ॥

---

## No. 14232. अष्टवर्गदशाफलादिविवरणम्.
## AṢṬAVARGADAŚĀPHALĀDIVIVARAṆAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 27a of the MS. described under No. 3470, wherein this work was omitted to be included in the list of other works.

Incomplete.

Explains the nature of the fortune of a person consequent on the influence exercised by the nine Grahas or planets during their respective periods.

**Beginning :**

अथातस्सम्प्रवक्ष्यामि शृणु नारद यत्नतः ।
आदित्यभौममन्दानां राहुकेत्वोर्दशान्तरम् ॥
पापग्रहान्तरदशासम्भूता मृत्युनाशनम् ।
अष्टग्रहाणां वर्गस्य बिन्दोः फलनिवारणम् ॥
मन्दसूर्यकुजादीनां दुरिष्टफलनाशनम् ।
सर्वतोभद्रचक्रादिक्रूरवेधोद्भवं फलम् ॥

**End :**

ग्रहाच्छादनवस्त्राणि ग्रहवर्णानि कारयेत् ।
यज्ञोपवीतयुक्तानि प्रत्येकं परिधारयेत् ॥
नवधा फलपुष्पाणि नैवेद्यानि तथैव च ।
तत्तद्वर्णानि धान्यानि गन्धवस्त्रं तथैव च ॥
धूपदीपादिकैर्युक्तं कृत्वा सर्वसुशोभनम् ।
पश्चात्संपूजयेद्भक्त्या स्वैस्स्वैर्मन्त्रैर्नवग्रहान् ॥
चित्रान्नं कारयेत्तत्र फलपुष्पादिकं शुभम् ।

---

## No. 14233. नवग्रहपूजा.
## NAVAGRAHAPŪJĀ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 3470.

Complete; as found in the Śāntiprakaraṇa in Hēmādri work.

On details connected with the worship of the nine Grahas (planets) with a view to propitiate them.

**Beginning :**

अथ ग्रहपूजाविधिः कथ्यते—

त्रैलोक्यदीपकं देवं त्रिगुणात्मत्रयीमयम् ।
स्थापयामि महाभक्त्या भास्करं ग्रहनायकम् ॥

इति सूर्यस्थापनम् । वेदिकामध्ये वर्तुलाकारमण्डले प्राङ्मुखं कलिङ्गदेशजं काश्यपगोत्रजं विशाखानक्षत्रज विश्वामित्रार्षेयं त्रिष्टुपछन्दसं कपिलाग्निकं छन्दोमयहरितसप्ताश्वं ससरज्जुकं पद्मासनं

* * * *

ग्रहमण्डले प्रविष्टमधिदेवता अग्निं प्रत्यधिदेवता रुद्रम् । ओं भूः रविमावाहयामि, ओं भुवः रविमावाहयामि, ओं स्वः रविमावाहयामि ।

**Beginning:**

अथ जातिभ्रंशस्य घटश्राद्धविधिः। तस्य परित्यागनिर्णयमाह पराशरः—

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत्।
द्वापरे कुलमेकं च कर्तारं च कलौ युगे॥

कर्तारं च कलौ युगे इति वाक्येन तस्य बहिष्कारार्थं घटश्राद्धं कुर्यात्। तस्य घटश्राद्धे तस्य परित्यागप्रकारः स्मृतिसङ्ग्रहे—

पतितानां यथाशौचं गर्भभर्तृसुरापिणाम्।
कुलटानां यथा देहद्रोहिण्यां नास्ति संस्कृतिः॥
नाशौचं नोदकं तस्य न कुर्यात्पैतृमेधिकम्।
महापातकसाम्यानि पापानि विविधानि च॥

* * * *

तस्य सङ्कल्पः—

देशकालौ संकीर्त्यामुकगोत्रस्यामुकशर्मणः दुष्कर्मणो जातिभ्रंशस्यामुकस्य सर्वैः बन्धुभिः बहिष्कारणार्थं तस्य स्वबन्धनिर्बाधं कर्तुं तदङ्गतया धर्मशास्त्रविहितप्रकारेण त्रिमूर्तिदेवताकलशपूजादिकं कर्तुं तदन्ते घटस्फोटनं कर्तुं तदादौ घटश्राद्धकर्म करिष्ये—इति सङ्कल्प्य.

दासीं कुम्भं बहिर्ग्रामान्निनयेयुस्सबान्धवाः।
पतितेषु बहिष्कुर्युः सर्वकार्येः शुचैव हि॥

**End:**

द्वादश्यां विष्णुमुद्दिश्य यथा शक्त्या च कारयेत्।
असद्गोलात्परित्यक्तः त्रिवारं वाचयेदथ॥
ब्राह्मणैस्तु परित्यक्तः चास्तुशब्दैस्समुच्चरेत्।
दक्षिणां च यथाशक्त्या दद्याद्विभ्य एव वा॥

**Colophon:**

इति घटश्राद्धविधिः समाप्तः॥

---

No. 14238. उदकक्रिया.

UDAKAKRIYĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 125*a* of the MS. described under No. 14237.

Incomplete.

Deals with the procedure relating to the offering of water during the funeral ceremonies of a person who has not been duly burnt after death.

**Beginning:**

खण्ड(ण्डि)तादिनिमित्तेन नष्टकीकसदेहिनाम् ।
पालाशकैः प्रतिकृतिर्दाहस्तेषां न विद्यते ॥
उदकक्रियैव तेषां तु वक्ष्यमाणप्रकारतः ।
ब्राह्मणैस्सहितः पुण्यनदीं गत्वा विचक्षणः ॥
यथासम्भवमासाद्य शि(तिला)दिद्रव्यसंयुतम् ।
ब्राह्मणानुज्ञया सम्यक् सचेलस्नानमाचरेत् ॥
प्रक्षाल्य पाणिपादौ च ब्रह्मदण्डार्थमेव वा ।
दर्भान् तिलान् हिरण्यं च गृहीत्वा दक्षिणैः(णे)करे ॥
परिषद्दक्षिणां कृत्वा विज्ञाप्य स्वं निमित्तकम् ।
अद्भिः संप्रोक्ष्य गायत्र्या शुद्धमस्फुटितं दृढम् ॥
पाषाणं तत्र निक्षिप्य प्राणसंयमनं तदा ।
केशवाद्यैश्च संस्नाप्य मृज्जलाभ्यां विचक्षणः ॥

**End:**

त्रिरात्राशौचपक्षे तु नवश्राद्धं कथं भवेत् ।
आद्ये त्रीणि द्वितीये द्वे तृतीयें ह्येकमेव च ॥
प्रथमे दिवसे देयात् त्रयः पिण्डमुदाहतः ! ।
द्वितीये चतुरो दद्यात् त्रयः पिण्डा(:) तृतीयके ॥

---

### No. 14239. नागप्रतिष्ठाव्रतम्.
### NĀGAPRATIṢṬHĀVRATAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 125*b* of the MS. described under No. 14237.
Complete.
Similar to the work described under No. 3651 ante.

**Beginning:**

तत्संवत्सरश्रावणशुक्लपञ्चमीमारभ्यान्यां वा शुक्लपञ्चमीमारभ्य पञ्चम्यामुपवासः । यद्वा चतुर्थ्यामेकभुक्तं पञ्चम्यां नक्तं दारुमयं मृण्म(न्म)यं वा नागं पञ्चफणं कृत्वा गन्धैः करवीरशतपत्रजातीपुष्पैर्धूपैरनन्तं वासुकिं शङ्खं पद्मं कम्बलं कर्कोटकमश्वतरं धृतराष्ट्रं शङ्खपालं कालीयं तक्षकं कपिलं च प्रतिमास्तन्नामभिश्शुक्लपञ्चम्यां सम्पूज्य ब्राह्मणान् घृतपायसमोदकैः भोजयेत् ।

**End:**

गव्यक्षीरं मोदकं च भूमौ निवेद्योपस्थाय एवं वदेत्—पुत्र पुत्रामुकमिति । तद्दिने मधुरमश्नीयात् । एवमब्दं विधिना नागमभ्यर्च्य पूर्णेऽब्दे सौवर्णनागं च गां च दद्यात् ॥

---

## No. 14240. नारायणबलिः.

## NĀRĀYAṆABALIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 126*a* of the MS. described under No. 14237.

Complete.

Similar to the work described under No. 3655 ante. The author evidently derives his authority from Smṛtisārāvalī to which he refers.

**Beginning:**

ततो नारायणबलिं च कृत्वा श्राद्धादि सर्वं कुर्यात् । अत्र मूलवचनानि स्मृतिसारावल्यां ज्ञेयानि । अथ पूर्वोक्तपापण्ड्यादीनां बुद्धिपूर्वकात्मघातिनां च नारायणबलिप्रयोगः । एकादश्यां नदीमन्यद्वा तीर्थं गत्वा स्नानादि कृत्वाचम्य प्राणानायम्य देशकालौ स्मृत्वामुकगोत्रस्यामुकशर्मणः आत्महत्यापापण्डित्वादिपापोपशमनद्वारा और्ध्वदेहिकसम्पादनयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्य इति सङ्कल्प्य ।

**End:**

ततः पवित्रपाणिभिर्ब्राह्मणैः कृत्वामुकगोत्रायामुकशर्मणे प्रेताय विष्णुरूपायेदं तिलोदकमुपतिष्ठतामिति वाचयित्वा सकुशतिलाञ्जलीमु(लि उ)दकां(कं) दापयेत् । ततः स्नात्वा गुडशर्करापायसादिभिः स्वजनैस्सहितो भुञ्जीत ॥

**Colophon:**

इत्यौर्ध्वदेहिकपद्धतौ नारायणबलिः ॥

---

## No. 14241. आतुरसन्न्यासविधिः.

## ĀTURASANNYĀSAVIDHIḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 128*a* of the MS. described under No. 14235.

Incomplete.

Similar to the work described under No. 3542 ante. The procedure herein given is laid down by Āṅgirasa.

**Beginning:**

अथाङ्गिरसोक्तमातुरसन्न्यासग्रहणविधिं व्याख्यास्यामः—

[आतुराश्चातुराश्च] आसन्ने सङ्कटे घोरे चोरव्याघ्रादिसंकुले ।
भयं प्राप्तस्य सन्न्यासः कर्तव्यो मुनिरब्रवीत् ॥
आतुराणां तु सन्न्यासे न विधिर्नैव च क्रिया ।
प्रैषमात्रं समुच्चार्य सन्न्यासं तत्र पूरयेत् ॥

एतदत्यातुरविषयम् । आतुरस्य सन्न्यासप्रकारं वक्ष्यामि । व्याध्यादिभिर्बाधितो गृहस्थो वपनपूर्वकं स्नात्वा ब्राह्मणानाहूय तेषां पुरतः सङ्कल्पपूर्वकमातुरसन्न्यासमहं करिष्ये—इति सङ्कल्प्य ।

**End:**

षोडशब्राह्मणानां वा केशवादिनामभिश्चतुर्थ्यन्तैः पाद्यासनवस्त्रादीनि दत्वा सर्वानेतान् प्राङ्मुखानुपवेश्य भोजयेत् । कर्ता पुरुषसूक्तं विष्णुसूक्तानि च.

---

## No. 14242. विघ्नेश्वरगीतम्.
## VIGHNĒSVARAGĪTAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 105*a* of the MS. described under No. 2761.

Contains five stanzas only.

A song of praise on God Vighnēśvara written in all probability after the model of Gopikāgītā.

**Beginning:**

विशदवाससं विस्तृतोरसं विमलतेजसं विद्रुराक्षसम् ।
विगततामसं विष्टरौकसं विभुमुपास्महे विघ्ननायकम् ॥ १ ॥

**End:**

विमतमर्दनं विश्वनायकं वितरणोत्सुकं वारणाननम् ।
विचलितश्रुतिं वीतकल्मषं विभुमुपास्महे विघ्ननायकम् ॥ ५ ॥

---

## No. 14243. कावेरीभुजङ्गः.
## KĀVĒRĪBHUJAṄGAḤ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 106*a* of the MS. described under No. 2761.

Contains ten stanzas only.

A small book of hymns written in the Bhujaṅgaprayāta metre in praise and adoration of the presiding goddess of the river Cauvery.

**Beginning:**

कथं सब्रजन्ये सुरामे सजन्ये प्रसन्ना वदान्ये भवेयुर्वदान्ये ।
सपापस्य मन्ये गतिं त्वाम्ब मन्ये कवेरस्य धन्ये कवेरस्य कन्ये ॥ १ ॥

कृताम्भोधिसङ्गे कृपार्द्रात्त(न्त)रङ्गे जलाक्रान्तरङ्गे जवोद्यत्तरङ्गे ।
नभश्चाम्बिवन्यैभसम्पन्नमन्ये नमस्ते वदान्ये कवेरस्य कन्ये ॥ २ ॥

**End:**

भुजङ्गप्रयाते भुजङ्गप्रयाते प्रबन्धस्ववृत्ते प्रबन्धस्ववृत्ते ।
इहानुग्रहं त्वं विधेह्यम्ब याचे नमस्ते वदान्ये कवेरस्य कन्ये ॥ १० ॥

---

## No. 14244. सन्न्यासिसंस्कारः.
## SANNYĀSISAṀSKĀRAḤ.

Pages, 17. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 8488.

Wants the beginning and the end.

Similar to the work described under No. 3764 ante.

**Beginning:**

. . . . . . चमनं कृत्वा पादौ प्रक्षाल्य . . . . . प्राणानायम्य . . . . . . समस्तपापक्षयार्थं . . . . . . . . . . . . नं करिष्य इति सङ्कल्प्य, तीर्थदेशं गत्वा मृन्मयपात्रद्वयं संपाद्य उदकेन तत्पात्रद्वयं पूरयेत् । दक्षिणहस्तेन एकेन [पाणिना] एकं पात्रमादाय तदुदकार्थमेव अप्सु-जुहुयात् ।

* * * *

सर्वाङ्गवपनपूर्वकं वा स्नात्वा गृहस्थश्शुद्धात्मा यतिसंस्कारमाचरेत् ।

आदौ प्रक्षाल्य तद्देहं तीर्थतोयैरकल्मषैः ।
पौरुषेण च सूक्तेन शङ्खतोयैस्स भक्तिमान् ॥
पञ्चामृतैस्स्नापयित्वा प्रणवेन ततः परम् ।

**End:**

केशवाय नमः—

इदं पाद्यम् । इत्यादि प्रत्येकं पादप्रक्षालनादिकं कृत्वा प्रतिब्राह्मण-पादोदकमेकस्मिन् पात्रे धृत्वा गृहीत्वा देवसन्निधौ निधाय तस्य तीर्थस्य षोडशोपचारान् कृत्वा.

## No. 14245. दत्तहोमप्रयोगः.
## DATTAHŌMAPRAYŌGAH.

Pages, 4. Lines, 5 on a page.

Begins on fol. 10a of the MS. described under No. 8488.

Incomplete.

Slightly different from the work described under No. 3626 ante.

**Beginning:**

दत्तहोम उच्यते ।

दाता निश्चलमना राज्ञे निवेद्य स्वभ्रातृबन्धून् गृहे सम्पूर्य तान् ज्ञापयित्वा इमं विष्णुनामधेयं कुमारममुष्मै गोविन्दशर्मणे पुत्रत्वमापादयामीति तान् सम्यग्विज्ञाप्य ततो दाता ज्योतिर्विदुक्तशुभदिवसे मातापितरौ कुमारेण सह मङ्गलस्नातौ भूत्वा पुण्याहं वाचयित्वा मङ्गलतूर्यवाद्यघोषैः दाता गोमयेनानुलेपितरङ्गवल्ल्यादिविरचितध्वजतोरणालङ्कृतप्रदेशमाविश्य प्राणानायम्य पुत्रदानं करिष्य इति सङ्कल्प्य ।

**End:**

कुमारमङ्क आदायाङ्गादङ्गादिति द्वाभ्यां मूर्धन्यवघ्राणं दक्षिणे कर्णे जपं च कृत्वा स्वकीयहस्तेन पञ्चामृतप्राशनं कारयित्वा स्वपितृनुद्दिश्य [श]शतार्धं पञ्चविंशतिब्राह्मणान् भोजयेत् । एतदसगोत्रविषयम् । सगोत्रश्चेद्दत्ताक्षिकसम्प्रदानमात्रेणैवालम् । असावैहिकामुष्मिककर्मसु औरसाद्विशिष्यते । ब्रह्मवरं दद्यात् - वरेण धेनु-

---

## No. 14246. दत्तमीमांसा.
## DATTAMĪMĀMSĀ.

Pages, 83. Lines, 5 on a page.

Begins on fol. 13a of the MS. described under No. 8488.

Name of the copyist—Sagi Sītāpati from the MS. of Kudanti Sitārāma. Date of copying—10th day of the dark fortnight of the Caitra month in the year Vikrama.

Complete.

Same work as that described under No. 3164 ante. By Nandapaṇḍita.

---

## No 14247. आतुरसन्न्यासविधिः.
## ĀTURASANNYĀSAVIDHIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 57a of the MS. described under No. 8488.

Incomplete.

Similar to the work described under No. 2902 ante.

The procedure herein given is stated to have been laid down by Āṅgirasa.

**Beginning:**

अथाङ्गिरसप्रोक्तमातुरसन्न्यासविधिं व्याख्यास्यामः

. . . . . . . . . . . . . . . . .

प्रेषमात्रं तु सन्न्यास आतुराणां विधीयते ॥

अपां समीपं गत्वावटे(उ)द्धृत्य पात्रे तत्तोयमादाय दक्षिणपाणिनाप्सु जुहोति ।

**End:**

. . . . . ततो गन्धपुष्पाद्यैर्धूपदीपकैः ॥

अन्नं बहुगुणं तत्र पायसाद्यैस्सुसंस्कृतम् ।

निवेदयेद्विष्णुबुध्या साष्टाङ्गं प्रणिपत्य च ॥

---

No. 14248. ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 76a of the MS. described under No. 8488.

Incomplete.

Similar to the work described under No. 13762 ante.

**Beginning:**

त्रिंशद्भागात्मकं लग्नं होरा तस्यार्धमुच्यते ।

लग्नत्रिभागो द्रेक्काणं नवभागो नवांशकः ॥

द्वादशभागो द्वादशांशकः त्रिंशांशस्त्रिंशदंशकः ।

. . . .

कन्यकामृगवृषे मृगादयो मीनकर्क्यलिकर्कटादयः ।

द्रेक्काणम्—

चरे स्वपुत्रनवप(।): स्थिरे धर्मस्वपुत्रपे(पाः)।

पुत्रधर्मस्वपाये च द्रेक्काणाः स्युः . . . . ॥

**End:**

दुरितं मत्तमातङ्गं पन्नगं वसुवारणम् ।

नवमं नन्दनं चैव पादार्थं ब्रह्म पूरुषम् ॥

निषिग्रह(:) कोशदश्च भावो मन्त्रैश्च लब्धकम् ।
आकाशं गगनं शून्यं . . . . . चहमत्पदम् (?) ।
वलापदन्तरिक्षं च व्योम(मा)र्गं दिवि पुष्करम् (?) ॥

---

## No. 14249. देशान्तरमृतसंस्कारः.
## DEŚĀNTARAMṚTASAṀSKĀRAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 80a of the MS. described under No. 8488, wherein this work is called Antyēṣṭiprayōga in the list of other works.

Incomplete.

On the procedure for the performance of the funeral ceremonies by a person in relation to his father who died in a distant country or place wherein the son could not be present at or immediately after death.

**Beginning :**

देशान्तरे पित्रोर्मृतिं श्रुत्वा रुदि(त्वा) स्नात्वा आर्द्रवस्त्रः ब्रह्मदण्ड गृहीत्वा समस्तसम्पत्—पङ्कजम् । पितुर्गोत्रस्य शर्मणो देवस्य पुण्यलोकावाप्त्यर्थं शरीरशुध्द्यर्थं केशवपनं कारयितुमनुज्ञा दीयताम् । प्राणानायम्य सङ्कल्प्य तिथौ

* * * *

पितुर्गोत्रस्य शर्मणो देवस्य तृष्णोपशमनार्थं श्रवणदिने तिलोदकाञ्जलिप्रदानं कर्तुमनुज्ञा दीयताम् । ब्रह्मदण्डं दत्वा . . . . . . . . . . . प्राणानायम्य सङ्कल्प्य तिथौ पितुर्गोत्रस्य शर्मणो देवस्य अस्मिन् श्रवणेऽहनि तिलोदकाञ्जलिप्रदानं करिष्ये ।

**End :**

इहलोकं परित्यज्य . . . यन्मे मातेत्यादि । वर्तमाने तिथौ पितुर्गोत्रस्य शर्मणो देवस्य श्रवणदिनादारभ्य एकादशेऽहनि तत्पितृ.

---

## No. 14250. शिवगद्यम्.
## ŚIVAGADYAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 83a of the MS. described under No. 8488, wherein this work was omitted to be included in the list of other works.

Wants the beginning and the end.

Prose passages in praise of God Śiva.

**Beginning:**

हर हर श्रीमन्महादेव देवेश्वर सामगानप्रिय . . . . . . . . . . . . श्रीमन्महामेरुसमदृष्टिप्रदायक सकलजीवद . . . . . . . . . सच्चिदानन्दस्वरूप सगुणनिर्गुणस्वरूप संसारविदूर भव भर्ग भवभञ्जन मृत्युञ्जय भवविनाशन ।

**End:**

ईशा(न) पशुपते उमामहेश्वर भवबन्धविमोचन . . . . . . . . . .

---

No. **14251.** कर्ममध्यसूतकादिविषयः.

KARMAMADHYASŪTAKĀDIVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 84a of the MS. described under No. 8488, wherein this work was omitt.d to be included in the list of other works.

Wants the beginning and the end.

Deals with the procedure when pollution affects persons who have undergone the necessary initiation for the performance of certain religious acts.

**Beginning:**

अथ विवाहादिषु सूतकनिवृत्तिः . . . . . . . .

प्रारम्भे सूतकं न स्यादनारम्भे तु सूतकम् ।
प्रारम्भादूर्ध्वमाशौचे विवाहः कार्य एव हि ॥
(कर्मा)दौ पूजने चैव प्रारम्भे नास्ति सूतकम् ।

वृद्धशौनकः—

कर्मणि क्रियमाणे तु मध्ये चेत्सूतकं यदि ।
यावत्कर्मसमाप्तिः स्यात्तावन्नाप्नोति सूतकम् ॥

**End:**

सङ्ग्रहकारः—

ना(न्दी)मुखे कर्मणि सम्प्रवृत्ते पितुर्यतो जीवति यस्य पुंसः ।
येष्वेव कुर्यात्स्वपिता स्वयं च तेष्वेव कुर्यादिति शास्त्रसिद्धम् ॥
नान्दीश्राद्धं पिता कुर्यात् आद्ये पाणिग्रहे बुधः ।
अत ऊर्ध्वं सुत कुर्यादेभ्य एव ददात्यसौ ॥ इति

## No. 14252. धर्मामृतम्.
## DHARMĀMṚTAM.

Substance, (Śrītāla) palm-leaf. Size, 10⅝ × 1⅝ inches. Pages, 156. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Contains one to nine Adhyāyas dealing with the following subjects:—

१. धर्मस्वरूपनिरूपणम्.
२. सम्यक्त्वोत्पादनादिनिरूपणम्.
३. ज्ञानाराधनाधिगमानिरूपणम्.
४. सम्यक्चारित्रनिरूपणम्.
५. पिण्डशुद्धिविधानम्.
६. मार्गमहोद्योगवर्णनम्.
७. तपस्साराधनादिविधानम्.
८. आवश्यकनिर्यत्ताभिधानम्.
९. नित्यनैमित्तिकक्रियाभिधानम्.

A treatise on Jaina Dharmaśāstra relating to ascetics. The subjects dealt with herein are apparent from the names of the Adhyāyas given above. By Āśādhara.

**Beginning:**

हेतुद्वैतबलादुदीर्णसुदृशः सर्वंसहास्सर्वशः
त्यक्त्वा सङ्गमजस्रसुश्रुतपराः संयम्य साक्षं मनः ।
ध्यात्वा स्वे शमिनः स्वयं स्वममलं निर्माल्यकर्माखिलं
ये शर्म प्रगुणैश्चकासति गुणैस्ते भान्तु सिद्धा मयि ॥
श्रेयोमार्गानभिज्ञानिह भवगहने जाज्वलद्दुःखदाव-
स्कन्दे चङ्क्रम्यमाणानतिचकितमिमानुद्धरेयं वराकान् ।
इत्यारोहत्परानुग्रहरसविलसद्भावनोपात्तपुण्य-
प्रक्रान्तैरेव वाक्यैः शिवपदमुचिताच्छास्ति योऽर्हन् स नोऽव्यात् ॥
सूत्रग्रदो(थो)गणद(ध)रानभिन्नदशपूर्विणः ।
प्रत्येकबुद्धानप्येव(ह)श्रुतकेवलिनस्तथा ॥
ग्रन्थार्थतो गुरुपरम्परया यथाव-
च्छ्रुत्वावदा(धा)र्य भवभीरुतया विनेयान् ।
उद्ग्राहयन्त्युभयनीतिबलेन सूत्रं
रत्नत्रयप्रणयिनो गणिनस्स्तुमस्तान् ॥
धर्मं केऽपि विदन्ति तत्र धुनुते सन्देहमन्ये परे
तद्भ्रान्तेरपयन्ति सुष्ठु तमुशन्त्यन्येऽनुतिष्ठन्ति वा ।

श्रोतारो यदनुग्रहादहरहर्वक्ता तु रुन्धन्नघं
विष्वद्भिर्जरयंश्च नन्दति शुभैस्सा नन्दताद्देशना ॥
अथ धर्मामृतं पद्यद्विसहस्र्या दिशाम्यहम् ।
निर्दुःखं सुखमिच्छन्तो भव्याः शृणुत धीधनाः ॥
परानुग्रहबुद्धीनां महिमा कोऽप्यहो महान् ।
येन दुर्जनवाग्वज्रः पतन्नेव निहन्यते ॥
सुप्रापाः स्तनयित्नवः शरदि ते साटोपमुत्थाय ये
प्रत्याशं प्रसृताश्चलप्रकृतयो गर्जन्त्यमन्दं मुधा ।
ये प्रागब्धिचितं व(ज)लद्विमुदकैर्व्रीहीन्नयन्तो नवान्
क्षेत्राणि प्रण(य)न्त्यलं जनयितुं ते दुर्लभास्त(स्स)द्घनाः ॥

* * * *

**Colophon:**

इत्याशाधरविरचिते धर्मामृतनाम्न्यनगारधर्मे धर्मस्वरूपनिरूपणं नाम प्रथमोऽध्यायः ॥

**End:**

नित्या नैमित्तिकीश्चेत्यवितथकृतिकर्माङ्गबाह्यश्रुतोक्ता
भक्त्या युङ्क्ते क्रिया यो यतिरथ परमश्रावणस्तैव शक्त्या ।
स श्रेयःपङ्क्तिमाग्रत्रिप(द)शनरसुखस्वादुयोगोज्झिताङ्गो
भव्यः प्रक्षीणकर्मा व्रजति कतिपयैर्जन्मभिर्जन्मपारम् ॥
इदं सुरुचयो जिनप्रवचना(र्णवा)दुद्धृतं
सदा य उपयुञ्जते श्रवणधर्मसारामृतम् ।
शिवास्पदमुपासितक्रमयमाः शिवाशापरैः
समाधिविधुतांहसः कतिपयैर्भवैर्यान्ति ते ॥

**Colophon:**

इत्याशाधरविरचिते धर्मामृतनाम्न्यनगारधर्मे नित्यनैमित्तिकक्रियाभिधानं नाम नवमोऽध्यायः ॥

इत्याशाधरयत्याचारस्समाप्तः ॥

---

## No. 14253. जिनसंहितासङ्ग्रहः.
## JINASAMHITĀSAṄGRAHAḤ.

**Substance**, (Śrītāla) palm-leaf. **Size**, 15 × 1¾ inches. **Pages**, 156. **Lines**, 9 on a page. **Character**, Kanarese. **Condition**, much injured. **Appearance**, old.

Contains the Paricchēdas 5 to 40, of which the fifth wants the beginning.

Same work as that described under R. No. 1366 of the Triennial Catalogue of MSS., Vol. II, Part I-B, but without the Tamil meaning. The topics dealt with in the Paricchēdas 21 to 40 are given below:—

| | |
|---|---|
| २१. भूपरिग्रहविधिः. | ३१. मूर्धेष्टकाविधिः. |
| २२. दिक्परिच्छेदविधिः. | ३२. जिनधामविधिः. |
| २३. पदन्यासविधिः. | ३३. विमानाङ्गलक्षणसंविधिः. |
| २४. वास्तुदेवबलिः. | ३४. शालादिसंविधिः. |
| २५. मानोपकरणम्. | ३५. दारुसङ्ग्रहणम्. |
| २६. ग्रामलक्षणकथनम्. | ३६. सिंहासनलक्षणम्. |
| २७. राजधानीविधिः. | ३७. शूलस्थापनविधिः. |
| २८. गृहलक्षणविधिः. | ३८. मृदालेपविधिः. |
| २९. प्रथमेष्टकाविधिः. | ३९. प्रतिमालक्षणम्. |
| ३०. गर्भन्यासविधिः. | ४०. नयनोन्मीलनविधिः. |

**End:**

आचार्यः शिल्पिनो दद्यादवशिष्टांशमिद्धधीः ॥
नेत्रक्षेत्रे मण्डलं पञ्चदास्या जाड्यं पक्षः स्यात्परं वर्त्मनाम ।
अन्य . . . . . कृष्णमन्यन्मध्ये दृष्टिर्मण्डलं पञ्चमं स्यात् ॥

**Colophon:**

इत्यार्षे—सङ्ग्रहे नयनोन्मीलनविधिर्नाम चत्वारिंशः परिच्छेदः ॥
अथावनीन्द्र वक्ष्यामि शृणु . , . . . . . . . . . ।

---

## No. 14254. प्रक्रियाकौमुदीव्याख्या.
## PRAKRIYĀKAUMUDĪVYĀKHYĀ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 107a of the MS. described under No. 1332.

Wants the beginning and the end in the Śabdādhikāra.

Same work as that described under No. 1349 ante.

**Beginning:**

कीदृक् प्रत्यय इति । शसः शकार औटष्टकारस्य चर्त्वेनासन्दिग्धोच्चारणार्थत्वः । इतरथा हि औडसीत्सुके टसेदंग्रहणं डस्य वेति सन्देहः स्यात् ।

* * * *

तत्रेदं वैयाकरणसिद्धान्तरहस्यम् । इदं तावत्केषांचिन्मतम्—स्वार्थद्रव्य-लिङ्गसङ्ख्याकर्माद्यात्मकं पञ्चकं प्रातिपदिकार्थ इति । अन्येषां तु स्वार्थद्रव्य-लिङ्गात्मकः त्रिक इति । तत्र स्वार्थो नाम विशेषणं, तच्च कदाचित्स्वरूपं, जातिर्गुणो द्रव्यं वा स्यात् ।

**End:**

अथो अत्रास्मै इत्यत्रान्वादेशे कृते सवर्णदीर्घ एकादेशः प्राप्नोति । तत्रैकपदाश्रयत्वादन्तरङ्गत्वात् पूर्वं स्मैभाव एव स्यात् पश्चादेकादेशः पदद्वयाश्रयत्वात् सर्वनाम्नः स्मै इति चतुर्थ्येकवचनस्य ङे इत्येतस्य स्मै । ङसिङ्योः स्मात्स्मिनौ ।

---

No. **14255.** प्राकृतसप्तशती.

PRĀKṚTASAPTAŚATĪ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 110*a* of the MS. described under No. 1332.

Wants the beginning and the end.

Same work as the text described under R. No. 23 of the Triennial Catalogue of Sanskrit MSS., Vol. I, Part I-A. By Śātavāhana. This work is also called Gāthāsaptaśatī.

---

No. **14256.** इन्द्रियलक्षणम्.

INDRIYALAKṢAṆAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 33*a* of the MS. described under No. 4154.

Incomplete.

Gives the characteristics of the organs of sense including Manas.

**Beginning:**

किमिदम् इन्द्रियत्वं शरीरसंयुक्तत्वे सति ज्ञानकरणत्वे सति अतीन्द्रियत्वमेव । चक्षुरादेस्तावत् शरीरेषु संयोगसम्बन्धेन विद्यमानत्वात्, अयं पुरुष इत्याकारकज्ञानं प्रत्यसाधारणकारणत्वात्, अतीन्द्रियत्वस्यापि विद्यमानत्वात्तत्र लक्षणसमन्वयः । न च वाच्यं ज्ञानकरणत्वे सत्यतीन्द्रियत्वमात्रोक्तौ चारितार्थ्यात्किमर्थं शरीरसंयुक्तत्वमिति । तथा सति इन्द्रियार्थसन्निकर्षेऽतिव्याप्तिः स्यात् ।

**End:**

तथा च पुनरपि आत्माश्रयप्रसङ्गः स्यादिति ज्ञानाकरणकज्ञानत्वरूपलौकिकप्रत्यक्षत्वस्य विवक्षितत्वेन विरोधाभावात् । अतः शरीरसंयुक्तत्वे सति जन्यज्ञानत्वन्यूनवृत्तिजात्यवच्छिन्न.

---

No. 14257. न्यायसिद्धान्ततत्त्वम्.

NYĀYASIDDHĀNTATATTVAM.

Substance, palm-leaf. Size, 13¾ × 1¼ inches. Pages, 110. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Wants the beginning; otherwise complete.

An elementary treatise dealing with the seven Tattvas or categories of the Vaiśeṣika philosophy.

**Beginning:**

संयोगः तत्र न प्रत्यक्ष इति तच्चिन्त्यम्; तादृशवाताभावे शीतप्रत्यक्षाभावप्रसङ्गात् । तद्व्यञ्जकाभावात् तत्र शीतान्तर . . . . . . . . मार एव । सङ्ख्यादयस्तु पूर्ववत् बोध्याः । संयोगोऽपि तत्र न कठिनः । द्रवत्वं सांसिद्धिकं रूपादिचतुष्टय . . . . . . . . . . नित्यमनित्यगतमनित्यमिति ।

नित्यानित्यविभेदेन द्वेधा रूपादिपञ्चकम् ।
सङ्ख्यादयः पूर्ववच्च जले भान्ति च . . . ॥

**End:**

तदुत्पत्तिविनाशानां तत्कार्यकारणभावानां तत्प्रतियोगिकतदनुयोगिकभेदानां च कल्पनागौरवात् ॥

**Colophon:**

न्यायसिद्धान्ततत्त्वं समाप्तम् ॥

---

No. 14258. न्यायसारः.

NYĀYASĀRAḤ.

Substance, palm-leaf. Size, 14¼ × 1¼ inches. Pages, 38. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Begins on fol. 1a. The other work herein is Nyāyasāralaghupañcikā 20a.

Complete.

By Bhāsarvajña. Same work as that described under No. 5086 ante.

## No. 14259. न्यायसारः, सव्याख्यः.
## NYĀYASĀRAḤ WITH COMMENTARY.

Pages, 134. Lines, 7 on a page.

Begins on fol. 20*a* of the MS. described under the previous number. Complete.

Same work as the above and with a commentary called Nyāyasārapadapañjikā. By Vāsudēva, son of Kāśmīra Sūryasūri.

**Beginning :**

देवदेवमभिवन्द्य शाश्वतं योगिवृन्दहृदयैकमन्दिरम् ।
वासुदेवविदुषा विरच्यते न्यायसारपदपञ्चि(ञ्जि)का परा ॥

तत्रादौ तावच्चिकीर्षितग्रन्थस्य निष्प्रत्यूहपरिपूरणायाभिमतदेवताप्रणतिपुरस्सरं श्रोतृजनमनस्समाधानार्थं सप्रयोजनमभिधेयं प्रतिजानीते—

प्रणम्य शम्भुं जगतः पतिं परं समस्ततत्त्वार्थविदं स्वभावतः ।
शिशुप्रबोधाय मयाभिधास्यते प्रमाणतद्भेदतदन्यलक्षणम् ॥

शं सुखं भवत्यस्मादिति शंभुः तम्, किंविशिष्टं जगतः त्रिलोकस्य पतिं स्वामिनं देवेन्द्रादीनामपि जगत्पतित्वमस्तीति तद्व्यवच्छेदायाह परमिति । परमुत्कृष्टमनन्यप्रेर्यम्, इन्द्रादयः पुनरीश्वरप्रेर्यत्वेन न पर इति भावः । परतत्त्वं प्रधानादीनामप्यस्तीति तद्व्यवच्छेदायाह समस्ततत्त्वार्थविदमिति ।

* * * *

**Colophon :**

इति श्रीकाश्मीरसूर्यसुरीन्द्रसूनुवासुदेवविरचितायां न्यायसारपदपञ्चि(ञ्जि)कायां प्रत्यक्षपरिच्छेदः ॥

**End :**

परिहरति—नं ईश्वरज्ञानस्य नित्यस्यार्थैस्सह संबन्धाभावप्रसङ्गादिति । अस्मदादिज्ञानस्याप्यतीतानागतपदार्थैस्संबन्धो न स्यात् । अतीताद्यर्थस्य कार(क)त्वासंभवादिति ज्ञेयम् । उपसंहरति तस्मात्कृतकत्वेऽपि नित्यसुखसंवेदनसंबन्धस्य विनाशकारणाभावान्नित्यत्वं स्थितम् । तस्सिद्धमेतन्नित्यसंवेद्यमानसुखेन विशिष्टात्यन्तिकी दुःखनिवृत्तिर्मोक्ष इति ॥

**Colophon :**

इति काश्मीरसूर्यसूरीन्द्रसूनुश्रीवासुदेवविरचितायां न्यायसारलघुपाञ्चि(ञ्जि)कायामागमपरिच्छेदः समाप्तः ॥

No. 14260. ज्यौतिषविषयः.

JYAUTIṢAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page. Character, Kanarese.

Begins on fol. 22a of the MSS. described under No. 4109.

Incomplete.

A treatise on prognostication.

**Beginning:**

अग्रे च जीवचिन्ता च दक्षिणे धातवस्तथा ।
पृष्ठे च वामपार्श्वे च मूलवस्तु न संशयः ॥
अजहरिधन्वी कार्यविलम्बं मकरे कर्किणि वृश्चिकनाशम् ।
वृषतुलकुम्भे तत्फलसिद्धि कन्यामीने मिथुने फलशीघ्रम् ॥

**End:**

तुलायां धातुचिन्ता च वृश्चिके बहुचिन्तनम् ॥
अर्थचिन्ता धनुर्लग्ने मकरे कलहचिन्तनम् ।
कुम्भे च स्थानपूज्यश्च मीने च गमनं भवेत् ॥

---

No. 14261. आर्तत्राणपरायणस्तोत्रम्.

ĀRTATRĀṆAPARĀYAṆASTŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 23a of the MSS. described under No. 4109.

Incomplete.

Same work as that described under No. 9871 ante.

---

No. 14262. महासङ्कल्पः.

MAHĀSAṄKALPAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 25a of the MSS. described under No. 4109.

Wants the beginning and the end.

Same work as that described under No. 3753 ante, but with slight difference.

---

No. 14263. तर्कभाषाव्याख्या—चेन्नुभट्टीया.

TARKABHĀṢĀVYĀKHYĀ: CENNUBHAṬṬĪYĀ.

Pages, 18. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 4115.

Incomplete.

Same work as that described under No. 4126 ante.

This is also called Tarkabhāṣāprakāśikā. By Cennubhaṭṭa.

## No. 14264. रामायणम्.
## RĀMĀYAṆAM.

Pages, 14. Lines, 5 on a page.

Begins on fol. 62a of the MS. described under No. 4115.

Contains the Saṅkṣēpasarga only.

Same work as that described under No. 1806 ante.

---

## No. 14265. आदित्यहृदयम्.
## ĀDITYAHṚDAYAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 27a of the MS. described under No. 4032.

Wants the beginning and the end.

Same work as that described under No. 5945 ante.

---

## No. 14266. सूर्यशतकम्.
## SŪRYAŚATAKAM.

Pages, 40. Lines, 8 on a page.

Begins an fol. 46a of the MS. described under No. 5085.

Incomplete.

Same poem as that described under R. No. 139(b) of the Triennial Catalogue of the Sanskrit MSS., Vol. I, Part I-A.

---

## No. 14267. खादिरगृह्यसूत्रम्, सवृत्ति.
## KHĀDIRAGṚHYASŪTRAM WITH COMMENTARY.

Pages, 104. Lines, 6 on a page.

Begins on fol. 131a of the MS. described under No. 69.

Breaks off in the second Paṭala.

Same work as that described under No. 1172 ante. By Rudraskanda.

---

## No. 14268. न्यायशास्त्रविषयाः केचन.
## NYĀYAŚĀSTRAVIṢAYĀḤ KECANA.

Pages, 16. Lines, 5 on a page.

Begins on fol. 158a of the MS. described under No. 4524.

Wants the beginning and the end.

A fragment setting forth some of Maṇikāra's syllogisms proving the existence of God and similar topics of later Nyāya.

**Beginning:**

द्वारकोपादानगोचरजन्यकृत्यजन्यानि समवेतानि जन्यानि स्वजनका-दृष्टप्रागभ . . . . . . . . . . . . पादानगोचरापरोक्षज्ञानचिकीर्षा-कृतिमजन्यानि स्वजनकादृष्टोत्तरोपादानगोचरापरोक्षज्ञानचिकीर्षा . . . . त्वे सति प्रागभावप्रतियोगित्वात् । यत्र यत्र समवेतत्वसमानाधिकरणमा॰ भावप्रतियोगित्वं तत्रोक्तसाध्य . . . . . . . . . . . कहेतुमन्ति चैतानि तस्मादुक्तसाध्यवन्ति ।

* * * *

आत्मत्वम् उक्तसम्बन्धेन संसारीतरदिक्कालभिन्नवृत्ति न, आत्मेतरावृत्तित्वात् ।

**End:**

ज्ञानान्यत्वं निष्प्रकारकत्वसमाना(धिकरणा)न्योन्याभावप्रतियोगितावच्छेदकं ज्ञानावृत्तिधर्मत्वात् घटत्ववत् । सप्रकारकत्वं ज्ञाननिष्ठात्यन्ताभावप्रतियोगि सप्रकारकभिन्नावृत्तित्वात् । ज्ञानत्वं सप्रकारकभिन्नवृत्ति ज्ञानत्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वात् मेयत्ववत्.

---

No. **14269.** महान्यासः.

MAHĀNYĀSAḤ.

Pages, 12. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 284.

Complete.

Same work as that described under Nos. 3751 and 5465 ante.

---

No. **14270.** शनैश्चरस्तोत्रम्.

ŚANAIŚCARASTŌTRAM.

Page, 1. Lines, 3 on a page.

Begins on fol. 14*a* of the MS. described under No. 284.

Wants the beginning.

Similar to the work described under No. 10889 ante.

**Beginning:**

चिन्तितानि च सर्वाणि करोत्येव न संशयः ।
शनिना सोऽभ्यनुज्ञातः स्वस्थानं गतवान् प्रभुः ॥

**End:**

कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ।
सौरिश्शनैश्चरो मन्दः पिप्पलादिषु संस्थितः ॥
कालनीलाञ्जनप्रख्यनीलजीमूतसंनिभम् ।
छायामार्ताण्डसूनुं च प्रणमामि शनैश्चरः(म्) ॥

**Colophon:**

इति प्रभात(स)खण्डे दशरथकृतौ शनैश्चरस्तोत्रं सम्पूर्णम् ॥

---

No. **14271**. कैवल्योपनिषद्.
KAIVALYŌPANIṢAD.

Pages, 3. Lines, 5 on a page.

Begins on fol. 18*b* of the MS. described under No. 284.
Wants the beginning; otherwise complete.
Same work as that described under No. 395 ante

---

No. **14272**. गीतासारः.
GĪTĀSĀRAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 574.
Complete.
Purports to give the essence of the Bhagavad-Gītā.

**Beginning:**

अस्य श्रीगीतासाराध्यायस्य अग्निर्वायुस्सूर्यश्च ऋषयः, ऋग्यजुस्सामाथर्वणवेदानि, ब्रह्मा विष्णुर्महेश्वरश्च देवता, मोक्षार्थे जपे विनियोगः ।

क्षेत्राणि ऋग्यजुस्सामाथर्वणवेदाश्चत्वारि, पीतविद्युच्छ्वेतो वर्णः, अकारो बीजम्, उकारश्शक्तिः, मकार इति कीलकं, प्रणवादिसम्पुटं, श्रीमहाविष्णुप्रीत्यर्थे गीतासारमन्त्रजपं करिष्ये । न्यासध्याने विनियोगः ।

अर्जुन उवाच—

ओंकारस्य च माहात्म्यं रूपं स्थानं परंतप ।
तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम ॥

**End:**

निर्मन्थ्य चतुरो वेदान्मुनिना भारतं कृतम् ॥
भारतो दधिमन्थस्स्याद्गीतानिर्मथनस्य च ।
सारमुद्धृत्य कृष्णेन अर्जुनस्य मुखे हुतम् ॥

सर्ववेदमयी गीता सर्वशास्त्रमयो मनुः ।
सर्वतीर्थमयी गङ्गा सर्वदेवमयो हरिः ॥
पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
नित्यं धारयते विप्रः स मोक्षमधिगच्छति ॥

**Colophon:**

इति गीतासारं(रः) समाप्तम्(:) ॥

---

No. **14273.** बालरक्षाविधिः.
BĀLARAKṢĀVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 33*b* of the MS. described under No. 2898.

Complete.

On the procedure for protecting a child from the consequences of sudden fright. This is laid down in the Bhāgavata and it is stated in the Harivaṁśa that Nanda adopted it towards the child Kṛṣṇa soon after the destruction of the Śakaṭāsura (cart-demon).

**Beginning:**

अथ यदि प्रमादात्पुत्रकस्य भुवि पतनादिना भीतिरुपजायते तदा पार्थिवरजः परिगृह्य शिशोः शिरः त्रिः प्रदक्षिणमावृत्य विष्णुस्ते पूर्वतः पात्वित्यादिभिर्मन्त्रै रक्षां कुर्यात् । एष रक्षाविधिः शकटभञ्जने नन्दगोपेन भीतोऽयं शिशुरिति बुद्ध्या यदुनन्दनस्य श्रीकृष्णस्य कृत इति हरिवंशे ।

नन्दोऽङ्कमेवमारोप्य भूरेणुं परिगृह्य च ।
शिरः प्रदक्षिणं कुर्या(दे)न्मन्त्रमेनं ज(जाप च) ॥
विष्णुस्ते पूर्वतः पातु रुद्रो रक्षतु दक्षिणे ।
ब्रह्मा च पश्चिमे पायात् चन्द्रो रक्षत्वथोत्तरम् ॥

**End:**

स्वप्नदृष्टा महोत्पाता वृद्धबालग्रहाश्च ये ।
सर्वे नश्यन्तु ते विष्णोर्नामग्रहणभीरवः ॥

**Colophon:**

इति भागवते बालरक्षाबन्धनविधिः ॥

## No. 14274. नक्षत्रहोमप्रयोगः.
## NAKṢATRAHOMAPRAYOGAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 102*a* of the MS. described under No. 2898.

Complete; as laid down by Śaunaka.

On the performance of a fire-offering conducted in a particular manner according to the Nakṣatra (lunar asterism) of the day on which a person is attacked with some ailment.

**Beginning:**

नक्षत्रहोमस्तत्रैव यस्य यस्मिन्नक्षत्रे व्याधिरुत्पद्यते तस्य तत्सर्वत्त(त्रोक्त)या नक्षत्रयो(त्रे हो)मः कर्तव्यः। नक्षत्रहोमस्य साधारणधर्मेण उच्यते (विधिः)। पूर्वेद्युर्युग्मब्राह्मणान् भोजयित्वाशिषो वाचयित्वाथापरेद्युः देवयजनोल्लेखना . . . प्रणीताप्रोत्था(क्षा)याग्नेः पूर्वदेशे वोपलिप्तायां तण्डुलेषु द्वादशदलपद्मंलि खित्वा तेषु दलेषु केशवादि द्वादश नामानि चतुर्थ्यन्तानि विलिख्य कर्णिकामध्ये नक्षत्रदेवतामावाह्य तस्य दक्षिणोत्तरयोरनुमतिमावाह्य पूर्वादिषु केशवादीन् पूजयेत् ।

**End:**

दूर्वामिश्र यथासम्भवघृताक्ततिलव्रीहिद्रव्येण स्विष्टकृत्र(यादि)प्रभृतिमेवमात्मकमत्यादि सर्वेषां नक्षत्राणां तत्तन्मन्त्रैर्वा नाममिर्जुहुयात् ॥

**Colophon:**

इति शौनकोक्तनक्षत्रहोमः ॥

---

## No. 14275. चतुर्विंशतिमूर्तिलक्षणम्.
## CATURVIṀŚATIMŪRTILAKṢAṆAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 107*a* of the MS. described under No. 2898.

Complete.

Describes the characteristics of the 24 kinds of forms or images of God Viṣṇu.

**Beginning:**

अथ शङ्खचक्रपद्मगदे—केशवस्य । शङ्खपद्मगदाचक्रं—नारायणस्य। गदाचक्रशङ्खपद्म—माधवस्य । चक्रगदाशङ्खपद्म—गोविन्दस्य । शङ्खचक्र —विष्णोः । शङ्खचक्रपद्मगदा—मधुसूदनस्य । पद्मशङ्खचक्रगद—त्रिविक्रम(स्य) ।

**End:**

चक्रपद्मगदाशङ्ख—नृसिंह(स्य)। गदापद्मचक्रशङ्ख—अच्युत(स्य)। पद्मगदाचक्रशङ्ख—जनार्दन(स्य)। शङ्खगदाचक्रपद्म—उपेन्द्र(स्य)। शङ्खचक्रपद्मगदा—हरेः। शङ्खगदापद्मचक्र—श्रीकृष्ण(स्य) ॥

**Colophon:**

इति चतुर्विंशतिमूर्तिलक्षणानि ॥

---

No. **14276.** यतिसंस्कारविधिः.

YATISAṀSKĀRAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 117*b* of the MS. described under No. 2898.

Complete; as laid down by Śaunaka.

On the details of procedure for the performance of the funeral ceremonials of a deceased ascetic or Sannyāsin.

**Beginning:**

शौनकोऽहं प्रवक्ष्यामि यतिसंस्कारमुत्तमम् ।
स्नात्वा गृहस्थः शुद्धात्मा यतिसंस्कारमारभेत् ॥
पश्चा(श्चात्)प्रत्यवरोहेण शिक्यमारोप्य तं पुनः ।
ब्राह्मं रथं समारोप्य नृत्तवाद्यैश्च घोषयेत् ॥
ग्रामं प्रदक्षिणं कृत्वा ब्राह्मणैर्वेदपारगैः ।

**End:**

निदध्याद्व्रणवेनैव ध्यानभिक्षोः कलेबरम् ।
प्रोक्षणं खननं चैव सर्वं तेनैव कारयेत् ॥
अहन्येकादशे प्राप्ते पार्वणं तु सुतश्चरेत् ।
द्वादशेऽह्नयेव वा पुण्ये नारायणबलिर्भवेत ॥

**Colophon:**

इति शौनकीये यतिसंस्कारविधिः ॥

---

No. **14277.** शान्तिहोमः.

ŚĀNTIHOMAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 142*b* of the MS. described under No. 2898.

Incomplete.

On details for the performance of a propitiatory fire-offering by the followers of Āśvalāyanasūtra.

**Beginning:**

प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप् । प्रजापते न त्वदेतानि—विरिंचि वाक्पतिं श्वेतपङ्कजस्थं प्रजापतिं(प)द्माक्षस्रक्कुण्डिकाभीतिदानहस्तं विचिन्तयेत् ।

तिलपिष्टागरुं गन्धं विष्णुक्रान्तिशमीदले ।
नीलवर्णमयं पुष्पं धूपं कृष्णागरुं तथा ॥
कृसरं तिलपिष्टान्नं नैवेद्यं च समर्पयेत् ।
कस्तूरी सहताम्बूलं पश्चादष्टोत्तरं जपेत् ॥
होमस्थानं समासाद्य कुर्यादग्निमुखान्तकम् ।

**End:**

जयादिहोमशेषं च पूर्णाहुतिमथाचरेत् ।
ततः कुम्भस्थतोयेन कारयेदभिषेचनम् ॥
यजमानस्य शिरसि शमग्निरिति मन्त्रतः ।
नवग्रहादिमन्त्रैश्च आप इष्टा उमाद्यर्चौ ॥
* * * *
सवस्त्रप्रतिमां धेनुमाचार्याय प्रदापयेत् ।
ब्राह्मणान् भोजयेत्पश्चाद्यथा(विभवविस्तरम्) ।

---

No. 14278. तीर्थश्राद्धाङ्गपिण्डदानवचनानि.

TĪRTHAŚRĀDDHAṄGAPIṆḌADĀNAVACANĀNI.

Pages, 2. Lines, 5 on a page.

Begins on fol. 143*a* of the MS. described under No. 2898.

Wants the beginning and the end.

A collection of stanzas taken from the Vāyupurāṇa and dealing with the offering of Piṇḍa by a person to the manes of one's deceased ancestors, preceptors, relatives, friends, patrons and others.

**Beginning:**

तेषां पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठतु ॥
आ ब्रह्मणो ये पितृवंशजाता मातु(तु)स्तथा वंशभवा मदीयाः ।
वंशद्वयेऽस्मिन् मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥

मित्राणि सख्यः पशवश्च वृक्षा स्पृष्टाश्च दृष्टाश्च कृतोपकाराः ।
जन्मान्तरे ये मम सङ्गताश्च तेभ्यः स्वधा पिण्डमहं ददामि ॥

End:

पितृवंशे मृता ये च गतिर्येषां न विद्यते ।
तेषां (पिण्डो मया दत्तो ह्यक्षय्यमुपतिष्ठतु) ॥
मातृवंशे मृता ये च गतिः (येषां न विद्यते) ।
तेषां . . . . . . (मुपतिष्ठतु) ॥
बन्धुवर्गे मृता ये च गतिः : (न विद्यते) ।
तेषां . . . . . . . (मुपतिष्ठतु) ॥

---

No. **14279.** रामचन्द्राष्टोत्तरशतनामस्तोत्रम्.
RĀMACANDRĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 4 on a page.

Begins on fol. 29*a* of the MS. described under No. 2004.
Complete.
Same work as that described under No. 8974 ante.

---

No. **14280.** सूर्याष्टोत्तरशतनामस्तोत्रम्.
SŪRYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 80*b* of the MS. described under No. 2005.
Incomplete.
Same work as that described under No. 9348 ante.

---

No. **14281.** चन्द्रशेखराष्टकम्.
CANDRAŚĒKHARĀṢṬAKAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 82*a* of the MS. described under No. 2005.
Complete.
Same work as that described under R. No. 324(*m*) of the Triennial Catalogue of MSS., Vol. I, Part I-A, but with the addition of a stanza given below :—

इति स्तुत्वा महादेवं मार्कण्डेयो महामुनिः ।
कालमृत्युमतिक्रम्य चिरायुरभवत्तदा ॥

## No. 14282. पाण्डवगीता.
## PĀṆḌAVAGĪTĀ.

Substance, palm-leaf. Size, 11⅞ × 1⅜ inches. Pages, 26. Lines, 5 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Same work as that described under R. No. 2171(*b*) of the Triennial Catalogue of the Sanskrit MSS., Vol. III, Part 1-A, but wants the beginning.

---

## No. 14283. श्रुतिगीता, सव्याख्या.
## ŚRUTIGĪTĀ WITH COMMENTARY.

Substance, palm-leaf. Size, 8⅞ × 1½ inches. Pages, 51. Lines, 10 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Almost complete.

Similar to the work described under No. 2572 ante.

**Beginning :**

ब्रह्मन् ब्रह्मण्यनिर्देश्ये निर्गुणे गुणवृत्तयः ।
कथं चरन्ति श्रुतयः साक्षात्सदसतः परे ॥

इति प्रश्नात्मकोऽयं श्लोकस्त्रिंशच्छङ्कायुक्त इति ज्ञेयम् । श्रीनारायणर्षिणा नारदाय, परिहारांश्च तान् सर्वान् वक्ष्येऽहं शृणुतान(न)घेत्युक्तत्वात् । शङ्काः परिहाराश्च कथमिति चेदुच्यन्ते—आदौ श्रीशुकः—

बुद्धीन्द्रियमनःप्राणान् प्रजानामसृजत्प्रभुः ।
मात्रार्थं च भवार्थं च आत्मने कल्पनाय च ॥
सैषा ह्युपनिषद्ब्राह्मी पूर्वेषां पूर्वजैर्धृता ।
श्रद्धया धारयेद्यस्तां क्षेमं गच्छेदकिंचनः ॥

इति श्लोकद्वयेन त्रिंशच्छङ्कानां परिहारानवदत् । तानेव स्वसृष्टमित्यादिश्रुतिगीताश्लोकैर्विशदीचकार । सुखबोधार्थमादौ श्रुतिगीताश्लोकक्रमेण विवरणं कृत्वानन्तरं श्रीशुकोक्तश्लोकद्वये च परिहाराः प्रदर्श्यन्ते । गुणवृत्तयः गुणा एषां सन्तीति गुणाः तैः कल्याणगुणविशिष्टैर्युक्तैः सत्त्वादिगुणप्रचुरैर्वेदैर्वा वृत्तिः प्रकटनं यासां ताः शब्दात्मिकाः श्रुतयः ब्रह्मणि साक्षात् चेतनसम्बन्धं विना कथं चरन्ति केन प्रकारेण स्तुवन्ति इति प्रथमा शङ्का.

स्वसृष्टमिदमापीय शयानं सह शक्तिभिः ।
तदन्ते बोधयांचक्रुस्तल्लिङ्गैः श्रुतयः परम् ॥

इति श्लोकेन परिहता प्रलयावसाने चेतनजातं विना स्वयमेव मूर्तिमत्यस्सत्यः स्तुवन्तीति ।

**End:**

योऽस्योत्प्रेक्षक आदिमध्यनिधनो योऽव्यक्तजीवेश्वरो
यः सृष्ट्वेदमनुप्रविष्ट ऋषिणा चक्रे पुरश्शास्ति ताः ।
यं सम्पद्य जहात्यजामनुशयी सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं ध्यायेदजस्रं हरिम् ॥

**Colophon:**

इति श्रीमद्भागवते महापुराणे दशमस्कन्धे द्विनव (सप्ताशी) तितमोऽध्यायः ॥

अथ श्रुतिगीतासु तात्पर्यं श्रीशुको वदति य इति । यः परमात्मा अस्य जगतः उत्प्रेक्षकः सृष्ट्यादौ चिदचिन्मेलनार्थं द्रष्टा, सङ्कल्पकः इति यावत् । आदिमध्यनिधनः चिदचितोस्सत्तानिर्वाहकः प्रेरकः ग्रासकश्च । यः अव्यक्तजीवेश्वरः प्रकृतिपुरुषनियामकः ।

* * * *

उत्प्रेक्षक इत्यनेन सङ्कल्पकत्वमुक्तम् । भूतभृन्न च भूतस्थो ममात्मा भूतभावन इति गीतासु जयजयेति श्लोके अखिलशक्त्यवबोधकेति पदेऽपि द्रष्टव्या.

* * * *

**Colophon:**

इति श्रीमद्भागवते महापुराणे.

---

## No. 14284. शिवगीता.

## ŚIVAGĪTĀ.

Substance, palm-leaf. Size, 14½ × 1⅜ inches. Pages, 102. Lines, 5 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

Complete in 16 Adhyāyas.

Same work as that described under No. 2546 ante.

---

## No. 14285. पञ्चीकरणव्याख्या.

## PAÑCĪKARAṆAVYĀKHYĀ.

Pages, 26. Lines, 5 on a page

Begins on fol. 22*b* of the MS. described under No. 4621, wherein this work has been mentioned as Vedāntaviṣaya in the list of other works given therein.

Incomplete.

Same work as that described under No. 4642 ante, wherein see for the beginning.

**End:**

तथाहि—सम्यग्ज्ञाने क्षणभङ्गुरत्वात् तस्या न सत्ता ; गगनकुसुमवद्-त्यन्तशून्याभावान्नासत्ता . . . . . . . . . येति ज्ञात्वा स्वतस्सिद्धस्स्वयंप्र.

---

## No. 14286. इतिहासोत्तमम्.
## ITIHĀSOTTAMAM.

Pages, 14. Lines, 9 on a page.

Begins on fol. 50*a* of the MS. described under No. 1937.

Contains from the 19th Adhyāya (wants the beginning) to the end of the 25th Adhyāya complete and the 26th incomplete.

Same work as that described under No. 1978 ante.

---

## No. 14287. भारतवंशावलिः.
## BHĀRATAVAMŚĀVALIḤ.

Pages, 14. Lines, 5 on a page.

Begins on fol. 189*a* of the MS. described under No. 2087.

Wants the beginning and the end.

Gives the divine origin of some of the personages who figure in the Mahābhārata.

**Beginning:**

भरतौ तु सुदर्शनः ।
ब्रह्मयुक् साम्बस्कन्दश्च कुमारः काम उच्यते ।
शतावराद्रमायाश्च काम इन्द्राधमोऽस्पतः ॥
शर्वौतुङ्गगजौ प्राणवायुगुर्विन्द्रमध्यगः ।
तारो ब्रह्मांशयुग्द्रोणो वायुयुक्तोद्धवो गुरुः ॥

* * * *

जाम्बवान् वायुयुग्धर्मो विदुरस्सत्यजिद्यमः ।
ब्रह्मा विष्णुश्च सुग्रीवो हरियुक् कर्ण एव च ॥
एवं द्विरूपस्सूर्यः स्यादिन्द्राविष्टाङ्गदः शशी ।

**End:**

गन्धर्वाश्चक्रवर्तिनः । मनुष्योत्तमपर्यन्ताः प्रीयन्तां गुरवो मम ॥

* * * *

अन्ये च देवास्सततं प्रसन्ना हरौ सुभक्तिं मयि . . . . . .

## No. 14288. महाभारतसङ्ग्रहः.
## MAHĀBHĀRATASAṄGRAHAḤ.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 681. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete in 18 Parvans.

Same work as that described under R. Nos. 2440 and 2699 of the Triennial Catalogue of MSS., Vol. III, Part I-B and C but with the additional stanzas in the beginning as given below. By Mahēśvara.

**Beginning :**

शुक्लाम्बरधरं विष्णुं . . . . . शान्तये ॥

या कुन्देन्दुतुषारहारधवला . . . . निश्शेषजाड्यापहा ॥

* * * *

अभ्रश्यामः पिङ्गजटाबद्धकलापः प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
साक्षाल्लोकान् पावयमानः कविमुख्यः पाराशर्यः पर्वसु रूपं विवृणोतु ॥

पाराशर्यवचस्सरोजममलं गीतार्थगन्धोत्कटं
नानाख्यानककेसरं हरिकथासूर्यांशुना बोधितम् ।
लोके सज्जनषट्पदैरहरहः पेपीयमानं मुदा
भूयाद्भारतपङ्कजं कलिमलप्रध्वंसि नः श्रेयसे ॥

---

## No. 14289. धर्मशास्त्रम्.
## DHARMAŚĀSTRAM.

Pages, 146. Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 82*a* of the MS. described under No. 2688.

Wants the beginning and end.

A tract on Dharma śāstra treating about Sapiṇḍīkaraṇa and other matters.

Some details of information of an astrological nature are also incidentally given here.

**Beginning :**

स्मरणात् पिण्डमेकोद्दिष्टाभिप्रायम् । अनापदि तु पृथगेव कार्यम् । अन्यथा पृथक् श्राद्धं तयोः कुर्यादिति पूर्वोक्तस्मृतिविरोधः स्यात् । एवं च पित्रोस्सह्वात-मरणेऽनुमरणे च सपिण्डीकरणान्तं सह कुर्यात् । तदुत्तरभाविश्राद्धं सर्वं पाक्षि-क्येन पृथक् कुर्यात् इति निर्णयः ।

सपिण्डानां सहमरणे श्राद्धसम्पाते ऋष्यशृङ्गः—
भवेद्यदि सपिण्डानां युगपन्मरणं तथा ।
सम्बन्धासत्तिमालोक्य तत्क्रमात् श्राद्धमाचरेत् ॥ इति ।

**End:**

शातातपः—
बन्धुभिर्ज्ञातिभिर्वापि सपिण्डीकरणे कृते ।
देशान्तरस्थितानां तु पुत्राणां तु कथं भवेत् ॥
सपिण्डीकरणं कर्ता कुर्यादेकादशेऽहनि ॥ इति ॥

---

No. **14290.** गायत्र्यक्षरध्यानम्.

GĀYATRYAKṢARADHYĀNAM.

Pages, 3. Lines, 6 on a page. Character, Telugu.

Begins on fol. 15[a] of the MS. described under No. 2688.

Complete.

Same work as that described under No. 6237 ante but with the additional stanzas at the end as given below:—

प्रत्यक्षफलदा ब्रह्मविष्णुरुद्रा इति स्थितिः ॥
आग्नेयं प्रथमं मन्त्रं वायव्यं तु द्वितीयकम् ।
तृतीयं सूर्यदेवत्यं चतुर्थं वैद्युतं तथा ॥
पञ्चमं यमदेवत्यं वारुणं षष्ठमुच्यते ।
बार्हस्पत्यं सप्तमं तु पार्जन्यं त्वष्टमं विदुः ॥
* * *
वैष्णवं च चतुर्विंशमेवमक्षरदेवताः ।
जपकाले तु संस्मृत्य तासां सायुज्यमाप्नुयात् ॥

---

No. **14291.** सन्ध्यावन्दनविधिः.

SANDHYĀVANDANAVIDHIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 159b of the MS. described under No. 2688.

Complete.

Deals with the performance of the Sandhyāvandana or the morning, midday and the evening prayer of the twice-born.

**Beginning:**

अथ सन्ध्या । तत्र नारायणः—
संशोध्य दन्तानाचम्य विधिना स्नानमाचरेत् ।
प्रातर्मध्याह्नयोस्स्नानं वानप्रस्थगृहस्थयोः ॥

यतेस्त्रिषवणस्नानं सकृत्तु ब्रह्मचारिणः ।
सर्वे वापि सकृत्कुर्युरशक्तौ चोदकं विना ॥
प्रातस्संक्षेपतस्स्नानं होमाद्यर्थं तदिष्यते ।

**End:**

अत्र व्यासः—

यद्रात्र्या कुरुते पापं कर्मणा मनसा गिरा ।
तिष्ठन्वै पूर्वसन्ध्यायां प्राणायामैर्व्यपोहति ॥
यदह्ना कुरुते पापं कर्मणा मनसा गिरा ।
आसीनः पश्चिमां सन्ध्यां प्राणायामैर्व्यपोहति ॥
तदा मध्याह्नसन्ध्यायामासीनस्तिष्ठतोऽपि वा ।
गायत्र्यावाहनपूर्वमेव कर्तव्यम् ॥

---

No. **14292.** प्रायश्चित्तविधिः.
PRĀYAŚCITTAVIDHIḤ.

Pages, 8. Lines, 7 on a page.
Begins on fol. 162*a* of the MS. described under No. 2688.
Incomplete.
On the performance of certain expiatory ceremonies prescribed in case of certain defaults, mistakes, etc.

**Beginning:**

यदा तूच्छिष्टान् द्विजान् रजस्वला स्पृशति तदा . . . . . . . .
. . . . . . . . . . .
अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेत्

इति मार्कण्डेयोक्तं द्रष्टव्यम् ॥ एवमवकीर्णिप्रायश्चित्तप्रसङ्गात् कतिचिदनुपातकभूतप्रायश्चित्तान्यपि व्याख्याय प्रकृतमनुसरामः—तत्रावकीर्ण्यनन्तरं सुतानाश्चैव विक्रय इत्युक्तम्, तत्र मनुयोगीश्वरोक्तानि त्रैमासिकादीनि कामाकामजातिशक्त्याद्यपेक्षया पूर्ववत् व्यवस्थापनीयानि,। यत्तु शङ्खवचनम्—देवगृहप्रतिश्रमोद्यानारामसभाप्रपातटाकपुण्यसेतुसुतविक्रयं कृत्वा तप्तकृच्छ्रं समाचरेदिति.

**End:**

यश्च वेदात्, विप्लावयति, यश्च रक्षणक्षमोऽपि तस्करव्यतिरिक्तं शरणागतमुपेक्षते, सोऽपि संवत्सरं यवोदनं भुञ्जानश्शुध्यति तत्र विप्लवश्च वेदात्.

No. 14293. ऋग्वेदमन्त्रप्रश्नभाष्यम्.

ṚGVĒDAMANTRAPRAŚNABHĀṢYAM.

Pages, 23. Lines, 7 on a page.

Begins on fol. 54a of the MS. described under No. 2702.

Complete.

Gives the meaning of the Vedic Mantras relating to the performance of household ceremonies, such as Aupāsana, Upanayana, etc., by Ṛgvēdins

**Beginning:**

अग्निमुखमन्त्राणामर्थः कथ्यते—

. . . . . . . . . .

विनियोगं ब्राह्मणं च मन्त्रस्यार्थं तथैव च ।

एकैकस्य ऋषेस्सोऽपि . . . . ॥

अर्थपरिज्ञाने फलं तदज्ञाने दोषं चाह—

मन्त्रार्थज्ञो जपन् जप्यं तथैवाध्ययनं द्विजः ।

स्वर्गलोकमवाप्नोति . . . . . . . ॥ इति

अग्निप्रतिष्ठापने जुष्टो दमूना इति । हे अग्ने जुष्टः सर्वैः सेवितः दमूनाः दानमनाः शान्तमना वा . . . . . . . . . विद्वान् ज्ञानवान् एवंभूतस्त्वं नः अस्माकं दुरोणे दुरोण इति गृहनाम गृहे इमं यज्ञमुपयाहि उपगच्छ ।

**End:**

अहं गर्भमदधामिति । अहं होता ओषधीषु शाल्यादिषु फलार्थं गर्भमदधां धारयामि । विश्वेषु सर्वेषु अन्येष्वपि भुवनेषु भूतजातेषु । अन्तर्मध्ये अहमेव गर्भं धारयामि । तथा पृथिव्यां भूम्यां प्रजाः

• • • •

यथा द्युलोके इन्द्रः प्रधानभूतः तस्य गर्भत्वेन निरूप्य तथा वायुर्दिग्भ्यो भवति तेनासावासां गर्भं यथासामेते गर्भा एवं ते गर्भं दधामीति ॥

**Colophon:**

इति मन्त्रार्थाः ॥

---

No. 14294. वास्तुशान्तिहोमः.

VĀSTUŚĀNTIHŌMAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 66a of the MS. described under No. 2702.

Incomplete.
Similar to the work described under No. 3418 ante.

**Beginning:**

अथातस्सम्प्रवक्ष्यामि वास्तुहोमविधिं गुरो ।
कर्तव्यं मन्दिरेदेशे(राधीशः) नूतनागारवेस्मनि(शने) ।
इदानीं नवगेहस्य वास्तुपूजाविधिं शृणु ।
पुण्याहवाचनं कृत्वा आचार्यं वरयेद् द्विजम् ॥
भक्त्या तु वरयेद्भक्त्या वास्तुदेवार्चनाय च ।
दिग्विदिक्पतिपूजार्थं वरयेच्चतुरो द्विजान् ॥

**End:**

जातवेदस इति मन्त्रेणाज्यहोमं समाचरेत् ।

अष्टोत्तरशतं हुनेत । क्षेत्रस्य पतिनेति मन्त्रेण तिलाज्यैः कृसरैरपि दिक्पालकान् जुहुयात्

---

## No. 14285. जातकर्मादिमन्त्रार्थः.
## JĀTAKARMĀDIMANTRĀRTHAḤ.

Pages, 74. Lines, 7 on a page.

Begins on fol. 68*a* of the MS. described under No. 2702.
Incomplete.
Gives the meaning of the Vēdic Mantras relating to the ceremonies from Jātakarma to Samāvartana to be performed by the Ṛgvēdins.

**Beginning:**

. . युक्तमन्त्राणामर्थः। प्र ते ददामीति। हे कुमार ते तुभ्यं मघोनां हविर्लक्षणधनवतां गोवृतस्य वेदं स्तोकं प्रददामि देवताभिर्गुप्तो रक्षितस्त्वमायुष्मान् भूत्वास्मिन् लोके शतं शरदो जीव । मेधां त इति । हे कुमार ते तुभ्यं देवः (सविता मेधामा)दधातु । तथा सरस्वती देवी मेधामादधातु ।

**End:**

इति मन्त्रार्थः । ब्रह्मचार्यसीति । इदानीं ब्रह्मचार्यसि । अतः अपोऽशान मूत्रपुरीषादौ शास्त्रविहितमाचमनं कुर्वित्यर्थः । कर्म कुरु यच्छास्त्रविहितं सन्ध्योपासनादि ।

* * * *

यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वाधीतविद्यः स्नाति स विद्याव्रतस्नातक इति ॥

## No. 14296. धर्मशास्त्रवचनानि.

## DHARMAŚĀSTRAVACANĀNI.

Pages, 34. Lines, 7 on a page.

Begins on fol. 105*a* of the MS. described under No. 2702.

Incomplete.

Deals with various subjects, such as the duration of pollutions, Sapiṇḍa relationship, the temporary postponement of marriages, etc. Quotations from the Dharmaśāstra works are cited in support.

**Beginning:**

नृसिंहपारिजाते अथ तेषां शुद्धिकाला उच्यन्ते ।

अग्निस्मृतौ—

पुंजन्मनि सपिण्डानां दशाहाच्छुद्धिरिष्यते ।

त्र्यहादेकोदकानां च एकाहं सूतकं क्वचित् ॥

स्त्रीजन्मनि सपिण्डानां सोदकानां त्र्यहाच्छुचिः ।

स्त्रीषु त्रिपुरुषं ज्ञेयं सपिण्डत्वं द्विजोत्तमैः ॥

सपिण्डादीनां लक्षणं तत्रैवोक्तम् ।

**End:**

अत्र कन्यामाता कर्मप्रारम्भात्प्राग्रजस्वला चेत् कन्यादाननिषेध उच्यते माधवीये—

प्रारम्भात्प्राग्विवाहस्य माता यदि रजस्वला ।

निवृत्तिस्तस्य कर्तव्या सद्दृत्वश्रुतिचोदनात् ॥ इति.

---

## No. 14297. गृह्यचन्द्रिका.

## GṚHYACANDRIKĀ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 121*a* of the MS. described under No. 2702.

Incomplete.

A treatise relating to the performance of certain household ceremonies. The portion contained here deals with Aśauca, Śrāddha and Malamāsa.

It is stated in the end that this MS. is based on the book belonging to Bangalore Nāraṇabhaṭṭa.

**Beginning:**

अथाशौचविषये पितृमातृसपत्नीमातृपितृव्यादिज्ञातीनां दशरात्राशौचं बहिर्दशाहे मातापित्रोर्विना सुतादिज्ञातीनां मासत्रयपर्यन्तं त्रिरात्रं तदूर्ध्वं षण्मा-

सपर्यन्तमेकार्धदिनं तदूर्ध्वं नवमासपर्यन्तं दिवाश्रुतं चेद्दिवामात्रं रात्रिश्रुतं चेद्रात्रिमात्रं तदूर्ध्वं स्नानमात्रमेतेषामेवं दशपुरुषपर्यन्तं तदूर्ध्वमन्तर्दशाहेऽपि त्रिरात्रं बहिर्दशाहे स्नानमात्रम् ।

* * * *

गृह्यचन्द्रिकायां द्वितीयाध्यायेऽष्टादशखण्डे अथ मलमासविषये एकस्मिन् वत्सरे द्वौ मासावेकनामा षष्टिदिनो मासः तदर्धं मलमासस्तदर्धं निजमास उत्तरे मतादिदेवकार्यं कुर्यात् ।

**End :**

एकस्मिन् मासे मृताहेन सम्भवे चेत् पूर्वमासे कर्तव्यं लुप्तमासे त्वेकादश इति वेङ्कटकृष्णवेदिनारणभट्ट पुस्तकरीत्या.

---

## No. 14298. श्राद्धादिविषयवचनानि.
## ŚRĀDDHĀDIVIṢAYAVACANĀNI.

Pages, 14. Lines, 7 on a page.

Begins on fol. 123*a* of the MS. described under No. 2702.

Incomplete.

Prose passages relating to the performance of the funeral ceremonies of a person.

**Beginning :**

अद्य दशाहमारभ्य षोडशश्राद्धपर्यन्तं भवन्तः कुर्वन्त्विति कुशादान . . . . . . . कुशान् गृहीत्वा स्नात्वा यजमानाया भर्तुरिति षोडशश्राद्धपर्यन्तं कर्तव्यम् । प्रेतभार्य(या) पञ्चमेऽहनि स्नात्वा षोडशश्राद्धादि यथोक्तं कर्तव्यम् । समीपे बान्धवादिविप्रो नास्ति चेत् अन्यस्त्रिया कर्तव्यमितिकेचित्पक्षः ।

* * * *

षष्टि त्रीणि शतानि पलाशवृन्तानि सम्पाद्य चत्वारिंशच्छिरसि दश ग्रीवायां शतं बाह्वोः दशाङ्गुलीषु त्रिंशदुरसि विंशतिः जठरे

**End :**

द्वितीयाद्यनुमासिकानां द्वयोरेकस्मिन् काले कृत(ति)श्चेत् षट् पिण्डान् तृतीदिद्वादशपर्यन्तमेकस्मिन् काले सपिण्डीकरणं कृतं चेत्रिपिण्डान्.

## No. 14299. आशौचदीपिका.
## ĀŚAUCADĪPIKĀ.

Pages, 24. Lines, 7 on a page.

Begins on fol. 130*a* of the MS. described under No. 2702.

Incomplete.

A treatise dealing with pollutions due to the birth or death of certain relations: by Kambhālūr Nṛsiṁha who says in the beginning that he consulted Candrikā, Smṛtiratna, Smṛtisārasamuccaya, Smṛtisaṅgraha and other works.

**Beginning:**

विष्णो(ष्णुं) समस्तगजकुम्भविदारणेशं प्रह्लादपालनपटुं भवनाशनास्यम्।
वन्दे नृसिंहं भजतामभीष्टदं गुरुं तथाज्ञानतमोदिवाकरम् ॥
कम्भालुरुनृसिंहाख्यविदुषा विदुषां मुदे ।
आशौचदीपिकाग्रन्थः कृतो ह्याशौचशुद्धये ॥
चन्द्रिकां स्मृतिरत्नं च स्मृतिसारसमुच्चयम् ।
स्मृत्यर्थसारमालोक्य तथा च स्मृतिसङ्ग्रहम् ॥
आलोक्य षडशीतिं च विज्ञानेश्वरमेव च ।
हेमाद्रिं माधवीयं च अर्थसङ्ग्रहमेव च ॥
भागुरिं कौमुदीं चैव कालिदासीयमेव च ।
मेधातिथिं पारिजातमपरार्कार्णवौ तथा ॥
यथामति यथाशास्त्रं वक्ष्याम्याशौचनिर्णयम् ।

च[1]तुर्वर्णाश्रमाणां धर्मा निरूपितास्तेषु धर्मेषु शुद्धस्यैवाधिकारः । शुचिना कर्म कर्तव्यमिति स्मृतेः । "श्रौतं स्मार्तं तथा कर्म कर्तव्यमधिकारिणा । शुचिना साधुभिश्शुद्धैः सम्यक्छ्रद्धान्वितेन वा ॥" इति ब्रह्मपुराणाच्च, सा च शुद्धिर्यद्यपि पुरुषस्य स्वाभाविकी, तथापि केनचिदागन्तुकाल्येन पापविशेषेण दानादिधर्मेष्वयोग्यो भवति । स चासौ पापविशेषस्सद्यश्शौचादिकालविशेषेणापनोद्यः । अत इदानीमाशौचं निर्णीयते । तत्र तावत्सपिण्डादिजनने मरणे वा यद्दानादिधर्मेष्वयोग्यत्वलक्षणं सपिण्डानां सम्भवति तदाशौचशब्देन बोद्धव्यम् । तच्चाशौचं सपिण्डादिमरणे जनने च सम्भवति । अत एव जननमरणयोश्चाशौचमापकत्वं मनुना दर्शितम्—"दन्तजातेऽनुजाते च कृतचौले च संस्थिते । अशुद्धा बान्धवास्सर्वे सूतकेऽपि तथोच्यते ॥" इति ।

**End:**

सपत्नीनामपि ज्ञेयं दम्पत्योश्च परस्परम् ।
सपिण्डानां त्रिरात्रं स्यादित्युवाच प्रजापतिः ॥

अस्यार्थः—

अनाहिताग्नेस्संस्कारः तत्सूतकमध्ये कृतश्चेत् तत्सूतकशेषेणैव.

---

No. **14300.** निरुक्तपरिशिष्टम्.
NIRUKTAPARIŚIṢṬAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 145*a* of the MS. described under No. 2702.
Contains the first Pariśiṣṭa complete, and the second incomplete.
Same work as that described under No. 1025 ante.

---

No. **14301.** अमरकोशपदटिप्पणम्.
AMARAKÓŚAPADAṬIPPANAM.

Pages, 9. Lines, 6 on a page.

Begins on fol. 101*a* of the MS. described under No. 8167.

Contains a small portion in the Nānārthavarga and the Liṅgādi-saṅgrahavarga.

A brief commentary on some important words occurring in the Nāmaliṅgānuśāsana.

**Beginning:**

क्लीबम् । समुदायः समूहः । प्रकाशे(ण्डे)च नृपे स्कन्धः समुदायसमूहयोः इति रुद्रः । देशविशेषे । विधानं विधिः राज्ञां न । वेतनहस्त्यन्नेऽपि विधिः रम्यं मनोहरः वार्धुषिके सज्जने च साधुः । जाया स्वभार्या, स्नुषा पुत्रादिभार्या । स्त्रीति स्त्रीमात्रं, वधूः नवोढा ।

**End:**

कान्तः सूर्येन्दुपर्यायपूर्वो(ऽयःपूर्व)कोऽपि च । . . . . . . . सूर्यकान्तः अर्ककान्तः चन्द्रकान्तः इन्दुकान्तः विधुकान्तः । अयस्कान्तः लोहकान्तः . . . . . . . . . वेदभेदः रङ्कुकः कम्बलविशेषः मृगभेदश्च.

---

No. **14302.** पुत्रजननदानविशेषः.
PUTRAJANANADĀNAVIŚEṢAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 7*a* of the MS. described under No. 13592.
Incomplete.

Deals with the nature and the religious efficacy of the gifts to be made on the occasion of the birth of a son with authoritative quotations from various works.

**Beginning:**

अस्मिन् पुत्रजननकाले दानविशेषा उच्यन्ते । तत्र वराहपुराणम्—याव-
त्कालं सुते जाते न नाडी छिद्यते नृप । चन्द्रसूर्योपरागेण तमाहुः समयं समम् ॥
हारीतेनाप्युक्तम्—जाते कुमारे पितृणामामोदात्पुण्यं[तस्मा]तदहत(स्त)स्मात् ति-
लपूर्णानि पात्राणि सहिरण्यानि ब्राह्मणमाहूय पितृभ्यः स्वधा कुर्यात् प्रजापत
ये चेति ।

* * * *

ब्रह्माण्डपुराणे—

देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् ।
आयान्ति तस्मात्तदहः पुण्यं पूज्यं च सर्वदा ॥
तत्र दद्यात्सुवर्णं च भूमिं गां तुरगं रथम् ।
छत्रं छागं च माल्यं च शयनं चासनं गृहम् ॥

**End:**

श्रीधरीये वसिष्ठः—

दत्वा गोभूहिरण्यादि ततो लग्नं निरीक्षयेत् ॥
लग्नमेव प्रशंसन्ति ज्योतिश्शास्त्रविदो जनाः ।
अरिक्तपाणिर्दैवज्ञान्पृच्छेयात्पुत्रजन्मनि ॥ इति ।

---

No. **14303.** अधिष्ठानलक्षणम् , आन्ध्रटीकासहितम्.

ADHIṢṬHĀNALAKṢAṆAM WITH TELUGU MEANING.

Pages, 20. Lines, 6 on a page.

Begins on fol. 49*a* of the MS. described under No. 13592.

Incomplete.

A treatise in Śilpaśāstra dealing with the construction of temples.

**Beginning:**

अधिष्ठानविधिं वक्ष्ये शास्त्रसङ्क्षेपतोऽधुना ।
त्रिंशा(शद)दङ्गुलमारभ्य(षट्)षड[सद]ङ्गुलवर्धनात् ॥
चतुर्हस्तावसानं स्यात् कुट्टमं द्वादशात्मकम् ।
एतद्द्वादशभूम्या तमहर्मानं तु क्रमाश्यते ? ॥

* * * *

विप्राणां चतुर्हस्तं च भूपतीनां त्रिहस्तकम् ।
सार्धं द्विहस्तभेदं च यथा राजन्यहर्म्यते(के) ॥
द्विहस्तं [द्विहस्तं] वैश्यानां प्रोक्तं चैकहस्तं तु सूत्रयेत् ।
हर्म(र्म्य)तुङ्गं वश(विशां)प्रोक्तं कुर्यान्मन्मारकोदितम् ? ॥

**End:**

पूर्ववत्स्वलङ्कृतं तुङ्गैकांशमाधिकाम् ।
पूर्वो(क्तं) तल्पदेशं तु कम्पमंशशरांशकम् ? ॥
षंशकं तु त्रिपटं वा तदूर्ध्वे चान्तरं भवेत् ।
प्रतिशैवांशमंशं च दाजनं चैव कारयेत् ? ॥
पूर्ववत्समलं कृत्वा शेषं प्रागुक्त वर्णयेत् ।
तैतलानां द्विजातीनामाल्यानां स्यरिक्रमात् ? ॥

---

## No. 14304. मध्वाष्टकम्.
## MADHVĀṢṬAKAM.

**Pages, 2. Lines, 5 on a page**

Begins on fol. 44*a* of the MS. described under No. 2038.

Complete.

Eight stanzas in praise of Madhvācārya or Ānandatīrtha, the wel. known propounder of the Dvaita school of the Védānta.

**Beginning :**

अज्ञाननाशाय सतां जनानां कृतावताराय वसुन्धरायाम् ।
मध्वाभिधानाय महामहिम्ने हताघसङ्घाय नमोऽनिलाय ॥

**End :**

मध्वाष्टकं पुण्यतमं त्रिसन्ध्यं पठन्त्यलं भक्तियुता जना ये ।
तेषामभीष्टं यदनन्तरायं श्रीमध्वनामा गुरुमङ्गलाय ? ॥

* * * *

**Colophon:**

इति श्रीमध्वाष्टकस्तोत्रं सम्पूर्णम् ॥

---

## No. 14305. विष्णुसहस्रनामस्तोत्रम्.
## VIṢṆUSAHASRANĀMASTŌTRAM.

**Pages, 14. Lines, 7 on a page.**

Begins on fol. 120*a* of the MS. described under No. 2038.

Breaks off in the Phalaśruti.

Same work as that described under No. 9008 ante, but with the additional stanzas given below :—

स्तोत्राणामुत्तमं स्तोत्रं विष्णोर्नामसहस्रकम् ।
विष्णोर्नामसहस्राख्यं कलिकाले पठन्ति ये ॥
(सर्वेषां) तु पुराणानां प्राप्नुवन्ति फलं नरः ।
श्लोकेनैकेन देवर्षे सहस्राख्योद्दि(त्थि)तेन वै ॥
पठतो यत्फलं प्रोक्तं न तत् क्रतुशतैरपि ।

---

No. 14306. रघुवंशः.
RAGHUVAMŚAḤ.

Pages, 12 Lines, 7 on a page.

Begins on fol. 127*a* of the MS. described under No. 2038.

Contains the fourth Sarga only.

Same work as that described under No. 11635 ante. By Kālidāsa.

---

No. 14307. गरुडपञ्चमीव्रतविधिः.
GARUḌAPAÑCAMĪVRATAVIDHIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 134*a* of the MS. described under No. 2038.

Complete.

On the performance of a Vrata or ceremony on the 5th day of the bright fortnight of the Śrāvaṇa month conducted with the repetition of the Garuḍamantra. This Vrata is supposed to confer long life on one's brothers.

**Beginning:**

श्रीराजोवाच—

कैलासशिखरे रम्ये सर्वदेवनिषेविते ।
वज्रवैडूर्यमाणिक्यखचिते हेमपीठके ॥

• • •

ईश्वर उवाच—

साधु साधु महादेवि यत्पृष्टोऽहं तवानघे ।
ततोऽहं सम्प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥

मासि श्रावणिके देवि सितपक्षे च पञ्चमी ।
तत्र कुर्याद्व्रतमिदं सुवासिन्या महेश्वरि ॥
दन्तधावनपूर्वं तु मङ्गलं स्नानमाचरेत् ।

**End:**

त्वां भ्रातृजीवनार्थाय कारयामास तद्व्रतम् ।
व्रताचरणमात्रेण सजीवा भ्रातरस्तथा ॥
भ्रातृसञ्जीवनं दृष्ट्वा स्वगृहं (स)मुपासती(ते) ।
यश्च(येच) कुर्वन्ति सततं द्विजाः पठनशील(लि)नः ।
यथाकामं तु सौभाग्यमाप्नुयात्तु न संशयः ॥

**Colophon:**

इति श्रीस्कान्दपुराणे गरुडपञ्चमीव्रतं संपूर्णम् ।

---

## No. 14308. शिवरात्रिव्रतकल्पः.
## ŚIVARĀTRIVRATAKALPAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 134*b* of the MS. described under No. 2038.
Incomplete.
Similar to the work described under Nos. 8535 and 8536 ante.

**Beginning:**

स्नात्वा तु नित्यकर्माणि दन्तधावनपूर्वकम् ।
देवालये गृहे वापि पूजाद्रव्याणि वाग्यतः ॥
प्रक्षाल्य पादावाचम्य प्राणायामं प्रयत्नतः ।

* * * *

माघे कृष्णचतुर्दश्यां (यावदावर्तते शिवः) ।
तावत्तस्य न भोक्ष्यामि न शयामि जगत्पते ॥
शिवरात्रिव्रतं वंदे(देव) करिष्ये म(त)व सन्निधौ ।
निर्विघ्ने सिद्धिमायान्ति प्रसन्ने त्वयि शङ्कर ॥

**End:**

पिनाकिने नमः—अक्षतान् ।
बिल्वपत्रार्कधुत्तूरमल्लिकादीनि च प्रभो ।
शतपुष्पं गृहाणेश मम देवि . . . . ॥
पार्वत्यै नमः—पुष्पम् । अथा.

## No. 14309. मङ्गलाष्टकम्.
## MANGALĀṢṬAKAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 136a of the MS. described under No. 2038.

Complete.

Same work as that described under No. 11833 ante.

---

## No. 14310. मिथ्यात्वभङ्गः.
## MITHYĀTVABHAṄGAḤ.

Pages, 2. Lines, 12 on a page.

Begins on fol. 33a of the MS. described under No. 12159.

Wants the beginning.

A portion of the work described under No. 4797 ante.

**Beginning:**

अस्तु वा मिथ्यात्वं यत्किंचित् । तथापि मिथ्यात्वमबाध्यं बाध्यं वा? आद्येऽद्वैतहानिः नहि प्रपञ्चोपाधिकं भ्रमकालनिश्चितं तन्मिथ्यात्वं निरुपाधिकभ्रमकालनिश्चिताधिष्ठानं ब्रह्ममात्रं [ब्रह्ममात्रस्य] तस्य मां प्रत्यपि सिद्धत्वात्। दृश्यत्वादेर्मिथ्यात्व एव व्यभिचारश्च । मिथ्यात्वस्य चाद्दश्यत्वेऽनुमानवैयर्थ्यं तस्य साध्यज्ञप्त्यर्थत्वात्। अन्त्ये सिद्धसाधनम् । अद्वैतश्रुतेरतत्त्वावेदकत्वं च स्यात् ।

**End:**

मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् ।
सत्यत्वस्य च सत्यत्वे सत्यत्वं स्थापितं भवेत् ॥ इति ।

किं च

धर्मस्य तदतद्रूपविकल्पानुपपत्तितः ।
धर्मिणस्तद्विशिष्टत्वभङ्गो नित्यतमो भवेत् ॥

इति तल्लक्षणम् । नचात्र मिथ्यात्वस्य सत्यत्वे धर्मिणो मिथ्यात्ववैशिष्ट्यभङ्ग उक्तः । किं त्वद्वैतहानिः । प्रत्युत भेदः किं भिन्न उताभिन्न इत्यादित्वदुक्तिरेवाभिन्नादिरूपविशिष्टमात्रनिरासकत्वेन स्वव्याघातत्वाज्जातिः। उक्तं हि एतामेव जातिमवष्टभ्य शुष्कतर्कवादिनां बौद्धचार्वाकवेदान्तिनां बालव्यामोहकहेतवः कण्ठकोलाहलाः ॥

**Colophon:**

इति सामान्यतो मिथ्यात्वभङ्गः ॥

## No. 14311. दृश्यत्वहेतुभङ्गः.
## DṚŚYATVAHĒTUBHAṄGAḤ.

Pages, 21. Lines, 12 on a page.

Begins on fol. 33*b* of the MS. described under No. 12159.

Incomplete.

An unfavourable criticism of the view of Advaita-Vēdānta that the phenomenal nature of the world establishes its unreality.

A portion of the Nyāyāmṛta which is described under R. No. 871 of the Triennial Catalogue of Sanskrit MSS. Vol. II, Part I-A.

**Beginning:**

दृश्यत्वहेतूक्तिरपि स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात् । तथाहि यः प्रत्ययः स मृषा दृष्टः स्वप्नादिप्रत्ययो यथेति बौद्धोक्तयुक्तिः छर्दिमात्रम् । इयांस्तु विशेषः—बौद्धमते अप्रामाण्यस्य स्वतस्त्वात्तदुक्तं, त्वन्मते तु प्रामाण्यस्य स्वतस्त्वात्तदयुक्तमिति । किं चेदं दृश्यत्वं वृत्तिव्याप्यत्वं वा फलव्याप्यत्वं वा, साधारणं वा, कदाचित् कथंचिद्विषयत्वं वा, स्वव्यवहारे स्वातिरिक्तसंविदपेक्षानियतिर्वा, अस्वप्रकाशत्वं वा । नाद्यः—आत्मनोऽपि वेदान्तजन्यवृत्तिव्याप्यत्वात्; अन्यथा ब्रह्मपराणां वेदान्तानां ब्रह्मज्ञानार्थं श्रवणादिविधेश्च वैयर्थ्यम् ।

**End:**

वेदान्तानां कल्पितविशिष्टपरत्वे तत्त्वावेदकत्वायोगाच्च । तरति शोकमात्मविदित्यादौ मोक्षसाधनशुद्धरूपप्रमोक्तेश्च । किं च शुद्धज्ञानाभावे तदाच्छादकस्य मूलाज्ञानस्य निवृत्तिर्न स्यात् । ज्ञानस्याज्ञाननिवर्तकत्वे हि समानविषयत्वं तन्त्रम् । न च घटादिज्ञानेष्वन्याविषयत्वमेव तत्र तन्त्रम्; गौरवात् । दीपेच्छादौ स.

---

## No. 14312. शिशुपालवधः.
## ŚIŚUPĀLAVADHAḤ.

Pages, 18. Lines, 12 on a page.

Begins on fol. 44*a* of the MS. described under No. 12159.

Contains the Sargas eight and seven.

Same work as that described under No. 11719 ant. By Māgha.

---

## No. 14313. पुनस्सन्धानप्रयोगः.
## PUNASSANDHĀNAPRAYŌGAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 104*a* of the MS. described under No. 3529.

Complete.

Similar to the work described under No. 3691 ante.

**Beginning :**

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ प्रारिप्सितस्य कर्मणः निर्विघ्न . . . . . . . . ध्यर्थमादौ श्रीसिद्धिविनायकपूजां करिष्ये । भूर्भुवादिभिरावाह्य, गणानां त्वेति मन्त्रेण षोडशोपचारपूजां कुर्यात् । एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम विच्छिन्नौपासनाग्नेः पुनरसन्धानं करिष्य इति त्रिरावृत्य । तदर्थमग्निप्रतिष्ठापनार्थं स्थण्डिलोल्लोखनाख्यं कर्म करिष्ये । प्राचीः पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत् । अथोदीचीः पुरःसंस्थं पश्चिमारम्भमालिखेत् । आद्भिरभ्युक्ष्य ।

**End :**

अनाज्ञातत्रयमन्त्रजपं करिष्ये, औपासनसागुण्यार्थं दशगायत्रीमन्त्रजपं करिष्ये । होमान्ते यज्ञेश्वराय नमः सर्वोपचारपूजां समर्पयामि ॥

---

## No. 14314. प्रत्याब्दिकश्राद्धप्रयोगः. PRATYĀBDIKAŚRĀDDHAPRAYOGAḤ.

Pages, 41. Lines, 7 on a page.

Begins on fol. 109*b* of the MS. described under No. 3529, wherein this work has been omitted in the list of other works.

Incomplete.

Similar to the work described under No. 3706 ante.

**Beginning :**

समस्तसम्पत्समवाप्तिहेतवः . . . . पादपांसवः ॥
आपदनध्वान्तसहस्रभानवः . . . पादपांसवः ॥

* * * *

स्वामिनः अस्मिन् दिवसे यजमानस्य पितुः प्रत्याब्दिकश्राद्धं कर्तुं तस्य योग्यतासिद्धिरस्त्विति, कालो मुख्यकालो मूल्याधिकारसम्पदस्त्विति, द्रव्यसिद्धिरस्त्विति, योग्यतासिद्धिरस्त्विति भवन्तो ब्रुवन्तोऽनुगृह्णन्तु । पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ अमुकस्य पितुः प्रत्याब्दिकश्राद्धे अमुकस्य पितृपितामहप्रपितामहानां गोत्राणां शर्मणां वसुरुद्रादित्यरूपाणां . . . . पुरूरवार्द्रवसंज्ञिकानां विश्वेषां देवानां च . . . . . . . . पार्वणविधानेनाम्नाद्रिद्रव्येण अद्य करिष्ये ।

End:

प्रतिष्ठितं चाभिघार्य यन्मे मातेति मन्त्रतः ।
स्वाहा पित्रादिभिर्मन्त्रैः षड्भिराज्याहुतिर्भवेत् ॥

* * * *

उपवीतं मुखाहुत्यां प्रायश्चित्ते प्रदक्षिणे ।
आवाहनं मुखान्ते स्याद्विश्वे देवास इत्यृचा ॥
गन्धादिभिर्हविश्शेषैः वा.

---

No. 14315. रामसप्तर्षिस्तोत्रम्.
RĀMASAPTARṢISTŌTRAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 130*a* of the MS. described under No. 3529.

Complete.

Same work as that described under No. 10299 ante.

---

No. 14316. गजेन्द्रमोक्षः.
GAJĒNDRAMŌKṢAḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 131*a* and not on fol. 132*a* of the MS. described under No. 3529.

Incomplete.

Same work as that described under No. 2400 ante.

---

No. 14317. कृष्णकर्णामृतम्.
KṚṢṆAKARṆĀMṚTAM.

Pages, 17. Lines, 7 on a page.

Begins on fol. 135*a* of the MS described under No. 3529, wherein this work has been given as Kṛṣṇastuti, fol. 136*a*.

Contains the stanzas 1—80 and again the stanzas 21—27 in the first Āśvāsa.

Same work as that described under No. 9885 ante. By Līlāśuka.

---

No. 14318. नामनक्षत्रादिनिरूपणम्.
NĀMANAKṢATRĀDINIRŪPAṆAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 143*b* of the MS. described under No. 3529, wherein this has been omitted to be included in the list of other works.

Incomplete.
Same work as that described under No. 13815 ante.

---

No. 14319. भागवतम्.
BHĀGAVATAM.

Pages, 25. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 2539.

Contains the Adhyāyas 1 to 5 complete, but wants the beginning in the first Adhyāya.

Same work as that described under No. 2161 ante.

---

No. 14320. नामलिङ्गानुशासनम्.
NĀMALIṄGĀNUŚĀSANAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 27a of the MS. described under No. 2539, wherein this work has been omitted in the list of other works.

Contains the Viśeṣyanighnavarga incomplete.

Same work as that described under No. 1621 ante. By Amarasiṁha.

---

No. 14321. मध्वविजयः.
MADHVAVIJAYAḤ.

पश्चिमे वरुणमुत्तरे शशिनमेवं पालिकास्थापनं कृत्वा, वल्मीकमृत्तिकां भूमिर्भूम्नेत्यनुवाकेनावेक्ष्य, मा वो रिषदिति खनित्वा, मृत्तिके हन मे पापमिति जपित्वा ।

**End:**

दिशां पतीन् नमस्यामि सर्वकामफलप्रदान् ।
कुर्वन्तु सफलं कर्म कुर्वन्तु सततं शुभम् ॥

इति प्रार्थ्य, नमस्कुर्यात्, शोभनान्ते वेदिकाचतुष्कोणेषु एकैकदेवतां गृहदेवतासमीपे निक्षिपेदित्याह भगवान् बोधायनः ।

---

No. 14392. श्राद्धविधिः.
ŚRĀDDHAVIDHIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 99*a* of the MS. described under No. 23.

Complete.

Similar to the work described under No. 3819 ante.

**Beginning:**

अपरपक्षे श्राद्धं कुर्वीत, ऊर्ध्वं वा चतुर्थ्या यदहस्संपद्येत तदहः ब्राह्मणानामन्त्र्य, पूर्वेद्युर्वा, स्नातकानेके । यतीन् गृहस्थान् साधून्वा श्रोत्रियान् वृद्धाननवद्यान् स्वकर्मस्थानभावे ।

* * * *

सर्वान्वासनेषु कुशानास्तीर्य विश्वान्देवानावाहयिष्ये इति पृच्छत्यावाहयेत्यनुज्ञातो विश्वे देवास आगतेत्यनयावाह्यावकीर्य विश्वे देवा शृणुतेममिति जपित्वा, पितॄनावाहयिष्ये इति पृच्छति ।

**End:**

विश्वे देवाः प्रीयन्तामिति दैवे वाचयित्वा, वाजेवाज इति विसृज्या मा वाजस्येत्यनुव्रज्य प्रदक्षिणीकृत्योपविशेत् ।

### No. 14393. आपस्तम्बसूत्रवृत्तिः—सूत्रदीपिका.
### ĀPASTAMBASŪTRAVṚTTIḤ : SŪTRADĪPIKĀ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 101*a* of the MS. described under No. 23.

Contains the third Paṭala of the first Praśna.

Same work as that described under R. No. 375(*b*) of the Triennial Catalogue of MSS., Vol I, Part I-B.

---

### No. 14394. बोधायनगृह्यशेषसूत्रम्.
### BŌDHĀYANAGṚHYAŚEṢASŪTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 108*b* of the MS. described under No. 23.

Contains 10th and 12th Adhyāyas of the fourth Praśna.

Similar to the work described under No. 1175 ante.

The portion contained herein deals with the sanctification of the fire for performing offerings in it by a person with his second wife when the first wife is living.

**Beginning :**

अथ गृहस्थस्य(स्तु) द्वे भार्ये विन्देत कथं तत्र कुर्यादिति यस्मिन् काले विन्देतोभावग्नि परिचरेदपराग्निमुपसमाधाय परिस्तीर्याज्यं विलाप्योत्पूय स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वारब्धायां यजमानो जुहोति, नमस्तर्ये गद, अव्यथायै त्वा स्वधायै त्वा ।

**End :**

अग्नौ विवाहस्स हि साधारणो भवति न तत्र विभाग एकत्वादग्नेरित्याह भगवान् बोधायनः ॥

---

### No. 14395. द्विभार्याग्निविभागः, प्रयोगसहितः.
### DVIBHĀRYĀGNIVIBHĀGAḤ WITH PRAYŌGA.

Pages, 15. Lines, 5 on a page.

Begins on fol. 110*a* of the MS. described under No. 23.

Complete.

Similar to the work described under No. 3639 ante.

**Beginning :**

अथातोऽग्निविभागं व्याख्यास्यामो गर्भाधानपुंसवनसीमन्तोन्नयनविष्णुबलिजातकर्मनामकरणोपनिष्क्रमणान्नप्राशनकर्णवेधनचौलोपनयनादिष्वन्यतमेषु

भार्ययोरन्यत्र प्रजासंस्कारार्थं स्थण्डिलं कृत्वोल्लिख्य संसृष्टमौपासनमुपसमाधाय संपरिस्तीर्याज्यं विलाप्योत्पूय स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा जायाभ्यामन्वारब्धो जुहोति ।

**End:**

जयप्रभृति सिद्धमाधेनुवरदानादयाग्रेणाग्निं दर्भेषु हुतशेषं निदधाति । वैश्वानरो न ऊत्या पृष्टो दिवि इति द्वाभ्यां बहुभार्यस्त्वेनं प्रयुञ्जीत

Foll. 116*b* and 117*a* contain Darśapūrṇamāsaviṣaya.

---

## No. 14396. द्विभार्याग्निद्वयसंसर्गविधिः. DVIBHĀRYĀGNIDVAYASAṀSARGAVIDHIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 117*a* of the MS. described under No. 23.

Complete.

By Śiṅgabhaṭṭa. Similar to the work described under No. 3639 ante.

**Beginning:**

द्विभार्याग्निद्वयसंसर्ग उच्यते—पूर्वोत्तराग्नी दक्षिणत उत्तरतः स्थापयित्वा, द्वयोरग्न्योः प्रातरौपासनं हुत्वा, पत्नीभ्यां सहितः प्राणानायम्य, गृह्याग्निसाध्यानां कर्मणां तन्त्रानुष्ठानसिध्यर्थमौपासनाग्निद्वयसंसर्गं करिष्य इति सङ्कल्प्य, द्वयोरग्न्योर्मध्ये स्थण्डिलोल्लेखनादिकं कृत्वा, भवतन्नस्समनसौ—अद्यनः । अग्नावग्निः—धेयम् इति द्वाभ्यामुभयोः प्रत्यक्षाग्नी स्थण्डिले युगपदेव प्रतिष्ठापयेत् । पत्नीभ्यां वा कारयेत् ।

**End:**

यस्तु कश्चन संसर्गन्न करोति द्विवह्निमान् ।
नित्यमग्नी पृथक्कार्य(र्यौ) तत्सिद्ध्यर्थं पृथक्क्रिया ॥ इति ॥

इति शिङ्गाभट्टीये द्वितीयः पक्ष उक्तः ।

---

## No. 14397. गणहोमः. GAṆAHOMAḤ.

Pages, 10. Lines, 6 on a page.

Begins on fol. 207*a* of the MS. described under No. 23.

Incomplete.

Same work as that described under No. 3603 ante.

## No. 14398. हनुमन्मालामन्त्रः.
## HANUMANMĀLĀMANTRAḤ

Pages, 2. Lines, 6 on a page.

Begins on fol. 212*a* of the MS. described under No. 23.

Complete.

Similar to the work described under No. 7678 ante.

**Beginning:**

अथ हनुमन्मालामन्त्रस्य

पञ्चास्यमच्युतमनेकविचित्रवर्णं वक्त्रं शुशङ्कविधृतं कपिराजवर्यम् ।

पीताम्बरादिमकुटैरुपशोभिताङ्गं पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥

ओं ह्रीं वं खं बं ओं नमो भगवते वीरप्रचण्डप्रतापपञ्चवक्त्रहनुमते । हं खं गतिबन्ध मतिबन्ध मार्गबन्ध चोरबन्ध ।

**End:**

ओं रं यं क्षैं ओं नमो भगवते श्रीमान् रामदूत हनूमते हुं फट् स्वाहा ।

---

## No. 14399. धर्मशास्त्रवचनानि.
## DHARMAŚĀSTRAVACANĀNI.

Page, 1. Lines, 6 on a page.

Begins on fol. 213*a* of the MS. described under No. 23.

Wants the beginning and the end.

A collection of stanzas from Dharma-śāstra works dealing with such topics such as the duration of time during which one should not take meals before eclipses, etc.

**Beginning:**

अयने विषुवे चैव चन्द्रसूर्यग्रहे तथा ।

अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते ॥

एत(द्)पुत्रविषयम् ।

सङ्क्रान्त्यामुपवासं च कृष्णैकादशिवासरे ।

चन्द्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान् गृही ॥ इति स्मरणात् ।

हेमाद्रौ प्रायश्चित्तकाण्डे—

सूर्यसोमोपरागे च उक्तकालं विना द्विजः ।

तदन्नं मांसमित्याहुर्यद्रोक्ता मांसमुक्तथा ॥

सूर्यग्रहे च नाश्नीयात्पूर्वं यामचतुष्टयम् ।
चन्द्रग्रहे तु यामांस्त्रीन् भुक्त्वा पापं समश्नुते ॥

**End:**

युगं युगद्वयं च त्रियुगं च चतुर्युगम् ।
चण्डालपतितोदक्या सूती चैव यथाक्रमम् ॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥

---

## No. 14400. उच्चोदर्की.
## UCCŌDARKĪ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 213*b* of the MS. described under No. 23.
Complete.
Same work as that described under No. 875 ante.
Fol. 214*a* contains a few sentences from Ṣaḍviṁśatisūtra.

---

## No. 14401. योगीश्वरीमन्त्रः.
## YŌGĪŚVARĪMANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 214*a* of the MS. described under No. 23.
Complete.

The due repetition of this Mantra, which is addressed to Goddess Yōgīśvarī, is supposed to be efficacious in the accomplishment of one's desires.

**Beginning:**

अस्य श्रीयोगीश्वरीमहामन्त्रस्य मार्कण्डेय ऋषिः, अनुष्टुप् छन्दः, योगीश्वरी देवता, ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम्, मम समस्ताभीष्टसिद्ध्यर्थे जपे विनियोगः ।

**End:**

योगिनि योगीश्वरी(रि) लोकभयङ्करि सकलस्थावरजङ्गमस्य मुखहृदयमाकर्षयाकर्षय सर्वस्त्रीपुरुषवशं कुरु कुरु स्वाहा ।

* * * *

सर्वस्त्रीपुरुषवशङ्कर्यै नमः सकलेष्टार्थप्रदायिन्यै नमः ।

No. **14402.** त्र्यम्बकमन्त्रः.
TRYAMBAKAMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 214*b* of the MS. described under No. 23.

Complete.

Same work as that described under Nos. 6351, 6352 ante.

---

No. **14403.** गौरीपञ्चाङ्गम्.
GAURĪPAÑCĀṄGAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 42*a* of the MS. described under No. 455, wherein this work has been omitted to be included in the list of other works.

Complete.

Same work as that described under No. 13554 ante.

---

No. **14404.** एकश्लोकः.
EKAŚLOKAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 42*b* of the MS. described under No. 455, wherein this work has been omitted to be included in the list of other works.

Complete. By Śaṅkarācārya.

Same work as that decribed under No. 4569 ante.

---

No. **14405.** पञ्चरत्नम्.
PAÑCARATNAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 455, wherein this work has been omitted in the list of other works.

Complete.

Same work as that described under No. 4630 ante; but the verses are not in order.

---

No. **14406.** चातुश्लोकाः.
CATUŚLOKĀḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 43*b* of the MS. described under No. 455, wherein this work has been omitted in the list of other works.

Wants the beginning and the end.
Similar to the work described under No. 12015 ante.
Taken from the Subhāṣitaratnabhāṇḍāgāra.

**Beginning:**

(न संसारोत्पन्नं चरि)तमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ॥
महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ।
(प्र)याताः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥

**End:**

अङ्गेन केनापि विजेतुमस्या गवेष्यते किं चलपत्रपत्रम् ।
न चेद्विशेषादितरच्छेदम्यः तस्यास्तु क(म्प)स्तु कुतो भयेन ॥

---

## No. 14407. वेदान्तकारिका.
## VEDĀNTAKĀRIKĀ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 44*a* of the MS. described under No. 455, wherein this work has been omitted in the list of other works.

Wants the beginning and end.

Stray stanzas taken from the Pañcadaśī of Vidyāraṇya, which work has been described under No. 4613 ante.

**Beginning:**

भेदोऽस्ति पञ्चकोशेषु साक्षिणो न तु भात्यसौ ।
मिथ्यात्मतान्तःकोशानां स्थाणोश्चोरात्मता यथा ॥
अन्योन्याध्यस्तरूपेण कूटस्थाभासयोर्वपुः ।
एकीभूय भवेन्मुख्यः तत्र मूढैः प्रयुज्यते ॥

**End:**

एवं विविच्य पुत्रादौ प्रीतोऽत्यन्तं निजात्मनि ।
निश्चित्य परमां प्रीतिं वीक्ष्य(क्ष)ते तमहर्निशम् ॥

Fol. 47*a* contains Rāmagāna.

## No. 14408. रामदुर्गाकवचः.
## RĀMADURGĀKAVACAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 91*b* of the MS. described under No. 633.

Complete.

Same work as that described under No. 7041 ante.

---

## No. 14409. परमभागवतादिस्तोत्रम्.
## PARAMABHĀGAVATĀDISTŌTRAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 93*a* of the MS. described under No. 633.

A eulogy on the foremost devotees of God Viṣṇu.

**Beginning**:

(रुक्माङ्ग)दार्जुनवसिष्ठविभीषणादीन्
पुण्यानिमान् परमभागवतान् स्मरामि ॥
पुण्यश्लोको नृगो राजा पुण्यश्लोको (युधिष्ठिरः) ।
पुण्यश्लोको हरिश्चन्द्रः पुण्यश्लोकः पुरूरवाः ॥

**End**:

अहल्या द्रौपदी सीता तारा मण्डोदरी तथा ।
पञ्चकन्यास्स्मरेन्नित्यं महापातकनाशनम् ॥

Fol. 93*b* contains Varadarājastōtra and Gaṅgāstōtra.

---

## No. 14410. विष्णुमातृकापूजा.
## VIṢṆUMĀTṚKĀPŪJĀ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 91*a* of the MS. described under No. 582.

Incomplete.

On a ceremonial worship of God Viṣṇu repeating, prefixed with Praṇava, each of the letters of the alphabet with a name denoting Him.

**Beginning**:

ओं अं ब्रह्मणे नमः, ओं आं विष्णवे नमः, ओं इं रुद्राय नमः, ओं ईं ओंङ्काराय, ओं उं प्रणवाय, ओं ऊं(अ) प्रक(मे)याय, ओं ऋं सर्वव्यापिने, ओं ॠं अनन्ताय ।

**End:**

एवमभ्यर्च्य देवेशं नारायणमतन्द्रितः ।
तद्रूपं चिन्तयेद्योगी प्रणवेन समाहितः ॥
साकारं वा यदा योगं नित्यं मनसि धारयेत् ।
आदित्यवर्णं पुरुषं पुण्डरीकदलेक्षणम् ॥
शङ्ख चक्र गदा पाणि पीतनिर्मलवाससम् ।
किरीटचारुकेयूरकटकादिविभूषितम् ॥
श्रीवत्सवक्षसं श्रीशं कौस्तुभोद्भासिवक्षसम् ।
चतुर्बाहुं हृषीकेशं पुण्डरीकाक्षमच्युतम् ॥
हृत्पद्मकर्णिकामध्ये स्थितमासीनमेव च ॥ इति ॥

---

No. **14411.** वेदान्तविषयश्लोकानुक्रमणिका.

VĒDĀNTAVIṢAYAŚLŌKĀNUKRAMAṆIKĀ.

Pages 2. Lines, 7 on a page.

Begins on fol. 107*a* of the MS. described under No. 582, wherein this work has been omitted in the list of other works.

Incomplete; wants the beginning.

Contains the beginnings of certain select stanzas of a philosophical character, and taken from different works.

**Beginning:**

सर्वपापप्रसक्तिं विधूय । अत्यासन्नं विना(श्राय) । आदानमीषज्ज्ञानं च । तत्कर्म यन्न बन्धाय । विरोधे गुणवादस्स्यात् । त्यज धर्ममधर्मं च । संसारमेवं निस्सारम् । कर्मणा बध्यते जन्तुः । ज्ञानमुत्पद्यते पुंसाम् । यन्न दुःखेन संभिन्नम् ।

**End:**

अणिमा महिमा । अनादिनिधना नित्या । दर्शनं स्पर्शनम् । प्रमादास्कुर्वतां तपः । उच्चैरध्ययनं पुराण ।

---

No. **14412.** रामचन्द्रमङ्गलाष्टकम्.

RĀMACANDRAMAṄGALĀṢṬAKAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 58*a* of the MS. described under No. 560.

**Complete.**

Eight stanzas invoking benediction on God Rāmacandra, worshipped at Ambala town. This is also called Ambālēśāṣṭaka.

**Beginning :**

श्रीविदेहसुताभर्त्रे सर्वलोकोपकारिणे ।
स्फुरदम्बालनाथाय रामचन्द्राय मङ्गलम् ॥
आम्नायमौलिवेद्याय हरये पीतवाससे ।
अम्बालेशाय देवाय रामचन्द्राय मङ्गलम् ॥

**End :**

य इदं सेवते पृथ्व्यामम्बालेशाष्टकं महत् ।
इह भुक्तिं परंचान्ते स नरः प्राप्नुयात्पदम् ॥

---

No. **14413.** रामकृष्णपञ्चरत्नम्.
RĀMAKṚṢṆAPAÑCARATNAM.

Page, 1. Lines, 10 on a page.

Begins on fol. 58a of the MS. described under No. 560.

Complete.

Five stanzas pronouncing benedictions on a great person named Rāmakṛṣṇa, son of Kṛṣṇaguru of Tripurahṛt family and of Kauṇḍinya-gōtra.

**Beginning :**

श्रीमत्त्रिपुरहृद्वंशक्षीररत्नाकरेन्दवे ।
कौण्डिन्यगोत्रजाताय रामकृष्णाय मङ्गलम् ॥
श्रीकृष्णगुरुपुत्राय कल्याणगुणसिन्धवे ।
अज्ञानध्वान्तसूर्याय रामकृष्णाय मङ्गलम्

**End :**

य इदं (दिदं) पञ्चरत्नानि(त्नं) यः पठेत्सततं नरः ।
भुक्तिमुक्तिमवाप्नोति भविष्यति न संशयः ? ॥

---

No. **14414.** व्यूहाराधनप्रयोगः.
VYŪHĀRĀDHANAPRAYŌGAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 58b of the MS described under No. 560.

Wants the beginning and the end.

Deals with the procedure connected with the ritualistic worship of the four deities, Vāsudēva, Saṅkarṣaṇa, Pradyumna and Aniruddha, constituting the Vyūhāvatāra of God Nārāyaṇa, as laid down in Pāñcarātrāgama.

**Beginning:**

लं नमः पृथिवीतत्त्वात्मना नारायणेन गन्धमिमं परिकल्पयामि । गन्धतन्मात्रात्मने घ्राणेन्द्रियाय गन्धमिमं गृहाण स्वाहा । हं नमः आकाशतत्त्वात्मना वासुदेवेन पुष्पमिदं परिकल्पयामि । शब्दतन्मात्रात्मने श्रोत्रेन्द्रियाय पुष्पमिदं गृहाण स्वाहा ।

**End:**

वं नमः अप्तत्वात्मना अनिरुद्धेन रसतन्मात्रात्मने जिह्वेन्द्रियायामृतोपहारनैवेद्यमिदं गृहाण स्वाहा ।

अप्रमेय परानन्द मयाद्यावाहितो भव ।
जानकीसंयुत श्रीमन्नत्र च स्थापितो भव ॥

* * * *

दैत्यारे वासुदेवावकुण्ठितो भव ते नमः ।

* * * *

सकलागमसंपूज्य सकलीकृतिमान् भव ।

---

## No. 14415. परमहंसोपनिषत्.
## PARAMAHAMSŌPANIṢAT.

Page, 1. Lines, 6 on a page.

Begins on fol. 49*b* of the MS. described under No. 306.
Complete, but wants the middle portion.
Same work as that described under No. 598 ante.

---

## No. 14416. ब्रह्मोपनिषत्.
## BRAHMŌPANIṢAT.

Page, 1. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No. 306.
Wants the beginning; otherwise complete.
Same work as that described under No. 655 ante.

---

## No. 14417. जीवन्मुक्तिप्रकरणम्.
## JĪVANMUKTIPRAKARAṆAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 41*b* of the MS. described under No. 306.
Wants the beginning; otherwise complete.

A work showing that the attainment of self-emancipation is possible even in this life: by Śaṅkarācārya.

**Beginning:**

जीवन्मुक्तिरुच्यते । तत्त्वज्ञानवासनाक्षयमनोनाशानां चैककालाभ्यासो जीवन्मुक्तिसाधनम् । तत्र केनाप्युपायेन पुनः पुनस्तत्त्वानुसन्धानं तत्त्वज्ञाने(ना)भ्यास उच्यते । तत्त्वज्ञानपूर्वमेव ज्ञातत्वात् । वासना त्रिविधा । लोकवासना, देहवासना, शास्त्रवासना चेति । तत्र सर्वे यथा न निन्दन्ति यथा स्तुवन्ति तथा आचरिष्याम इत्यभिनिवेशो देहवासना । तस्य दुस्सम्पाद[क]त्वान्मलिनत्वमेव ।

**End:**

एतꣳह वाव न तपति । स्वस्वरूपानन्दानुभवः सुखाविर्भाव मि(इ)त्युच्यते ।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थित(प्र)ज्ञस्तदोच्यते ॥ इति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्दभगवत्पूज्यपादशिष्यश्रीमच्छङ्करभगवत्पादकृतौ जीवन्मुक्तिप्रकरणं समाप्तम् ॥

---

## No. 14418. व्यासपुत्राष्टकम्.
## VYĀSAPUTRĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 58*b* of the MS. described under No. 306.

Complete.

Same work as that described under R. No. 1229 (*f*) of the Triennial Catalogue of MSS., Vol. II, Part I-A.

---

## No. 14419. अद्वैतमकरन्दः.
## ADVAITAMAKARANDAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 58*b* of the MS. described under No. 306.

Incomplete.

Same work as that described under No. 4121 ante

---

## No. 14420. आत्मानात्मविवेकः.
## ĀTMĀNĀTMAVIVEKAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 306.

Wants the beginning and the end.
Similar to the work described under No. 4559 ante.

**Beginning:**

(शरीर)द्वयहेतुः अनाद्यविद्यानिर्वचनीयं ब्रह्मैक्यज्ञानापनोद्यं ब्रह्माज्ञानम्। अवस्थात्रयं नाम जाग्रत्स्वप्नसुषुप्तिरूपम् । जागरणं नामेन्द्रियैरर्थोपलब्धिः । जाग्रत्स्थूलशरीरयोरभिमान्यात्मा विश्वः ।

**End:**

एतत्सर्वं विविच्य यो विजानाति स नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दरूप इत्यात्मानात्मविवेकं यः करोति सदा करोति स जीवन्मुक्तो भवति तरति शोकमात्मवित् । अव्यक्तोऽयमचिन्त्योऽयमिति भगवद्वचनाच्च ।

---

No. **14421.** नृसिंहस्तोत्रम्.
NṚSIṀHASTOTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 59*a* of the MS. described under No. 306.
Wants the beginning and the end.
A eulogy addressed to God Nṛsiṁha.

**Beginning:**

त्वदीक्षणक्षणक्षोभमायाबोधितकर्मभिः ।
जातान् संसरतः खिन्नान् नृहरे पाहि नः पितः ॥
अन्तर्यन्ता सर्वलोकस्य गीतः श्रुत्या युक्त्या . . . . . यः ।
यस्सर्वज्ञस्सर्वशक्तिर्नृसिंहं श्रीमन्तं तं चेतसैवावलम्बे ॥

**End:**

नृत्यन्ती तव वीक्षणाङ्गणगता कालस्वभावादिभिः
भावान् सत्त्वरजस्तमोगुणमयानुन्मीलयन्ती बहून् ।
मामाक्रम्य सदा शिरस्यतितरं संमर्दयन्त्यातुरं
माया ते शरणं गतोऽस्मि नृहरे त्वामेव तां वारय ॥

* * * *

द्युपतयो विदुरन्तमनन्त ते न च भवान्नगिरे श्रुतिमौलयः ।
त्वयि फलन्ति तु नेति त इत्यतो जय जयेति भजे तव तत्पदम् ॥

Fol. 59*b* contains seven witty stanzas.

## No. 14422. रुद्राक्षजाबालोपनिषत्.
## RUDRĀKṢAJĀBĀLŌPANIṢAT.

Pages, 8. Lines, 5 on a page.

Begins on fol. 33*a* of the MS. described under No. 285, wherein this work has been omitted in the list of other works.

Complete.

Same work as that described under No. 770 ante.

In the colophon it is wrongly written : बृहज्जाबालोपनिषत् समाप्ता.

---

## No. 14423. योगशिखोपनिषत्.
## YŌGAŚIKHŌPANIṢAT.

Pages, 2. Lines, 5 on a page.

Begins on fol. 48*a* of the MS. described under No. 285, wherein this was omitted to be included in the list of other works.

Complete.

Same work as that described under No. 748 ante.

In the colophon the work is wrongly stated as मन्त्रोपनिषत्.

---

## No. 14424. जाबालोपनिषत्.
## JĀBĀLŌPANIṢAT.

Pages, 2. Lines, 5 on a page.

Begins on fol. 50*a* of the MS. described under No. 285, wherein this was omitted to be included in the list of other works.

Wants the beginning.

Same work as that described under No. 470 ante.

---

## No. 14425. भोजनविषयवचनानि.
## BHŌJANAVIṢAYAVACANĀNI.

Pages, 2. Lines, 4 on a page.

Begins on fol. 68*a* of the MS. described under No. 285.

Wants the beginning and the end.

Some rules bearing on the taking of food by a Dvija or twice-born under certain circumstances of defilement.

**Beginning** :

भवेदुच्छिष्टसंस्पर्शो भोक्तुर्वा भो(भा)जनस्य वा ।
अन्नं तदेव भोक्तव्यं न त्याज्यं भाजनस्थितम् ॥
पुनरन्नं न भोक्तव्यं यदि भुञ्जीत किल्बिषी ।
. . . . न जपेद्देवीं शतमष्टोत्तराधिकाम् ॥

Complete, but wants the beginning as the first leaf is injured.
Similar to the work described under No. 3279 ante.

**Beginning:**

. . . . . . . हस्तेत्रे दर्शने पद्मकूर्मयोः ।
तासु सर्वस्वनाशो वा भार्यानाशो भवेद्ध्रुवम् ॥

* * * *

आवाह्य कूर्मप्रतिमामुद्धृतासीति मन्त्रतः ।
आवाह्य पद्मप्रतिमां पद्मजय्येति मन्त्रतः ॥
वस्त्रे तिलोपरि न्यस्य स्तुहेमं शतकं जपेत् ।

**End:**

अनेन विधिना कुर्याच्छान्तिमेतां समाहितः ।
एवं कृते न(दो)षो(हि) भवतीत्याह शौनकः ॥

**Colophon:**

इति शौनकोक्तपद्मकूर्मशान्तिस्समाप्ता ॥

---

No. 14430. समुद्रस्नानाङ्गतीर्थश्राद्धविधिः.
SAMUDRASNĀNAṄGATĪRTHAŚRĀDDHAVIDHIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 86 of the MS. described under No. 14426.
Apparently complete.
On the ceremony of making certain offerings to the manes of one's ancestors immediately after taking sea-bath and as subsidiary to it.

**Beginning:**

अब्धिस्नानविधिस्सम्यगधुना परिकथ्यते ।
दर्भाक्षततिलैस्सार्धं गत्वा तीरं सरित्पतेः ॥
दृष्ट्वाम्बुधिं ततः . . . साम्भःपुष्पाञ्जलिक्षतान् ।
दद्यादेतैश्च मन्त्रैश्च प्रणमेद्दण्डवद्बुधः ॥
नमस्ते सर्वतोयेन (याय) नमो गम्भीरमूर्तये ।
नमोऽस्तु . . . नादाय महातोयात्मने नमः ॥

**End:**

एतैर्मन्त्रैस्स्नापयित्वा,

ततस्तीरे समासाद्य क्षेत्रपिण्डं समाचरेत् ।

आत्मकणो ये पितृवंशजाताः मातुस्तथा वंशभवा मदीयाः ।
वंशद्वयेऽस्मिन् मम दासभूता भृत्यास्तथैवाश्रितसेवकाश्च ॥

* * * *

अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आब्रह्मभवनाल्लोकादिम(द)मस्तु तिलोदकम् ॥

---

No. 14431. ग्रहणशान्तिः.
GRAHANAŚĀNTIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 11a of the MS. described under No. 14426.

Complete.

Similar to the work described under No. 3299 ante.

**Beginning:**

अथातस्सम्प्रवक्ष्यामि प्राणिनां हितकाम्यया ।
चन्द्रसूर्योपरागौ वा *नामनक्षत्रराशिषु ॥
यस्य त्रिजन्मनक्षत्रे ग्रस्येते शशिभास्करौ ।
महारोगभयं तस्य केचिदाहुर्मनीषिणः ॥
षण्मासाद्वत्सराद्वापि अपमृत्युर्भविष्यति।
तस्माच्छान्तिं प्रवक्ष्यामि साधनाद्भक्तितस्त्वतः ॥

**End:**

जन्मभे नामभे वापि त्रिजन्मर्क्षोपरागतः ।
संजातदोष(षा)दिक्पाला! नश्यन्तु (शाम्यन्तु) मम सर्वदा ॥
इति पट्टदानमन्त्रः ॥

**Colophon:**

इति यामलोक्तोपरागशान्तिः ॥
तिलोपरि लिखेच्चक्रं त्रिशूलं च त्रिकोणकम् ।
ग्रहणशूलदोषं मे निवारय दिवाकर ॥

---

No. 14432. महादेवप्रतिष्ठा.
MAHĀDEVAPRATIṢṬHĀ.

Pages, 8. Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 14a of the MS. described under No. 14426.

---

* कर्मा(जन्मा)धानर्क्षयोरपि—इति पाठान्तरम् ।

Complete.

On details connected with the consecration of the image of God Śiva.

**Beginning:**

रुद्रप्रतिष्ठा—

महादेवप्रतिष्ठां वसन्ते उदगयने पूर्वपक्षे वा चतुर्थ्यामष्टम्यामेकादश्यां द्वादश्यामार्द्रायां श्रोणायां वा ज्योतिश्शास्त्रोक्ते वा काले पूर्वेद्युः स्नात्वा त्रि(त्रि)पुण्ड्रं मा (धृत्वा) लिङ्गं अ(का)रं वा चतुर्भुजाद्याकारं वा देवस्य प्रतिमां वा शिला(ल्प)शास्त्रोक्तमार्गेण शिल्पिभिर्निर्मितां स्नापयित्वालङ्कृत्य पि(पी)ठादौ स्थापयित्वा स्वर्णोपहिता(तां) कृत्वा नवे कलशे पूर्णे हिरण्यं यवाङ्कुरदूर्वाङ्कुराश्वत्थपर्णं पालाशपर्णमिति प्रक्षिप्याभिषिञ्चति ।

**End:**

परमात्मने नम इति द्वादशानड्वाहं ब्राह्मणान् शिवभक्तान् हरिद्रोदनं भोजयित्वा यथाशक्ति दक्षिणां ददाति । प्रतिष्ठाकर्तारं सर्वोपकरणैरर्चयित्वा ऋषभैकादशं(शकं) दद्यात् न पुत्रशिष्याणां दक्षिणाम् ॥

**Colophon:**

इति महादेवप्रतिष्ठा ॥

---

No. **14433.** ग्रहयोगशान्तिः.

GRAHAYŌGAŚĀNTIH.

Pages, 2. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 14428.

Complete; as laid down in Rudrayamala.

Similar to the work described under No. 3303 ante.

**Beginning:**

अतः परं प्रवक्ष्यामि ग्रहयोगादिशान्तिकम् ।
अमावास्यादितिथिषु ग्रहयोगो भवेद्यदि ॥
एकर्क्षे मित्रराशौ वा एकराश्यर्क्षके तथा ।
शशिसूर्यसमायुक्ते ग्रहद्वयसमन्विते ॥
दुर्भिक्षादिभयं चैव चतुर्ग्रहसमन्वितः ।
महारोगभयं राष्ट्रक्षोभं वृष्टिविनाशनम् ॥

**End :**

एवं यः कुरुते भक्त्या ग्रहदोषं विवर्ज(नाश)येत् ।
पूर्वोक्त(दोष)सङ्घैश्च विमुक्तः पुत्रवान् सुखी ॥
आयुरैश्वर्यसम्पन्नः जीवेद्वर्षशतं नरः ।
इह लोके सुखी भूत्वा पश्चाच्छिवपुरं व्रजेत् ॥

**Colophon :**

इति यामलोक्तग्रहयोगविधानं समाप्तम् ॥

Fol. 18*a* contains Navagrahasvarūpavivaraṇa.

---

No. **14434.** नवग्रहशान्तिविधिः.
NAVAGRAHAŚĀNTIVIDHIH.

Pages, 16. Lines, 8 on a page.

Begins on fol. 20a of the MS. described under No. 14426.

Complete.

Similar to the work described under No. 3647 ante.

**Beginning :**

अथातस्संप्रवक्ष्यामि सूर्यदोषापनुत्तये ।
बलहीने यदा सूर्ये दुष्टग्रहसमागमे ॥
दुर्वेधकाले चक्राब्जेर्भानुवेधोक्तमार्गतः ।
सर्वेषु दोषकालेषु ज्वररोगभयादिकम् ॥

* * * *

आयुरारोग्यसंपन्नः पुत्रपौत्रसमन्वितः ।
नृपाग्रस्नेहसंयुक्तः वाचा सिद्धियुतो नरः ॥

**Colophon :**

इति यामलोक्तसूर्यशान्तिस्समाप्ता ॥

**End :**

केतुदोषे समुत्पन्ने नाशमायाति तत्क्षणात् ।
वैरिसि(नि)महाराजा(जः) केतुदोषाद्विनाशितः ॥
केतुदोषाद्धरिश्चन्द्रश्चण्डालगृहसंस्थितः ।

* * * *

इमां केतुप्रतिमामधिदेवताप्रत्यधिदेवतासहितां सौवर्णीं स्वर्चितां सालङ्कारां केतुप्रीतिं कामयमानस्तुभ्यमहं संप्रददे, न मम न ममेति दद्यात् ॥

No. **14435.** कुहूशान्तिः.

KUHŪŚĀNTIḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 14426.

Wants the beginning; otherwise complete.

Similar to the work described under No. 3272 ante.

**Beginning:**

. . . . . . . . . . , . कुहूदोषापनुत्तये ।
आचार्यं वरयेत्पूर्वं दैवज्ञं लक्षणान्वितम् ॥
पुण्याहवाचनं कृत्वा नमस्कृत्येष्टदेवताम् ।
सप्तद्रोण्येन धान्येन पद्ममष्टदलं लिखेत् ॥

* * * *

शतनिष्कप्रमाणोऽसौ सौवर्णप्रतिमां कुहोः ।
कल्पयित्वा तदर्धेन तदर्धेन स्वशक्तितः ॥

**End:**

यास्ते राके सुमतयस्सुपेशसो याभिर्ददासि दाशुषे वसूनि । ताभिर्नो अद्येति तिलदशदानानि च (दत्वा) शतब्राह्मणभोजन चाशीर्वादः । ताभिर्नो अद्य सुमना उपागहि सहस्रपोषं सुभगे रराणा ।

No. **14436.** भानुवारजन्मनक्षत्रयोगशान्तिः.

BHĀNUVĀRAJANMANAKṢATRAYŌGAŚĀNTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 30*a* of the MS. described under No. 14426.

Complete.

Same work as that described under No. 3389 ante.

No. **14437.** भौमवारजन्मर्क्षयोगशान्तिः.

BHAUMAVĀRAJANMARKṢAYŌGAŚĀNTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 30*b* of the MS. described under No. 14426.

Complete.

Same work as that described under No. 3391 ante.

## No. 14438. मन्दवारजन्मर्क्षयोगजननशान्तिः.
## MANDAVĀRAJANMARKṢAYŌGAJANANAŚĀNTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 14426.

Complete; as laid down by Bōdhāyana.

Same work as that described under No. 3396 ante.

---

## No. 14439. उद्यद्दन्तजननशान्तिः.
## UDYADDANTAJANANAŚĀNTIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 31*b* of the MS. described under No. 14426.

Complete.

Deals with the Śānti to be performed for averting the evil effects supposed to arise when a child is born with its teeth or when dentition appears prematurely early in a child.

**Beginning:**

शिशोर्यत्तो(त्रोत्त)रे जाता दन्ताः पूर्वन्तदा कुलम् ।
विनाशयति तत्क्षेत्रं तस्माच्छान्ति समाचरेत् ॥
प्रथमे मासि दन्तानामुत्पत्तिः कलहामिदा ।
तत्रोत्तरेषामुत्पत्तिः कुलं कल्पयति क्षयम् ॥

**End:**

एवं कृते न सन्देहः सदोषोऽपि प्रणश्यति ।
कुलं च वर्धते तस्य दीर्घमायुश्च विन्दति ॥

**Colophon:**

इति बोधायनोक्तोद्यद्दन्तजननशान्तिविधिः ।

---

## No. 14440. यमलजननशान्तिः.
## YAMALAJANANAŚĀNTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 32*b* of the MS. described under No. 14426.

Complete; as laid down by Śaunaka.

Deals with the Śānti to be performed for averting the evil effects supposed to arise when the mother gives birth to twins.

**Beginning :**

वरुणं पाशहस्तं च मकरस्थं जलाधिपम् ।
ग्रहदोषोपशान्त्यर्थं वरुणं पूजयाम्यहम् ॥
गोमहिष्यश्वनारीणां यमलौ यदि जायते ।
सिनीवाल्यां प्रसूतिश्च ह्यादह्नि प्रजायते ॥
. . . द्वित्तनाशस्स्याद्वाहनानां च सक्षयः ।
सम्पद्विनाशनं कर्तुर्भवेद्राष्ट्रविनाशनम् ॥
अतस्सर्वं विचार्याथ पश्चाच्छान्तिं समाचरेत् ।

**End :**

ब्राह्मणान् भोजयेच्चैव शतं च मधुसर्पिषा ।
ताम्बूलं विप्रवचनात्कुर्यादेव प्रपूजयेत् ॥

**Colophon :**

इति शौनकीये यमलजननशान्तिः ॥

---

## No. 14441. विषनाडीजननशान्तिः.
## VIṢANĀḌIJANANAŚĀNTIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 14426.

Complete.

Same work as that described under No. 3426 ante.

---

## No. 14442. कृष्णचतुर्दशीजननशान्तिः.
## KṚṢṆACATURDAŚĪJANANAŚĀNTIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 14426.

Complete ; as laid down by Garga.

Same work as that described under No. 3482 ante, but with slight difference in the beginning and the end.

**Beginning :**

मन्दरस्थं सुखासीनं गर्गं मुनिगणावृतम् ।
नमः कृत्वा तु पप्रच्छ शौनको मुनिसत्तमः ॥
शान्तिकर्माणि सर्वाणि त्वत्तो जानाम्यहं पुरा ।
अथायो(तः) श्रोतुमिच्छामि कृष्णपक्षे चतुर्दशाम् ॥
दिवा वा यदि वा रात्रौ प्रसूतौ किं फलं वद ।

गर्गः—

कृष्णपक्षे चतुर्दश्यां प्रसूतौ षड्विधं फलम् ॥

**End:**

एवं यः कुरुते शान्तिं सर्वपापैः प्रमुच्यते ।
सर्वान् कामानवाप्नोति चिरंजीवै(वी) सुखी भवेत् ॥

**Colophon:**

इति कृष्णचतुर्दशीजननशान्तिः ॥

---

## No. 14443. गण्डनक्षत्रशान्तिः.
## GAṆḌANAKṢATRAŚĀNTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 35*a* of the MS. described under No. 14426.

Complete as laid down in Agastyasaṁhita.

Deals with the Śānti to be performed to avert the evil effects supposed to arise when a child is born, when the moon is in the constellation Citrā, Puṣya, etc., as well as when both the father and son happen to be born on the same Nakṣatra.

**Beginning:**

अथातस्संप्रवक्ष्यामि चित्रापुष्योत्तरापभम् ।
जन्मर्क्षे च प्रसूतौ तु शान्तिकर्म विधीयते ॥
चित्राद्यर्धे पुष्यमध्ये द्विपादे पूर्वाषाढर्क्षस्य पादे तृतीये ।
जातः पुत्रः पित्रोश्चोत्तरादौ मातापित्रोर्भ्रातरश्चात्मनाशः ॥

**End:**

सुरास्त्वामिति मन्त्रेण पवमानानुवाकतः ।
द्यौरशान्तेति(च) मन्त्रेण अभिषेकं समाचरेत् ॥

**Colophon:**

इत्यगस्त्यसंहितायां गण्डनक्षत्रजननशान्तिः ॥

---

## No. 14444. एकनक्षत्रजातशान्तिः.
## ĒKANAKṢATRAJĀTAŚĀNTIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 35*b* of the MS. described under No. 14426.

Complete.

Same work as that described under No. 3259 ante, but with a different colophon.

**Colophon:**

इति वृद्धगार्ग्योक्तिकनक्षत्रजननशान्तिः ॥

---

No. **14445.** शनिवारार्तवशान्तिः.
ŚANIVĀRĀRTAVAŚĀNTIḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 36*a* of the MS. described under No. 14426.

Complete.

Deals with the Śānti to be performed for averting the evil effects supposed to arise when a girl attains puberty on a Saturday.

**Beginning:**

मन्दवारे यदि भवेन्नारीणां प्रथमार्तवम् ॥
सर्वनाशो भवेत्सद्यो दारिद्र्यं भवति ध्रुवम् ॥

**End:**

पवमानस्सुवर्चनः, त्रियम्बकं, महाशान्तिदशशान्तयः पञ्च शान्तयः घोषशान्तयः, सुरास्त्वामभिषिञ्चन्तु धौतवस्त्रधारणमाज्यावलोकनम् ॥

**Colophon:**

इति यामलोक्तशनिवारार्तवशान्तिः ॥

---

No. **14446.** भानुवारार्तवशान्तिः.
BHĀNUVĀRĀRTAVAŚĀNTIH.

Page, 1. Lines, 8 on a page.

Begins on fol. 36*b* of the MS. described under No. 14426.

Complete.

Deals with the Śānti to be performed for averting the evil effects supposed to arise when a girl attains puberty on a Sunday

**Beginning:**

दिवा वा यदि वा रात्रौ भानुवारे रजस्वला ।
महाव्याधियुता चापि दुर्मार्गाभिरतिर्भवेत् ॥
तस्य शान्तिं प्रकुर्वीत तद्दोषशमनाय च ।

**End:**

(भानु)दोषविनिर्मुक्तः पुत्रायुर्धनवान् भवेत् ।

**Colophon:**

इति यामलोक्तभानुवारार्तवशान्तिः ॥

Fol. 36*b* contains Bhaumavārārtavaśānti.

---

No. 14447. आपस्तम्बपूर्वप्रयोगकारिकाः.
ĀPASTAMBAPŪRVAPRAYŌGAKĀRIKAH.

Substance, palm-leaf. Size, 16¼ × 1⅞ inches. Pages, 40. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Nāgabali 21*a*, Śamanassandhi 22*a*, Kuhūśānti 24*a*, Agninaṣṭaprāyaścitta 25*b*, Śravaṇahōma 27*b*, Punassandhānapariṣatprāyaścitta 31*a*, Anvārambhaṇaprayōga 34*b*, Sthālīpākaprayōga 35*b*, Garbhādhāna 37*a*, Puṁsavanasīmantaprayōga 38*b*, Vratacatuṣṭaya 41*a*, Dharmaśāstravacanāni 47*a*.

Complete in 400 stanzas.

Similar to the work described under No. 3694 ante. By Kapardin.

**Beginning:**

अग्निपात्रं तु भिन्नं स्यात्प्रमादादुद्वहे यदि ।
सर्वान् कपालानादाय जलभूमौ विनिक्षिपेत् ॥
प्रायश्चित्तमयिन्नेति जुहुयादाहुतिद्वयम् ।
तुभ्यं त इत्यृचं हुत्वा शेषं कर्म समापयेत् ॥

* * * *

केवलैस्तण्डुलैर्वापि तच्चूर्णेन मृदापि वा ।
गौरवर्णेन कुर्वीत स्थण्डिलं चतुरश्रकम् ॥
प्रागग्राणां तु रेखाणां ब्रह्म(ा)वैवस्वतौ ध्रुवः ।
उदगग्राणां तु रेखाणां मुकुन्देशपुरन्दराः ॥
प्राचीः पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत् ।
अथोदीचीः पुरस्संस्थं पश्चिमारम्भमालिखेत् ॥
उत्तानेन तु हस्तेन कर्तव्यं प्रोक्षणं भवेत् ।
अवाचीनेन हस्तेन कर्तव्यं स्यादवोक्षणम् ॥

**End:**

आज्यस्थाल्यां भवेन्मूलं स्रुवे मध्यं च बर्हिषाम् ।
स्रुच्यग्रं च क्रमेणैव याज्ञिकैरपरैर्मतम् ॥

सव्येन सव्यं स्पृष्ट्व(ा तु) . . दक्षिणेन तु दक्षिणम् ।
आत्मपादौ तथा भूमिं सन्ध्याकालेऽभिवादयेत् ॥

---

## No. 14448. नागबलिः.

## NĀGABALIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under the previous number. Complete.

Similar to the work described under No. 3653 ante. The procedure explained here is laid down by Bōdhayana.

**Beginning**:

अथ चतुर्थ्यां दम्पती श्मश्रुकर्म, नखनिकृन्तनं, मङ्गलस्नानं च कृत्वा सन्ध्यानन्तरं समित्समारोपणं कृत्वाग्निमुद्वास्य त्रयस्त्रिंशत्पादपरिमितां भूमिं गोमयेनोपलिप्य पञ्चवर्णैस्तण्डुलैश्चतुरश्रपुष्कराकारं लिखित्वा दक्षिणोत्तरयो र्गजाकारं प्रतिलिख्य पुष्करमध्ये इन्द्राणीं निधाय तदुपरि गौरीं प्रतिष्ठाप्यायुध निधाय तन्तून् वेष्टयित्वा ।

**End**:

क्षमन्तु मे इत्यृचं जपित्वा विप्राशीर्वचनं कृत्वा बन्धुभिस्सह गृहं प्रविश्य स्वस्तिवाचनं कृत्वा ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

---

## No. 14449. शमानसन्धिः.

## ŚAMĀNASANDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 14447.

Complete.

Same work as that described under No. 979 ante.

---

## No. 14450. कुहूशान्तिः.

## KUHŪŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 24*a* of the MS. described under No. 14447.

Complete.

Similar to the work described under No. 3272 ante. This procedure is laid down for the followers of Āśvalāyanasūtra.

**Beginning :**

सिनीवालीकुहूकाले प्रसूतिर्यदि जायते ।
नृपाश्वश्वगजाती(दी)नां महिषच्छागयोर्यदि ॥
विनाशं(शो) जायते शीघ्रं . . . . विवर्धनम् ।
पितरं चाद्यपादे तु द्वितीये हन्ति मातरम् ॥

**End :**

कद्रुद्राय आ नो भद्रा अग्नये पुरुषसूक्तम् । ईशान्यादिप्रदक्षिणं कलशपूजामन्त्रः । यस्ते देवी इति मूलमन्त्रः ; अनेन पूजाहोमं च(रे)दिति चिन्तयेत् ॥

Fol. 25*a* contains Aṅkurārpaṇaprayōga.

---

## No. 14451. अग्निनष्टप्रायश्चित्तम्.
## AGNINAṢṬAPRĀYAŚCITTAM.

Pages, 5. Lines, 7 on a page.

Begins on fol. 25*b* of the MS. described under No. 14447.

Complete.

This is intended for the followers of Āpastambasūtra.

Deals with the expiatory ceremony to be performed for the sanctification of the sacred fire when it becomes extinguished during Upanayana, marriage and other occasions.

**Beginning :**

अयमग्निरौपासनात्पूर्वं यद्यनुगच्छेत्, तत्र किं कुर्यादित्यत्राह—खेनस इत्यादि लाजहोमान्तं कुर्यात् ।

तथापस्तम्बः—

उद्वाहौपासनात्पूर्वं मनले शान्तिमागते ।
युगलाजान्तरं कर्म कृत्वा शेषं समाचरेत् ॥

यद्युपनयने त्रिरात्रात्पूर्वं, विवाहोपक्रमादूर्ध्वं चतुर्थीहोमात्पूर्वं, दहनादूर्ध्वमस्थिसञ्चयनात्पूर्वं, जातकर्मणि कृते दशरात्रात्पूर्वं तत्तदग्नि(ग्नौ) शान्तिं गते सति तद्दोषपरिहारार्थं तत्तदग्न्युत्पत्तिं करिष्य इति सङ्कल्प्य, एवंगुण—तिथौ अनया नवोढया वध्वा सह विवाहाग्नौ अनुगते सति तद्दोषपरिहारार्थं विवाहाग्न्युत्पत्तिं करिष्य इति सङ्कल्प्य, शं नो देवीरिति भस्माद्भिरवोक्ष्य ।

**End** :

अनन्तरमनाज्ञातं व्याहृत्यः प्रणवादिकम् ।
वारुण्यस्तन्तुमत्यश्च तथा तन्त्रं प्रयोजयेत् ॥
इमं मे वरुणेत्यादि चतस्रो वारुणीर्विदुः ।
तन्तुं तन्वन्नुद्बुध्यस्व त्रयस्त्रिंशत्तन्तुमती ॥

Fol. 27*b* contains Pīṭhadarbhalakṣaṇas.

---

No. **14452.** आपस्तम्बश्रावणहोमः.
ĀPASTAMBAŚRĀVAṆAHŌMAḤ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 27*b* of the MS. described under **No. 14447.**

Complete.

Similar to the work described under No. 14193 ante.

This is laid down for the followers of Āpastamba.

**Beginning** :

श्रावण्यां पौर्णमास्यां शिष्यैस्सहाचार्यः तीर्थोदकाद्यप्सु स्नात्वा प्राणानायम्य एवंविशिष्टे शुभे अभ्युदये मुहूर्ते अध्यायोपाकर्म करिष्ये—इति सङ्कल्प्य प्राणानायम्य एवंविशिष्टे शुभे अभ्युदये मुहूर्ते अध्यायोपाकर्माङ्गत्वेन प्रजापति काण्डऋषिमित्यादि नव ऋषीनुद्दिश्य

* * * *

तण्डुलविरचितस्थाण्डिले नव ऋषीन् स्थापयित्वा निवीती भूत्वा प्रजापतिं काण्डऋषिमावाहयामि, सोमं काण्डऋषिमावाहयामि ।

**End** :

इति शिष्यानध्याप्य स्विष्टकृतं च हुत्वा समित्सन्नहनं जुहुयात् । जयादिब्रह्मविसर्जनान्तं कृत्वाभ्युदयिकं कुर्यात् । एवमेवोत्सर्जनं कुर्यात् ॥

**Colophon** :

इति श्रावणहोमः ।

Foll. 30*b* and 31*a* contain Adhyāyōtsarjana.

---

No. **14453.** पुनस्सन्धानपरिषत्प्रायश्चित्तम्.
PUNASSANDHĀNAPARIṢATPRĀYAŚCITTAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under **No. 14447.**

Complete.

On the expiatory ceremony to be performed as laid down by a learned assembly with a view to make one fit to renew the sacred fire.

**Beginning:**

एवंविशिष्टे अभ्युदये मुहूर्ते ममौपासनान्तरितप्रभृत्येतत्क्षणपर्यन्तं मध्य औपासनान्तरितदोषपरिहारद्वारा पुनस्सन्धानं कर्म करिष्यमाणः तदङ्गत्वेन तदादौ शुद्ध्यर्थं महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्ये। पुण्याहवाचनं कृत्वा

* * *

अशेषे हे परिषत् मदीयविज्ञापनामवधार्य मया समर्पितामिमां यथाशक्ति परिषद्दक्षिणामुक्तदाक्षिणामिव स्वीकृत्य मम विच्छिन्नौपासनाग्नेरेतत्पुनस्सन्धानकालपर्यन्तं मध्यवर्तिनि . . मासपरिमितकाले सम्भावितानां पापानां द्वादशरात्रान्तरितकाले सर्वग्रहणातीतपर्वतारोहणसमुद्रगनद्युत्तरणादीनां पापानामपनोदकप्रायश्चित्तं निश्चित्य

* * * *

प्रायश्चित्ते त्वया सम्यगाचरिते सति त्वया विज्ञापितेभ्यः पापेभ्यो विमुक्तो भूत्वा पुनस्सन्धानाधिकारी भविष्यसीत्येषा परिषदादिशति ।

**End:**

विच्छिन्नमग्निं सन्धाय विधाय विधिवत्पुनः ।
सायमारभ्य जुहुयादाहुतीनां चतुष्टयम् ॥
पाण्याहुतिर्द्वादश पक्वपूरिका पक्वाहुतिर्बादरिकप्रमाणम् ।
आज्याहुमिर्माषनिमग्नधारा हुताशनस्योपरि षोडशाङ्गुलम् ॥
सूतकान्तरिते वह्नौ मनो या भूर्भुवस्सुवः ।
मध्ये पर्वणि सम्प्राप्ते पुनस्सन्धानकर्मणि ॥

---

No. **14454** अन्वारम्भणीप्रयोगः.

ANVĀRAMBHAṆĪPRAYŌGAH.

Pages, 3. Lines, 7 on a page.

Begins on fol. 34*b* of the MS. described under No. 14447.

Complete.

On the procedure to be observed by one once either on the new moon day or the full moon day prior to the commencement of the daily worship of the sacred fire.

**Beginning**:

प्रातरौपासनं हुत्वा वरो दक्षिणत आसीनः प्राणानायम्य एवङ्गु— तिथौ अनया सह आयु—र्थं मम पार्वणस्थालीपाकप्रारम्भाधिकारसिद्ध्यर्थं तत्राग्निरग्नाविष्णू सरस्वती सरस्वानग्निर्भगिनी च प्रधानदेवता स्विष्टकृदङ्ग- देवता, व्रीहि चरुद्रव्येणान्वारम्भणीयेन स्थालीपाकेन सद्यो यक्ष्ये। विद्युदसीत्यप उपस्पृश्य पूर्वपरिषेचनं कृत्वा अदितेऽनु(मन्य)स्व—सुव। पत्न्यवहन्ति चरुं श्रपयित्वाभिघार्य प्राचीनमुदीचीनं चोद्वास्य प्रतिष्ठितमभि घार्याग्नीन्धनाद्याज्यभागान्तेऽन्वारब्धायां सरस्वत्यै स्वाहा ।

**End**:

वृष्टिरसीत्यप उपस्पृशेत् । वृष्टि—गाम् । ततः ताम्बूलदक्षिणादि ब्राह्मणसन्तर्पणमाशीर्वचनं नीराजनमिति ॥

**Colophon**:

इत्यन्वारम्भणीया ॥

---

No. **14455**. स्थालीपाकप्रयोगः.

STHĀLĪPĀKAPRAYŌGAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 35*b* of the MS. described under No. 14447.

Contains Āgnēyasthālīpāka, Pratipaddhōma Agnihōtrikavidhi and Vibhraṣṭēṣṭi.

Similar to the work described under No. 3867 ante.

**Beginning**:

प्राणानायम्य एवंविशिष्टे—तें अनया नवोढया सहा(यु)ष्यार्थं पौर्ण- मास्येनाग्नेयेन स्थालीपाकेन श्वो यक्ष्ये। तत्राग्निः प्रधानदेवता, स्विष्टकृदङ्ग- देवता व्रीहिमयं चरुद्रव्यम् । अन्यतरस्मिन् काल उपवत्स्यामि, ब्रह्मचर्यं चरिष्यामीति सङ्कल्प्य, विद्युदसीत्यप उपस्पृश्य, अमावास्यायामप्येवम् । तत्र अमावास्यायामा(ग्नेयेन स्थालीपाके)नेति विशेषः ॥

इत्यन्वाधानम् ।

अथ प्रतिपद्धोमः—प्रतिपदि प्रातरौपासनं हुत्वा वधूं दक्षिणतः उपवेश्य स्वयमुत्तरत आसीनः प्राणानायम्य

* * * *

चरुं श्रपयित्वाभिघार्य, आग्नेयस्थालीपाकवत्सर्वं कुर्यात्। अत्र वृषभदक्षिणा नास्ति, किन्तु पूर्णपात्रदक्षिणा।

* * * *

इति प्रतिपद्धोमः।

तस्याग्निहोत्रिकविधिस्स्यात्। तस्यायं प्रयोगः—चरुं पक्त्वाग्निं परिस्तीर्य चरुणा स्रुचं पूरयित्वा भागत्रयं कृत्वा अग्नये स्वाहेति एकभागं हुत्वा तच्छेषमग्नेः पश्चात् बर्हिष्योषधीभ्य इति निर्मृज्य।

---

## No. 14456. गर्भाधानम्.
## GARBHADHANAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 37*a* of the MS. described under No. 14447.

Complete.

Slightly different from the work described under No. 3607 ante.

**Beginning:**

गर्भाधानं पुंसुवनं सीमन्तो जातकर्म च।
नामान्नप्राशनं चौलं मौञ्जीव्रतचतुष्टयम्॥
गोदानाख्यं स्नातकश्च विवाहः पैतृमेधिकम्।

इत्येतानि षोडश कर्माणि। अथ गर्भाधानमुच्यते—ऋतुस्नातायां भार्यायां शुभेऽहनि दम्पती मङ्गलस्नातौ भूत्वा रात्रौ पुण्याहवाचनं कृत्वा पत्नीं दक्षिणत उपवेश्य स्वयमुत्तरत आसीनः प्राणानायम्य एवं विशिष्टेऽभ्युदयेमुहूर्ते मम धर्मपत्न्याः प्रथमगर्भसंस्कारद्वारा सर्वगर्भसंस्कारार्थं गर्भाधानं करिष्य इति सङ्कल्पं कुर्यात्।

**End:**

अस्मद्रूपं तिलान् दर्भानपसव्यं तथैव च।
नान्दीश्राद्धे त्यजेद्विद्वान्वृद्धपूर्वन्तु सर्वदा॥ इति

यदि जीवत्पितृकस्स्यात्तर्हि पितुः प्रपितामह(हा)दीनुद्दिश्य कुर्यात्। तथा ए(ये)भ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वपुत्र(कः) इति॥

**Colophon :**

इति गर्भाधानम् ॥

---

No. **14457.** पुंसवनसीमन्तप्रयोगः.

PUMSAVANASĪMANTAPRAYŌGAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 38*b* of the MS. described under No. 14447.

Complete.

Similar to the work described under No. 3685 ante; as laid down by Bōdhāyana.

**Beginning :**

अथ पुंसवनमुच्यते—

प (पुंसवनं) . . . . . . शुभलग्ने पुण्यनक्षत्रे ज्योतिर्विदुक्तपुण्यनक्षत्रे वा सीमन्तेन सह कुर्यात् । व्यक्ते गर्भे . . . . . . . . . .

ततस्सुमुहूर्ते पुं॰सवनमसीत्यनेन यजुषा पत्न्या दक्षिणे नासिकाच्छिद्रे रसं निनयेत् । पत्नी तं रसं गर्भपर्यन्तं गिरति । अभिष्ट्वाहमिति पञ्चभिर्मन्त्रैस्त्रिः प्रोदयात्मसमारोपणं कुर्यात् । कर्मणः पुण्याहं वाचयित्वाभ्युदयिकं कुर्यादित्याह भगवान् बोधायनः । सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि षष्ठेऽष्टमे वा पत्न्याः सीमन्तोन्नयनं कर्म करिष्य इति सङ्कल्प्य ।

**End :**

नक्षत्रोदयपर्यन्तं दम्पती मौनीभूत्वाथ नक्षत्रोदये सति प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य वत्समन्वारभ्य व्याहृती[भि]श्च जपित्वा वाचं विसृजेत् ।

यस्य भार्याद्वयं वापि बह्व्यो वा यस्य यत्नतः ।
सीमन्तं सवनञ्चैव संसृष्टाग्नौ विधीयते ॥

---

No. **14458.** व्रतचतुष्टयम्.

VRATACATUṢṬAYAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 41*a* of the MS. described under No. 14447.

Complete; as laid down by **Āpastamba.**

Similar to the work described under No. 14165 ante.

**Beginning :**

व्रतानामुदगयनपूर्वपक्षाहःपुण्याहेषूपक्रमः ।

आचार्यः कुमारस्योत्तरत आसीनः कृतप्राणायामः इमं प्राजापत्यव्रतेन कर्मणा संस्करिष्य इति सङ्कल्प्य तूष्णीं केशान् वापयित्वा महापगाप्सु स्नात्वा

पवित्रपाणिः निवीती षडृषीन् समभ्यर्च्यान्ते तर्पयेत् । प्रजापतिं काण्डर्षिं तर्पयामि, सांहितीर्देवता उपनि—मि, याज्ञिकीर्देव—तर्पयामि, वारुणीर्देवता उप—मि, ब्रह्माणं स्व—मि, सदस्पतिमिति माणवको वार्यञ्जलिभिरक्षताभिश्च सन्तर्प्य ।

**End :**

वैश्वदेवकाण्डमध्यापयेदुत्सर्जनमपि पूर्ववत् । अग्ने व्रतपते काण्डर्षिभ्यः वैश्वदेवव्रतमचारिषम् । तदशकं तन्मे राधीति विशेषः ॥

व्रतेषु हि चतुर्ष्वेषु विधिवत्पूजयेदृषीन् ।
(संतर्प्य) वार्यञ्जलिभिरेतांस्तान्पूजयेदृषीन् ॥

---

## No. 14459. धर्मशास्त्रवचनानि.
## DHARMAŚĀSTRAVACANĀNI.

Pages, 5. Lines, 7 on a page.

Begins on fol. 47*a* of the MS. described under No. 14447.

A collection of stanzas taken from works on Dharmaśāstra and dealing with different topics such as the undesirability of receiving certain gifts, etc.

**Beginning :**

मृतान्नं मृतशय्या च नग्नप्रच्छादनं तथा ।
उत्क्रान्ति कालपुरुषं[च] न भूयः पुरुषो भवेत् ॥
वेपस्करं गृहं मेषीमुत्क्रान्तिप्रतिरूपकम् ।
कुरुक्षेत्रे च यद्दानमुपरागे च भोजनम् ॥
कृष्णाजिनं हयं शय्यां गजमश्वतरं तथा ।
लवणं द्विमुखीं धेनुं गृहीत्वा न पुनर्भवेत् ॥

**End :**

भानुवारे दिवा रात्रौ मन्दवारे तथैव च ।
दिवा कपित्थच्छायायां रात्रौ बोधिशमीषु च ॥
धात्रीफले च सप्तम्यामलक्ष्मीर्वसते(ति) ध्रुवम् ।
प्रज्ञाप्रतापलक्ष्मीहं सदैतद्वर्जयेन्निशि ॥
आमलक्याः फलं चैव जम्बीरं तिन्त्रिणीफलम् ।
आयुर्हानिर्यशोहानिः प्रजाहानिस्तथैव च ॥
यस्मात्तस्मान्नरो रात्रौ सदा धात्रीविवर्जयेत् ।

No. **14460.** वरमङ्गलाष्टकम्.

VARAMAṄGALĀṢṬAKAM.

**Pages, 2. Lines, 6 on a page.**

Begins on fol. 32*a* of the MS. described under No. 1165.

Complete.

Same work as that described under No. 11333 ante.

---

No. **14461.** काकमैथुनदर्शनशान्तिः.

KĀKAMAITHUNADARŚANAŚĀNTIḤ.

**Page, 1. Lines, 7 on a page.**

Begins on fol. 36*a* of the MS. described under No. 1165.

Complete; as found in the Pādmapurāṇa.

Deals with the Śānti to be performed to avert the evil effects supposed to arise if a man happens to see the crows when they pair together.

**Beginning:**

उत्पाता द्वि(वि)विधा लोका(के) दिव्यभौमान्तरिक्षजाः ।
नराणामशुभार्थाय दृश्यन्तेऽद्य कलौ युगे ॥
दिवा वा यदि वा रात्रौ यः पश्येत्काकमैथुनम् ।
स नरो मृत्युमाप्नोति . . . . . . . . . ॥
तद्दोषशमनार्थाय शान्तिकर्म समारभेत् ।
निष्कमात्रसुवर्णेन कुर्यान्मृत्युञ्जयं शिवम् ॥

**End:**

अकालमृत्युं निर्जित्य दीर्घमायुरवाप्नुयात् ।
एवं यः कुरुते सम्यक् तेन दोषः प्रमुच्यते ॥

**Colophon:**

इति पाद्मे पुराणे काकमैथुनदर्शनशान्तिस्समाप्ता ॥

---

No. **14462.** महोत्पातशान्तिः.

MAHŌTPĀTAŚĀNTIḤ.

**Pages, 6. Lines, 6 on a page.**

Begins on fol. 36*a* of the MS. described under No 1165.

Almost complete.

Deals with the Śānti to be performed to avert the evil effects supposed to arise when a pigeon sits on the house or on a pillar inside it, when crows pair together therein or enter the house or when a dog, an owl or a vulture ascends or sits on a house or makes an ominous noise like weeping.

**Beginning :**

शौनक उवाच—

सर्वशास्त्रार्थतत्त्वज्ञ ज्ञानराशे तपोधन ।
पृच्छामि त्वामहं ब्रह्मन् वसिष्ठ मुनिसत्तम ॥
उत्पाता विविधा लोके संभवन्ति कलौ युगे ।
भौमान्तरिक्षदिव्याश्च भव्यारिष्टप्रसूचकाः ॥
मनुष्या भाग्यहीनाश्च ज्ञानवेला(लेश)विवर्जिताः ।
सर्वलोकोपकारार्थं तत्प्रकारं वदस्व भोः ॥

वसिष्ठ उवाच—

यदि गेहेऽथवा स्तम्भे कपोतारोहणं भवेत् ।
काकयोः क्रीडनश्चापि गृहद्वारप्रवेशनम् ॥
शुनकोलूकगृध्रादिपिङ्गलानां गृहोपरि ।
पतनञ्च तथा तेषां रोदनञ्च दिवा निशि ॥

* * * *

तदुत्थदोषशान्त्यर्थं कुर्याच्छान्तिं विधानतः ।
स्थले गोमयसंलिप्ते सिततण्डुलसंस्थुले ॥
लिखित्वाष्टदलं पद्मं तस्मिन्निन्द्रं प्रपूजयेत् ।
हैममैरावतारूढं भूषणैरुपशोभितम् ॥

**End :**

अथ ध्यानं प्रवक्ष्यामि सर्वोपद्रवशान्तये ।
ऐरावतगजारूढं वज्रपाणिं चतुर्भुजम् ॥

* * * *

आरूढो वारु(र)णेन्द्रं दशशतनयनः शाड्वलश्यामलाङ्गो
वर्मी वीरः पताकी प्रतिभटदहनः प्रज्वलद्वज्रपाणिः ।
दोर्भिर्दिव्यायुधाद्यैर्बहुभिरपि महान् देवसेनाधिनाथो
दत्वाभीष्टानि शश्वत्परिहृतदुरितः पातु विश्वं महेन्द्रः ॥

---

No. **14463.** जातवेदसदुर्गान्यासः.

JĀTAVĒDASADURGĀNYĀSAḤ.

**Page, 1.** Lines, 7 on a page.

Begins on fol. 38*b* of the MS. described under No. 1165.

Complete.

Similar to the work described under No. 6310 ante.

**Beginning :**

जातवेदस इत्यस्य मन्त्रस्य कश्यप ऋषिः, जातवेदाग्निर्दुर्गा देवता, त्रिष्टुप् छन्दः, दुर्गाप्रीत्यर्थे विनियोगः, न्यासः—जातः—शिखायां, वेदसे—ललाटे, सुन—नेत्रयोः, वाम—कर्णयोः, सोमम्—नासिकायाम् । अराती- ओष्ठयोः, यतोनि—दन्तेन्षु, दहाति—बाह्वोः, वेदः—जिह्वायाम् ।

**End :**

अति—जङ्घयोः, अग्निः—पादयोः, रक्षतु जातवेदाः—सर्वाङ्गेषु नमः ब्रह्मतेजो ज्वालामालिनि सर्वाङ्गेषु देवि स्वाहा ॥

——

No. **14464.** नामत्रयविधानम्.

NĀMATRYAVIDHĀNAM.

Pages, 2. Lines, 7 on a page.

Begins on fol. 38*b* of the MS. described under No. 1165.

Incomplete.

Similar to the work described under No. 6470 ante; but wants the end.

**Beginning :**

नामत्रयविधानम्—

अस्य श्रीनामत्रयमन्त्रस्य नृचिद्गायत्री छन्दः, पराशरव्यासनारदामहा- ऋषयः, श्रीमहावराहो देवता; अच्युत इति बीजम्, अनन्त इति शक्तिः, गोविन्द इति कीलकं, मम सर्वारिष्टशान्त्यर्थे विनियोगः ।

**End :**

श्रीभूमिसहितं देवं मुद्यदादित्यसन्निभम् ।
प्रातरुद्यत्सहस्रांशुमण्डलोपरिसंस्थितम् ॥
अभयं वरदं चैव प्रयच्छन्तु(न्तं) मुदान्वितम् ।
एवं ध्यात्वा हरिं नित्यं परब्रह्मस्वरूपिणम् ॥

——

No. **14465.** त्र्यम्बकमन्त्रः.

TRYAMBAKAMANTRAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 39*a* of the MS. described under No. 1165.

Complete.

Same work as that described under Nos. 2351 and 6352 ante.

No 14466. सर्वशान्तिकर्मप्रकारः.
SARVAŚĀNTIKARMAPRAKĀRAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 4^a of the MS. described under No. 1165.

Complete; as found in Gārgyasaṁhitā.

Deals with all the Śāntis to be performed to avert the evil effects which are supposed to arise from various causes.

**Beginning:**

शौनक उवाच—

सम्यग्ज्ञातागमार्थस्त्वं वृद्धगार्ग्य मुनीश्वर ।
शान्तिकर्मप्रकारं च समस्तं ब्रूहि तत्त्वतः ॥

गार्ग्य (उवाच)—

साधु शौनक यत्नेन भाषितं यत्त्वयानघ ।
ग्रहशान्तिप्रकारं च नानाशास्त्रसमुद्भवम् ॥
सर्वानुष्ठार(न)सारं च सर्वोपद्रवनाशनम् ।
वक्ष्यामि मुनिशार्दूल शृणु सर्वं सविस्तरम् ॥
लोके सर्वमनुष्याणामायान्ति बहुधापदः ।
सर्वोपद्रवमूलं हि ग्रह एव न संशयः ॥

**End:**

एतदुक्त्वा(त्पा)तदोषेण मुच्यते नात्र संशयः ।
आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ॥
उत्पातशान्तिकाध्याये वृद्धगार्ग्येण धीमता ।
प्रोक्ता शान्तिरियं पूर्वमुत्पातस्य विनाशिनी ॥

**Colophon:**

इति गार्ग्यसंहितायां क्रूरपक्षिशान्तिः ॥

---

No. 14467. कपोतशान्तिः.
KAPOTAŚĀNTIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 45^b of the MS. described under No. 1165.

Complete.

Slightly different from the work described under No. 14462 ante

**Beginning** :

आरोहयेद्गृहं यस्य कपोतो हि प्रधीयते ।
स्थानहानिर्भयं तत्र यद्वानर्थपरम्परा ॥
दोषाय धनिनां गेहं दरिद्राणां शिवाय च ।
पूर्णगेहेऽर्थनाशाय शून्यगेहे समृद्धये ॥
तत्र शान्तिः प्रकर्तव्या जपहोमविधानतः ।
ब्राह्मणान् भोजयेत्तत्र स्वस्तिवाचनपूर्वकम् ॥

**End** :

ब्राह्मणान् भोजयेद्भूरिशान्तिवाचनपूर्वकम् ।
एवं यः कुरुते सम्यक् तस्माद्दोषापनुत्तये ॥

इति कपोतशान्तिः ॥

वासिष्ठे—

कपोतो विशति ग्राममारोहेद्वा विशेद्गृहम् ।
श्येनगृध्रादयो वापि तच्छून्यपि(म)चिराद्भवेत् ॥

* * * *

देवाः कपोत इत्यादि जप्तव्याः पञ्चभिर्जनैः ॥
सुदेव इति मन्त्रेण जपे चासति कल्पयेत् ॥

---

No. 14468. कदलीशान्तिः.
KADALĪŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 1165.

Complete.

Slightly different from the work described under No. 3263 ante.

**Beginning** :

कैलासशिखरे रम्ये सिंहासनगतं शिवम् ।
नारदः प्राञ्जलिर्भूत्वा नमः कृत्वाह शङ्करम् ॥
ब्रूहि सर्वेश कदलीशान्तिं मे पृच्छतः प्रभो ।
त्वत्तः सर्वा श्रुता शान्तिमु(रु)त्पातानां मया प्रभो ॥
इमामेव महादेव कृपया वक्तुमर्हसि ।
इति पृच्छो(ष्टो) नारदेन हृष्टः प्राह तदा विभुः ॥

श्रृणु वत्स प्रवक्ष्यामि सम्यक् प्रश्नस्त्वया कृतः ।
नूतनोद्यानकदली प्रतीची . . . दणा प्रति ॥
पुन्नाग[ा] नारिकेलानां नैव शान्तिर्द्विजोत्तम ।
इन्द्रे तु पुत्रलाभः स्यात् गृहदाहो हुताशने ॥

End:

कारयेद्गृहहोमं च जापयेच्च द्विजोत्तमैः ।
अभिषेकं ततः कुर्यात्कारयेन्मन्त्रपूर्वकम् ॥

Colophon:

इति कदलीशान्तिः ॥

---

## No. 14469. उत्पलशान्तिः.
## UTPALAŚĀNTIH.

Pages, 2. Lines, 7 on a page.

Begins on fol. 465 of the MS. described under No. 1165.

Complete.

Deals with the Śānti to be performed to avert the evil effects supposed to arise when mushrooms grow in a house or in the garden attached to it.

Feginning:

उत्पलस्थाने खननं कृत्वा शुभमृत्तिकाभिः पूरयेत् । तत्स्वरूपाश्च ख(म)ण्डलाकृतिः, चक्राकृतिः, दण्डकाकृतिः, हस्ताकारः । अथवा एकहस्तं, द्विहस्तं वा त्रिहस्तं वा । एकद्वित्रिचतुःपञ्चाङ्गुलं वा । अथोर्ध्वनानाविकृतिप्रकृतिः । प्रकारमुत्पलदोषेण एकमास एवार्थभयं, प्राणहानिः, शत्रुभयं विन्दन्ति । अर्धं वा स्थाननाशो भवति । कर्तव्यमुत्पलरूपमृत्युदेवताप्रतिमां सुवर्णमात्रेण महारजतेन कुर्यात् । ततो वस्त्रद्वयं तदङ्गे कर्तव्यम् । १

End:

होमानन्तरं यजमानः पूर्णाहुतिं जुहुयात् । तत आचार्यमभ्यर्च्य सवर्णा प्रतिमां सालङ्कारां पयस्विनीं(स)वत्सां गां च दद्यात् । तच्छान्त्यर्थं शतब्राह्मणभोजनं कुर्यात् ॥

Colophon:

इति उत्पलशान्तिः समाप्ता ॥

No. **14470.** उत्पलशान्तिः.
UTPALAŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.
Begins on fol. 47*a* of the MS. described under No. 1165.
Complete.
Similar to the work described under the previous number.

**Beginning**:

गृहेष्वारामगे दण्डिस्थलेषु तुरंगेषु च ।
क्षेत्रेषु द्व्यष्टगेहानामुत्पलो जायते यदि ॥
तत्तद्द्रव्यविनाशाय द(ा)रिद्र(श्च)मपि जायते ।
मध्ये सुखविनाशाय पूर्वे मित्रसमागमः ॥
आग्नेये धनलाभं च दक्षिणे मृत्युमाप्नुयात् ।

* * * *

तद्दोषपरिहारार्थं शान्तिकर्म समाचरेत् ।
कर्षमात्रसुवर्णेन तदर्धार्धेन वा पुनः ॥
रूपं च प्रतिमां कुर्यात्तत्तन्मन्त्रप्रकाशकैः ।
आवाहनादि सर्वाणि तत्तन्मन्त्रैर्नियोजयेत् ॥

**End**:

ब्राह्मणान् भोजयेत्पश्चाच्छतमर्धं तदर्धकम् ।
स्वस्तिवाचं शान्तिपाठं तद्दोषहरणाय च ॥
एवं (यः) कुरुते शान्ति सर्वदोषान् विनश्यति (नाशयेत्) ।
दीर्घमायुश्च सततं सर्वबाधाविव(र्जितम्) ॥

**Colophon**:

इति दैवज्ञवल्लभे सर्वशान्तिपटले उत्पलशान्तिस्त्रयोविंशोऽध्यायः ॥
श्रीरग्निर्बन्धुनाशाय वित्तहानिर्महद्यशः ।
बन्धुलाभः पुत्रहानिः भूचिन्ता महती गदा ।
प्रागादिदिग्विभागानामुत्पलस्य फलं भवेत् ॥

---

No. **14471.** शिथिलीशान्तिकल्पविधिः.
ŚITHILIŚĀNTIKALPAVIDHIḤ.

Pages, 4. Lines, 7 on a page.
Begins on fol. 48*a* of the MS. described under No. 1165.
Complete as laid down by Bōdhāyana
Similar to the work described under No. 3445 ante.

**Beginning :**

शिथिल्याश्च सदा सर्वमेतद्दिग्वा प्रकल्पयेत् । ?
ब्रह्माण्डतत्वनं बन्देषु सम्यक् (?) क्रमेण गेहे शिथिलीफलानि ।
सुखं विनाशं सुहृदागमं च प्रियं च पुष्टिं च तथार्थसिद्धिम् ॥
स्त्रियो विनाशं सुखमप्यनूनं भयं च राज्ञां प्रभवेदधस्तात् ।

* * * *

तत्र प्रजानां व्याधिभिः पीडा भवति च ध्रुवम् ।
सप्ताहाभ्यन्तरे कुर्याच्छान्तिकर्म शुभार्थिनः ॥
अत ऊर्ध्वं न कुर्वीत शोकरोगभयप्रदम् ।
तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याद्विधानतः ॥

शिथिलीकल्पविधिः ।

अथ शिथिलीकल्पविधिं व्याख्यास्यामः—

गृहसीमचतुष्टयने विदिक्षु स्थानेन दशाहाभ्यन्तरे शान्तिं कुर्याच्छुभं भवति । अत ऊर्ध्वं प्रजाव्याधिर्भवति । सुवर्णेन शिथिलीप्रतिमां कृत्वा मृत्युरूपं संस्मरन् मृत्युमावाहयामीत्यावाहनादि षोडशोपचारान् कृत्वा ।

**End :**

शतब्राह्मणभोजनं च कुर्यादित्याह भगवान् बोधायनः ।
मृत्युरूपशिथिलीप्रतिमापूजामावाहनादिषोडशोपचारपूजां कुर्यात् ।
ईश्वरस्य त्रियम्बकमन्त्रेण पूजाभिषेकं कुर्यात् ॥

---

## No. 14472. अमावास्याप्रसूतिशान्तिः.
## AMĀVĀSYĀPRASŪTIŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 48*b* of the MS. described under No. 1165.

Complete; as laid down by Śaunaka.

Slightly different from the work described under No. 3273 ante.

**Beginning :**

शौनकः—

भगवन् सर्वधर्मज्ञ वृद्धगार्ग्य मुनीश्वर ।
त्वत्तः सर्वं सुविज्ञातं द्र(प्र)ष्टव्यं मम विद्यते ॥
अमावास्याप्रसूतेश्च फलं शान्तिं विधिं मुने ।
तत्सर्वं ब्रूहि भगवन् मर्त्यानां हितकाम्यया ॥

गार्ग्यः—

अमावास्याप्रसूतिः स्याद्यस्य भार्या वसु(पशु)स्तदा
तदा कर्तुर्भवेन्नाशो यद्वानर्थपरम्परा ॥
विना भार्यां प्रसूतां च परित्यागो विधीयते ।
नक्षत्रतिथिलग्नानां गण्डेषु त्रिविधेषु च ॥
त्रिविधो गण्डदोषो यः कर्तुस्तस्य भवेन्मुने ।
तस्मात्सर्वप्रयत्नेन शान्तिं कुर्याज्जि(जी)विषुः ॥
शान्तिप्रकारं वक्ष्यामि शृणु शौनक यत्नतः ।
अमावास्यादिदेवानां पितॄणां प्रतिमां शुभाम् ॥
सुवर्णेन प्रकुर्वीत वित्तशाठ्यविवर्जितः ।

**End:**

अङ्गिरसो नः पितर इति मन्त्रेण ततो मृत्युञ्जयेन हुत्वा तिलव्रीहिद्रव्याहुतिहोमं तिलाक्षतदूर्वाहोमं कृत्वा जयादिपरिषेचनान्तं कृत्वा पत्नीशिशुसमो(मु)पेतयजमानस्याभिषेकं कुर्युः । प्रतिमादानं कृत्वा ब्राह्मणभोजनं दद्यात् ॥

---

No. **14473.** मूलाश्लेषाजननशान्तिः.

MŪLĀŚLEṢĀJANANAŚĀNTIḤ.

Pages, 17. Lines, 7 on a page.

Begins on fol. 51*a* of the MS. described under No. 1165.

Complete.

Deals with the śānti to be performed to avert the evil effects supposed to arise when a child is born when the moon is in the constellation Mūla or Āślēṣa.

**Beginning:**

मन्दिरस्थं सुखासीनं सुखासीनं पितामहम् ।!
प्रणम्य शिरसा भक्त्या नारदः परिपृच्छति ॥
मूलर्क्षे गण्डदोषस्य आश्लेषायास्तथैव च ।
तयोर्गण्डेषु जातानां शान्तिकर्म विधीयते ॥
श्रोतुमिच्छामि तत्त्वेन वद मे कमलासन ।
नारदस्य वचः श्रुत्वा प्रत्युवाच पितामहः ॥

* * * *

मूलादौ च द्विघटिका ज्येष्ठान्ते च तथैव च ;

अमुक्तमिति तज्ज्ञेयं तत्र जातं शिशुं त्यजेत् ॥
अमुक्तजातपुत्र(स्य) दर्शनं वर्जयेत्पिता ।
यदि दर्शनतो मृत्युः षण्मासाभ्यन्तरे भवेत् ॥

**End :**

भुञ्जीत स्वजनैस्सार्धं प्रसन्नो हृष्टमानसः ।
अनेन विधिना शान्तिं कुर्यात्सम्यग्विधानतः ॥
आयुरारोग्यबृद्ध्यर्थं तुष्टिं पुष्टिं विवर्धयेत् ।
सर्वशान्तिकरं पुण्यं सर्वसौख्यं च जायते ॥

**Colophon :**

इति पैतामहे ज्योतिश्शास्त्रे दशसाहस्र्यां संहितायां मूलाश्लेषविधिर्नाम शान्तिकर्म तृतीयोऽध्यायः ॥

---

No. **14474.** ज्येष्ठानक्षत्रजननशान्तिः.

JYEṢṬHANAKṢATRAJANANAŚANTIḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 1165.

Complete as laid down by Vṛddhagārgya.

Same work as that described under No. 3316 ante; but with slight difference in the beginning and the end and colophon:

इति वृद्धगार्ग्यसंहितायां ज्येष्ठानक्षत्रशान्तिः समाप्ता ॥

---

No. **14475.** सदन्तजननशान्तिः.

SADANTAJANANAŚANTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 61*a* of the MS. described under No. 1165.

Complete as found in Viṣṇudharmōttara.

Similar to the work described under No. 14439 ante.

**Beginning :**

दन्तजन्मनि बालानां लक्षणं तन्निबोध मे ।
उपरि प्रथमं यस्य जायते च शिशोर्द्विज ॥
दन्तैर्वा सह यस्य स्याजन्म भार्गव सत्तम ।
मातरं पितरं चाथ खादेचात्मानमेव च ॥
तत्र शान्तिं प्रवक्ष्यामि तन्मे निगदतः शृणु ।

* * * *

सूत्रोक्तैर्ब्राह्मणानां च तैश्च कुर्याच्च पूजनम् ।
पूज्याश्चाविधवा नार्यो ब्राह्मणास्सुहृदस्तथा ॥

**Colophon:**

इति विष्णुधर्मोत्तरे सदन्तोत्पत्तिशान्तिः ॥

अथोत्तरदन्तानां पूर्वजननशान्तिः—

सदन्तो जायते यस्तु दन्ताः प्रागस्य चोदिताः
कुर्वीत तस्मिन्नुत्पाते शान्तिं तांच द्विजातये ॥

**End:**

शिरस्स्नातं शुचि कृत्वा कुमारमथ वाम्बरम् ।
गजमारोपयित्वा तु शान्तिकर्म णि(च) कारयेत् ॥
ब्राह्मणान् भोजयेत्पश्चाद्यथास्वं मधुसर्पिषा ।
तेनास्य शान्तिर्भवति बलमायुश्च वर्धते ॥

---

No. **14476.** दन्तजननशान्तिः.

DANTAJANANAŚĀNTIḤ

Pages, 2. Lines, 7 on a page.

Begins on fol. 62*a* of the MS. described under No. 1165.

Complete.

Slightly different from the work described under the previous number.

**Beginning:**

यस्योत्तरे शिशु(शो)र्जाता दन्ताः पूर्वं तदा कुलम् ।
विनाशयति तत् क्षिप्रं शान्तिकर्म समाचरेत् ॥
प्रथमे मासि दन्तानामुत्पत्तिः कुलहानिदा ।
तत्रोत्तरेषामुत्पत्तिः कुलं कल्पयति क्षयम् ॥

**End:**

एवं कृते न सन्देहः स दोषोऽपि प्रणश्यति ।
कुलं च वर्धते तस्य दीर्घमायुश्च विन्दति ॥

**Colophon:**

इति दन्तजननशान्तिः समाप्ता ॥

---

No. **14477.** चतुर्दशीप्रसूतिशान्तिः.

CATURDAŚĪPRASŪTIŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 62*b* of the MS. described under No. 1165.

Complete.

Similar to the work described under No. 3310 ante. Taken from Agastyasamhitā.

**Beginning :**

सिनीवालीप्रसूता स्याद्यस्य भार्या पशुस्तथा ।
महिष्यश्च गजाश्चैव शक्रस्यापि श्रियं हरेत् ॥
एकोऽनड्वान् त्रयो गावः सप्ताश्वा नव दन्तिनः ।
नष्टेन्दौ च प्रसूताश्चेद्धरेयुस्सर्वदा श्रियम् ॥
दर्शे प्रसूतान्यन्यानि तत्प्रासादोपजीविनः ।
पशुपक्षिमृगादीनि वर्जयेयुः प्रयत्नतः ॥
कुहूप्रसूतिरत्यर्थं सर्वदा दोषदायिनी ।
यस्याः प्रसूतिरेतेषां तस्या यूयं विनश्यति ॥
सर्वगण्डसमस्तस्मिन् दोषस्तद्वत्फलं लभेत् ।
कृष्णपक्षे चतुर्दश्यां प्रसूतिर्यदि जायते ॥
चतुर्दश्यास्तु षड्भागे प्रथमे दोषवर्जितः ।
द्वितीये पितरं हन्ति तृतीये मातरं तथा ॥

**End :**

तिलदानं वस्त्रदानं कुर्याद्दोषापनुत्तये ।
सर्वशान्तिर्भवेत्तस्य अगस्त्यवचनं यथा ॥

**Colophon :**

इत्यगस्त्यसंहितायां चतुर्दशीगण्डशान्तिः समाप्ता ॥

चतुर्दश्यधिदेवता ईश्वरमृत्युञ्जयरुद्रो देवता वृषारूढः श्वेतवर्णः चतुर्भुजत्रिशूलखड्गवरदाभयपाणिः । नमश्शङ्करायेति पूजामन्त्रः । त्र्यम्बकमिति वा । चन्दनकर्पूरगन्धधुत्तूरपुष्पं दशाङ्गधूपं चतुर्विधान्नं नैवेद्यम् ॥

---

No. **14478.** कुहूशान्तिः.

KUHŪŚĀNTIḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 63*a* of the MS. described under No. 1165.

Complete.

Similar to the work described under No. 3272 ante. This work is taken from Kātyāyanasaṁhitā.

**Beginning :**

कुहूशान्तिं प्रवक्ष्यामि सिनीवाली(ल्या)स्तथैव च ।
गृहस्य पूर्वदिग्भागे उत्तरस्यामथापि वा ॥
मण्टपे वा गृहे वापि पूजास्थानं प्रकल्पयेत् ।
गोमयेनोपलिप्याथ रङ्गवल्लीः विनिक्षिपेत् ॥
पुण्याहं वाचयित्वा तु सुसङ्कल्प्य यथाविधि ।
आचार्यं वरयेद्धीमान् ब्रह्माणमृत्विजस्तथा ॥
तान् सर्वान् सम्यगभ्यर्च्य वस्त्रमाल्यविभूषणैः ।
स्थण्डिलं चतुरश्रं च तण्डुलैः कारयेत्ततः ॥
पद्ममष्टदलं कृत्वा तन्मध्ये स्थापयेद्रविम् ।
सुवर्णेन तदर्धेन तदर्धार्धेन वा पुनः ॥

**End :**

दद्याद्गोभूहिरण्यादि द्विजेभ्यो विधिपूर्वकम् ।
इत्थं पूजादि कृत्वाथ सुकृतं लब्धवानथ ॥
विप्रान् सर्वान् समाराध्य भोजयेत्पायसादिभिः ।
स्वयं बन्धुजनैस्सार्धं भुञ्जीयात्प्रीतमानसः ॥

**Colophon :**

इति कात्यायनसंहितायां कुहूसिनीवालीशान्तिः ॥

---

No. **14479.** ग्रहणजननशान्तिः.
GRAHAṆAJANANAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 65*a* of the MS. described under No. 1165.

Complete as laid down by Śaunaka.

Same work as that described under No. 3297 ante; but with some slight difference.

इति शौनककृते ग्रहणजननशान्तिः समाप्ता ॥

No. **14480.** गोमहिष्यादिद्वित्रिवत्सप्रसूतिशान्तिः.

GŌMAHIṢYĀDIDVITRIVATSAPRASŪTIŚĀNTIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 66*a* of the MS. described under No. 1165.

Complete; as laid down by Garga.

Deals with the śānti to be performed for averting the evil effects supposed to arise, when a mare or a cow or a she-buffalo gives birth to two young ones.

**Beginning:**

मन्दिरे यस्य तुरगी गौर्वा कासारिकास्तथा ।
द्वित्रिवत्साः प्रजायन्ते तस्य दोषकरं महत् ॥
तां शत्रुग्रामे संवेश्य कुर्याद्राजा विचक्षणः ।
शत्रुनाशो भवेदाशु कुलं तस्य विनश्यति ॥
न परित्यजते मर्त्यो मोहादज्ञानतोऽपि वा ।
तत्प्रजा नाशयेदाशु स्वामिनो हानिकारणम् ॥
गृहक्षेत्रधनं धान्यं ह्रस्वमायाति शीघ्रतः ।
तद्यूथरक्षणार्थं च शान्तिकर्म समारभेत् ॥
अथ शान्तिं प्रवक्ष्यामि गर्गशास्त्रानुसारतः ।

**End:**

आयुरारोग्यमैश्वर्यं सर्वदा वृद्धिमेति वै ।
कदाचित्तस्य दोषाश्च न स्पृशन्ति तमन्वहम् ॥
अश्वाभिवृद्धिर्धेनूनां महिषाणां तथैव च ।
पुत्रपौत्रसमायुक्तस्स चिरं सुखमश्नुते ॥

**Colophon:**

इति उत्तरगर्गोक्तवत्सद्वित्रिप्रसूतिशान्तिः समाप्ता ॥

---

No. **14481.** आज्यादिदानविधिः.

ĀJYĀDIDĀNAVIDHIḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 67*a* of the MS. described under No. 1165.

On the making of gifts of ghee, sesamum seeds, jaggery, etc., to Brahmans with a view to avert certain evils.

**Beginning:**

कांस्यपात्रं सप्तपलं घृतं कुडपसंमितम् ।
हेम सम्पूर्त्य(र्य) निष्कं स्यादाज्यावेक्षणलक्षणम् ॥

कामधेनोस्समुद्भूतं सर्वक्रतुषु संस्थितम् ।
देवानामाज्यमाहारमतः शान्ति प्रयच्छमे ॥
अनेन प्रार्थयेत्पात्रं घृतं स्वर्णेन संयुतम् ।

**End**:

निवर्तसंमिता भूमिः द्रोणत्रयमितास्तिलाः ।
सुवर्णं निष्कमात्रं स्यात् आज्यं संप्रस्थमात्रकम् ॥
मृदुवर्त्तिद्वयं चैव गुडं च पलषट्ककम् ।
सार्धखारिद्वयं चैव व्रीहयः परिकीर्तिताः ॥
निष्कत्रयमितं कांस्य . . . . सार्धखारितम् ।
अभावे सर्वधान्यानां सुवर्णं तत्र कारयेत् ॥

---

No. **14482.** रजस्वलाशान्तिः.

RAJASVALĀŚĀNTIḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 67*b* of the MS. described under No. 1165.

Complete.

Regarding the śanti to be performed for averting the evil consequences concieved to be associated when a girl attains puberty on certain inauspicious days.

**Beginning**:

करादिपचोत्तरमूलपूषविष्णुत्रयाश्विज्यविधीन्दुभेषु ।
आद्यं रजः सौख्यसुतायुरर्थं सौभाग्यवृद्धिं कुरुतेऽङ्गनानाम् ॥
पूर्वत्रये याम्यभुजङ्गधिष्ण्ये वैधव्यमस्या द्वि(वि)दधीत नूनम् ।
मघेशये(योः) शोकमथादिति(ते)भे सा बन्धकीन्द्रेऽप्यनले दरिद्रा ॥
फल्गुनीप्रथमे पादे(चेत्) दम्पत्योर्मृतिर्भवेत् ।
द्वितीये पुरुषं हन्ति तृतीये गृहनाशनम् ॥
चतुर्थे च स्त्रियं हन्ति नारीणां प्रथमार्तवे ।

**End**:

दक्षिणामितरेषां च दत्वा सर्वान् समाचरेत् ।
ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत भक्तितः ॥
अनेन विधिना शान्तिं कुर्यात्सम्यक् समाहितः
सर्वशान्तिकरं पुण्यं सौख्यं चैव प्रजायते ॥

**Colophon:**

इति रजस्वलाशान्तिः ॥

---

No. 14483. स्वनक्षत्रजननशान्तिः.
SVANAKṢATRAJANANAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No. 1165.

Complete.

Similar to the work described under No. 3364 ante.

**Beginning:**

स्वनक्षत्रशान्तिलक्षणम्—

यः पितुर्जन्मनक्षत्रे स दिवा पितृघातकः ।
कन्यकाजननं रात्रौ मातृभ मातृघातिका ॥

किंच

यः पुमान् जन्मनक्षत्रे पितुर्मातुश्च सोदरः ।
तस्माच्छान्तिं प्रकुर्वीत यथावित्तानुसारतः ॥
पितृजन्मर्क्षकर्मर्क्षजातः पितृविनाशकृत् ।
विशेषाच्चैकपादे च भिन्नपादे शुभावहम् ॥

**End:**

आचार्यप्रमुखेभ्यश्च ऋत्विज(भ्य)श्च यथाविधि ।
जपहोमार्चनफलं प्रतिगृह्य च सर्वशः ॥
तेषां च दक्षिणां दद्यात् प्रतिमादानपूर्वकम् ।
साङ्गोपाङ्गं तथा कृत्वा कुर्याद्ब्राह्मणभोजनम् ॥

Fol. 76*a* contains Sarpasūkta.

---

No. 14484. गुरुगीता.
GURUGĪTĀ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 115.

Incomplete.

Same work as that described under No. 2417 ante; wants the introductory stanzas in the beginning.

Foll. 53*b* and 54*a* contain Liṅgaviṣaya (logic) in Telugu language, and a few sentences of Śaṅkarācāryacarita with Telugu meaning.

### No. 14485. षडशीतिः, सव्याख्या.
### ṢAḌAŚĪTIḤ WITH COMMENTARY.

Pages, 7. Lines, 6 on a page.

Begins on fol. 80*a* of the MS. described under No. 115.
Incomplete.

Same work as that described under No. 3041 ante.

---

### No 14486. चन्द्रमौलिपञ्चकम्.
### CANDRAMAULIPAÑCAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 83*b* of the MS. described under No. 115.
Complete.

Similar to the work described under No. 10954 ante.

**Beginning:**

शिवाननारविन्दसन्मिलिन्दभावभाञ्जनो-
विनोदिने दिनेशकोटिकोटिदीप्ततेजसे ।
स्वशि(शै)वलोकतादरावलोकनैकवर्तिने
नमः शिवाय साम्बशङ्कराय चन्द्रमौलये ॥

**End:**

अखण्डदण्डबाहुदण्डदण्डितोग्रडिण्डिम-
प्रधि धिमि (धिमि) धिमिध्वनिकमोत्थताण्डवम् ।
अखण्डवैभवाय नायमण्डितं चिदम्बरं
नमः शिवाय (साम्बशङ्कराय चन्द्रमौलये) ॥

Fol. 84*a* contains Āśaucavarṇanavacanas.

---

### No. 14487. अपरविषयवचनानि.
### APARAVIṢAYAVACANĀNI.

Pages, 31. Lines, 6 on a page.

Begins on fol. 84*b* of the MS. described under No. 115.
Incomplete.

Similar to the work described under No. 3047 ante.

**Beginning:**

स्नुषामृताहे सम्प्राप्ते जीवितं श्वशुरीयति (?) ।
प्रपितामहिकभागं भागद्वयपितामहि (?) ॥

प्रेतस्य पित्रोर्यदि जीविता चेत् प्रेतार्घ्यपिण्डश्च विधिं च कुर्यात् ।
द्वौ भागयुक्तौ तु पितामहेन युक्तैकभागः प्रपितामहेन ॥

पितामहं च जीवन्तमतिक्रम्य यथा सुतः ।
अतिक्रम्य द्वये चैव सपिण्डीकरणञ्चरेत् ॥

End :

पितृक्षयाहे सम्प्राप्ते सर्वेषान्तर्पणं न हि ।
मातृक्षयाहे सम्प्राप्ते तद्वर्गे तर्पणं न हि ॥

वचनेन पितृमातृविभागेन तर्पणं निषिद्धम् । कथमिति चेत् मैवम्.

---

## No. 14488. भ्रमराम्बिकाष्टकम्.

## BHRAMARAMBIKAṢṬAKAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 101*a* of the MS. described under **No. 115.**

Complete.

Same work as that described under No. 9615 ante, but with some slight difference in the beginning.

**Beginning :**

श्रीवागीशसुरेन्द्रसेवितपदां सिंहासने संस्थितां
साङ्गैर्भूषणभूषितामभयदामार्द्रैः कटाक्षैः शुभैः ।
ऐंह्रींश्रीमितिमन्त्रराजवरदामानन्दपूर्णात्मिकां
श्रीशैलभ्रमराम्बिकां शिवसतीं चिन्मात्रमूर्तिं भजे ॥

**End :**

श्रीशैलभ्रमराम्बिकाष्टकमिदं श्रेयःप्रदं सर्वदा
ऐन्द्रं श्रीकरमप्रमेयवरदं हर्षप्रदं बुद्धिमान् ।
प्रभाते नियतः पठेद्यदि पुमान् भद्रान्तरात्मा शुचिः
सौख्यं कीर्तिमवाप्नुयाच्च विभवं सर्वाश्रयत्वं भजे(त्) ॥

---

## No. 14489. त्रिपुरसुन्दर्यष्टकम्.

## TRIPURASUNDARYAṢṬAKAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 102*b* of the MS. described under **No. 115.**

Complete.

Same work as that described under No. 10762 **ante.**

**End :**

त्रिमूर्तिजननस्थलीं त्रिभुवनैकनौकारतां
त्रिधामयपरिष्कृतां त्रिगुणरूपपारम्परीम् ॥
त्रिविष्टपपतिव्रतामुचितचक्रमध्वंसिनी
त्रियम्बककुटुम्बिनि त्रिपुरसुन्दरीमाश्रये (?) ॥

---

No. **14490.** कृष्णजयन्तीव्रतकल्पः.
KRṢṆAJAYANTĪVRATAKALPAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 113*a* of the MS. described under No 115.
Complete.
Same work as that described under No. 8270 ante.

---

No. **14491.** जन्माष्टमीव्रतकल्पः.
JANMĀṢṬAMĪVRATAKALPAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 116*a* of the MS. described, under No. 115.
Complete; as found in the Padmapurāṇa, but wants the beginning.
Similar to the work described under No. 8266 ante.

**Beginning :**

देवीं स्वच्छाम्बरयुतां सर्वाभरणभूषिताम् ।
श्रीकृष्णवदनाम्भोजे निक्षिप्य कुचमण्डलम् ॥
ततः श्रीमच्चसंविष्टं गोविन्दं बालकं मुदा ।
लालयन्तीं प्रसन्नास्यां वन्दे हं देवकीं पराम् ॥
अदितिर्देवमातस्त्वं सर्वपापप्रणाशिनि ।
त्वामहं स्थापयिष्यामि प्रसन्ना भव शोभने ॥

* * *

ईश्वर उवाच—

शृणु देवि हितं पुण्यं सर्वलोकहितावहम् ।
अनन्तसुखदं नृणां वक्ष्यामि सुकृतं परम् ॥
कृष्णाष्टमी पुण्यतमा श्रावणे मासि पार्वशे(ति) ।
तस्यामहर्निराहाराज्जन्मेष्टार्थफलं लभेत् (?) ॥

तस्यामुपोषयेद्भक्त्या कृष्णमभ्यर्च्य भक्तितः ।
गङ्गास्नानफलं तेन लभेद्यज्ञायुतं फलम् ॥

**End:**

यद्व(दि)दं पुण्यमाख्यानं यश्शृणोत्यघनाशनम् ।
तस्य पुत्राश्च पौत्री च वर्धन्ते सुकृतं शुभे ॥

**Colophon:**

इति श्रीपद्मपुराणे जन्माष्टमीव्रतकल्पं संपूर्णम् ॥

---

No. **14492.** सङ्क्रान्तिनिर्णयः.

SAṄKRĀNTINIRṆAYAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 123*a* of the MS. described under No. 115.

Incomplete.

Similar to the work described under No. 3149 ante.

**Beginning:**

सङ्क्रान्तिनिर्णयमाह—

कर्कटो मकरस्सिंहः कुम्भोऽलिर्वृषभस्तुला ।
मेषः कन्या धनुर्मीनो मिथुनश्चेति संक्रमाः ॥

सङ्क्रात(न्त)य[ा]ः इति शब्दवचनः । अत्र एषु द्वादशसङ्क्रमेषु मध्ये आद्यौ सङ्क्रमौ क्रमाद्दक्षिणोत्तरे अयने स्याताम् । तुला दक्षिणविषुवम् । मेष-उत्तरविषुवमित्यर्थः । तदनन्तराश्चत्वारः कन्याधनुर्मीनमिथुनानि षडशीति-मुखाः प्रोक्ताः ।

**End:**

वृषवृश्चिककुम्भेषु सिंहे चैव रवेर्गतिः ।
एतद्विष्णुपदं नाम विषुवादधिकं फलैः ॥

इति स्नानादि.

Fol. 123*b* contains a portion of Lakṣmīpūjā.

---

No. **14493.** नवग्रहाराधनम्.

NAVAGRAHĀRĀDHANAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 129*a* of the MS. described under No. 115.

Wants the beginning and the end.

Similar to the work described under No. 8639 ante; as laid down by Āśvalāyana.

**Beginning:**

°(आ)वाहयामि ।

बृहस्पतीत्यस्य मन्त्रस्य गृत्समदऋषिः बृहस्पतिर्देवता, त्रिष्टुप् छन्दः । बृहस्पतिग्रहाराधने विनियोगः । सौम्य . वर्णद्युतिस्सौम्यमुख स्सिताभः दन्ताक्षमालाञ्जलिपात्रधारिणी । सिन्ध्वाख्यदेशी वरदश्च जीवः . . . . . बृहस्पते अति यदर्यो इन्द्र मरुत्व ब्रह्मजिज्ञानं (इह पाहि सोमं) बृहस्पतिं कनकवर्णं कनकमाल्याम्बरधरं . . . . . . . . . .

* * * *

अधिदेवताप्रत्यधिदेवतासहितं बृहस्पतिग्रहमावहयामि ।

**End:**

भार्गवगोत्रं दैत्यगुरुं किरीटिनं चतुर्भुजमक्षसूत्रकमण्डलुजटाधरं पुष्यनक्ष-(त्र)जातं पत्नीपुत्रसहितम्.

---

## No. 14494. आपस्तम्बापरप्रयोगः.

## ĀPASTAMBĀPARAPRAYŌGAḤ.

Pages, 60. Lines, 7 on a page.

Begins on fol. 1a of the MS. described under No. 8231.

Complete.

Similar to the work described under No. 3526 ante.

**Beginning:**

अथान्त्येष्टिर्वक्ष्यते—

यस्यकस्यचित्पुरुषस्य मरणसंशयेऽद्भिः स्नापयित्वा, यथोक्तसर्व-प्रायश्चित्तं कृत्वा गोमयेनोपलिप्ततिलकुशास्तृतभूमौ दक्षिणाशिरसं निधाय कर्ता प्राणानायम्य यजमानस्य पितुः कौशिकसगोत्रस्य केशवयशर्मणः सुखेन प्राणोत्क्रमणार्थमुत्क्रान्तिसंज्ञकगोदानं करिष्य इति सङ्कल्प्य.

* * * *

प्राणानायम्य सङ्कल्प्य एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ यजमानस्य पितरं गोत्रं शर्माणं प्रेतं पैतृमेधेन कर्मणा संस्करिष्ये ।

**End :**

अपुत्रायास्सुवासिन्याः विधवाब्रह्मचारिण(णोः) ।
सपिण्डीकरणादूर्ध्वं न कुर्यादनुमासिकम् ॥
भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ।
मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् ॥
अर्वाक् त्रिपक्षात्प्रेतस्य पुनर्दहनकर्मणि ।
न कालनियमो ना(ह्य)स्ति न मौढ्यं गुरुशुक्रयोः
एकोद्दिष्टे सपिण्डे च कपित्थं तु विधीयते ।
नारिकेलप्रमाणं तु आब्दिके मासिके तथा ॥
तीर्थे दर्शे च सम्प्राप्ते कुक्कुटाण्डप्रमाणतः ।
महालये गयाश्राद्धे कुर्यादामलकोपमम् ॥

---

## No. 14495. आतुरसन्न्यासविधिः.
## ĀTURASANNYĀSAVIDHIḤ.

Pages, 4. Lines, 7 on a page.

Begins on foll. 53*a* and 54*a* of the MS. described under No. 8231 Complete.

Similar to the work described under No. 3542 ante.

**Beginning :**

अथातुरविधिं व्याख्यास्यामः—

प्रव्रजेद्ब्रह्मचर्येण प्रव्रजेद्वा गृहादथ ।
वनस्थः प्रव्रजेद्विद्वानातुरो वापि दुःखितः ॥
प्राजापत्यं समश्नेष्टिं सार्ववेदसदक्षिणाम् ।
आत्मन्यग्निं समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ॥
आसन्ने संकटे घोरे चोरव्याघ्रादिसङ्कुले ।
भयं प्राप्तस्य सन्न्यासः कर्तव्यो मनुरब्रवीत् ॥

* * *

कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः ।
यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः ॥

**Colophon:**

इत्यातुरविधिः ॥

* * * *

**End:**

ओम् भूः सन्यस्तं मया, ओम् भुवः सन्यस्तं मया, ओम् सुवः सन्यस्तं मयेति ब्रूयात् । ततो दिगम्बरो भूत्वा गृहस्थेन दत्तकौपीनकटिसूत्रकाषायादिकं धृत्वा तदनन्तरं गृहान्निर्गत्य गच्छेत् । ग्रामाद्बहिर्निर्गत्य यतिकर्माणि कुर्वन् सञ्चरेत् । मृते तु यतिसंस्कारविध्या(धिना) और्ध्वदेहिकं कुर्यात् ॥

---

## No. 14496. अत्यातुरविधिः.
## ATYĀTURAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 53*b* of the MS. described under No. 8231.

Complete.

Slightly different from the work described under the previous number.

**Beginning:**

अत्यातुरविधिरुच्यते—ओं प्रणवस्यान्तर्यामी ऋषिः, गायत्री छन्दः, परमात्मा देवता, ओं भूः अग्न्यात्मने हृदयाय नमः, ओं भुवः प्राजापत्यात्मने शिरसे स्वाहा, ओं सुवः सूर्यात्मने शिखायै वषट्, ओं भूर्भुवस्सुवः ब्रह्मात्मने कवचाय हुम् ।

**End:**

द्वादशसहस्रं प्रणवजपं कुर्यात्, उत्तरषडङ्गं कुर्यात, ध्यायेत्, ब्रह्मार्पण-मिति ब्रूयात ॥

---

## No. 14497. यतिसंस्कारप्रयोगः.
## YATISAMSKĀRAPRAYŌGAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 54*b* of the MS. described under No. 8231.

Complete; as laid down by Śaunaka.

Slightly different from the work described under No. 3767 ante.

**Beginning:**

अथ परमहंसानां संस्कारविधिं व्याख्यास्यामः । पुत्रोऽन्यो वा गृहस्थश्शिष्यो वा सिद्धिं प्राप्नुवन्तं यतिं निरीक्ष्य, गीतादिजपं कुर्वन्, देवसन्निधौ गोमयाम्बुना स्थलं परिमृज्य, पूर्वाभिमुखं यतिं संस्थाप्य ।

**End:**

आसनगन्धमाल्यादिभिरलंकृत्य तान् भोजयित्वा तदनन्तरं तीर्थं षोडशोपचारैस्संपूज्य नीराजनं दत्वा तीर्थं स्वशिरसि निधाय, नर्तनं कृत्वा अनुज्ञाप्य तैर्दत्ततीर्थं पीत्वा प्रदक्षिणं कृत्वानुज्ञाप्य विसर्जयेत् । इष्टैस्सह भोजयेत् । एवं प्रतिसंवत्सरं सिद्धिदिवसे पार्वणश्राद्धं कृत्वापरेद्युराराधनं कुर्यात् ॥

**Colophon:**

इति शौनकोक्तयतिसंस्कारविधिस्समाप्तः ॥

---

## No. 14498. तैत्तिरीयब्राह्मणानुक्रमणिका.
## TAITTIRĪYABRĀHMAṆĀNUKRAMAṆIKĀ.

Pages, 35. Lines, 7 on a page.

Begins on foll. 61*a* and 72*a* of the MS. described under No. 8231.

Contains, in the reverse order, the initial passages of the various Pañcāśats in the first, second (one to three Praśnas) and the third Aṣṭakas of the Kṛṣṇa Yajurvēda Brāhmaṇa.

**Beginning:**

तेन सोऽस्याभीष्टः प्रीतः । पशूनेवैतेन स्तृणोति । तामात्मनोऽधिनिर्मिमीते । सा चतुर्थमुदक्रामत् । दोहा एव युष्माकमिति । प्रजापतिः प्रजा असृजत । सैव साम्नेस्सन्ततिः । नैनं प्रतिनुदन्ते । यन्मांसमश्नीयात् । जगतीभिर्वैश्यस्य । एतद्वा अग्नेः प्रियं धाम ।

* * *

प्रजापतिर्दशहोता । ब्रह्मवादिनो वदन्ति । स एना विद्वान् यक्ष्यसि । इमे धेनू अमृतं ये दुहाते । हविषोऽस्य नवस्य नः । उभा हि वां सुहवा जोहवीमि । स नो रास्व सहस्रिणः । अग्निर्विशां मानुषीणाम् । स प्रत्नवन्नवीयसा । ब्रह्म यज्ञस्य तन्तवः । प्रसवो अग्ने अत्येष्यन्यान् । विश्वा आशाः पृतनाः संजयं जयन् । अस्मे द्यावापृथिवी भूरिवामम् । आयाहि सोमपीतये । इन्द्रो जातो विपुरो रुरोज । तस्यैवात्मा पदवित्तं विदित्वा । विश्वसृजः प्रथमास्सत्रमासत ।

**End:**

अर्यमा राजाजरस्तुविष्मान् । ये अग्निदग्धा येऽनग्निदग्धाः । ये अन्तरिक्षं पृथिवीं क्षियन्ति । बृहस्पतिः प्रथमं जायमानः । प्रमुञ्चमानौ दुरितानि विश्वा । यत्ते नक्षत्रं मृगशीर्षमस्ति । सा नो यज्ञस्य सुविते दधातु । अग्निर्नः पातु कृत्तिकाः ॥

---

No. **14499.** गायत्रीजपविषयः.

GĀYATRĪJAPAVIṢAYAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 164*a* of the MS. described under No. 3019.

Wants the beginning and the end.

Deals with the repetition of the Gāyatrī-mantra, which is supposed to enable one to realise one's desires and to absolve one's self from all sins.

**Beginning:**

मङ्गलं जयतु मे रघूत्तमो मङ्गलं जयतु जानकी शुभा ।
मङ्गलं जयतु मे महेश्वरो मङ्गलं जयतु मे महेश्वरी ॥
नियतिर्न हि दोषाणां मन्त्राणां कलिदोषतः ।
कलिदोषनिवृत्त्यर्थं विश्वासेनाचरेद्द्विजः ॥
गायत्रीमन्त्रसिद्ध्यर्थं गायत्री ह्ययुतं जपेत् ।
सर्वेषां वेदमन्त्राणां सिद्ध्यर्थं लक्षकं जपेत् ॥

**End:**

होमः कार्यश्च गायत्र्या जुहुयादयुतं मधु ।
वेदमन्त्रास्ततस्तस्युर्द्विजानां कामधेनवः ॥
तर्पणञ्चाभिषेकं च होमं विप्रांश्च भोजयेत् ।
चिन्तामणिर्वेदमन्त्रः कामधेनुस्सुरद्रुमः ॥

---

No. **14500.** उपान्त्यभार्गवव्रतम्.

UPĀNTYABHĀRGAVAVRATAM.

Page, 1. Lines, 4 on a page.

Begins on fol. 146*a* of the MS. described under No. 3115.

On the Vrata which consists in the worship of the Goddess Lakṣmī on the penultimate Friday of the bright fortnight in the Śrāvaṇa month in each year.

**Beginning** and the **End**:

(नमो)मासे पूर्णिमायां नातिक्रान्ते भृगोर्दिने ।
मत्पूजा तत्र कर्तव्या वरं दास्यामि काङ्क्षितम् ॥

इति केचित्पक्षः ।

अन्यच्च—

नभोमासि सिते पक्षे पूर्णिमोपान्तभार्गवे ।
मत्पूजा तत्र कर्तव्या वरं दास्यामि का तम् ॥

न तु पौर्णमास्यां पूर्णिमोपान्तभार्गव इत्युक्तत्वात्केवलं सिते पक्ष इति सामान्येनानुक्तत्वाच्च । तदुक्तं सङ्ग्रहे—

यदा तु पूर्णिमायां वै भृगुवारो भवेत्तदा ।
पूर्वस्मिन्वासरे कार्यं पूर्णिमोपान्तवाक्यतः ॥

यदा पौर्णमास्यामेव भृगुवासरो भवति तथापि(दा) उपान्तभार्गव एव व्रतं कार्यम् ॥

---

## No. 14501. आङ्गिरसस्मृतिः.
## ĀṄGIRASASMṚTIḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 2639.
Contains a small portion in the end of the 12th Adhyāya.
Same work as that described under No. 2611 ante.

---

## No. 14502. कर्तृक्रमः.
## KARTṚKRAMAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 91*a* of the MS. described under No. 2996.
Similar to the work described under No. 3154 ante.

**Beginning** and the **End**:

पुत्रस्सपत्नीपुत्रश्च पुत्रिकातनयस्ततः ।
दत्तः पौत्रः प्रपौत्रश्च दौहित्रो धनभागय ॥

दौहित्रश्च पतिः पत्नी दुहिता सोदरस्तथा ।
असोदरस्तु भ्राता च भ्रातृपुत्रौ च तत्क्रमात् ॥
पिता माता स्नुषा भ्रात्री भागिनेयस्ततः परम् ।
स्वसपिण्डोऽथ मातुश्च सपिण्डस्सोदकस्तथा ॥
सगोत्रश्शिष्यर्त्विजौ च तथाचार्यस्सुतापतिः ।
सखा राजा त्रिंशदेते कर्तारस्स्मृतिबूदिताः ॥
पूर्वपूर्वस्य नाशे वाऽसन्निधावुत्तरोत्तरः ।
उक्तानुक्रमतोऽप्यन्यः क्रमः क्वचन दृश्यते ॥

Fol. 91*b* contains one stanza regarding Mauḍhyaviṣaya.

---

## No. 14503. भोजचरित्रम्.
## BHŌJACARITRAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 92*a* of the MS. described under No. 2996.

Contains a small portion only.

Same work as that described under No. 12202 ante.

Fol. 94*a* contains Daśamīvēdhaviṣayavacana and 94*b* Saṅkramaviṣayavacana.

---

## No. 14504. गौतमधर्मसूत्रभाष्यम्.
## GAUTAMADHARMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 19 × 1¾ inches. Pages, 252. Lines, 11 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Wants the beginning and breaks off in the 24th Adhyāya.

Same work as that described under No. 1206 ante.

**Beginning:**

(वेदस्थै)व धर्ममूलत्वं किं तु तद्विदां च स्मृतिशीले—वेदविदां ये प्र(स्मृ)तिशीले अपि धर्ममूले ते अपि वेदादविरोधिनी तद्विदामित्यारम्भात् । शीलशब्दश्चेह द्वाभ्यामभिसम्बध्यमानो द्विवचनान्तो द्रष्टव्यः । चश(तच्छ)ब्देन सषडङ्गो वेदो लक्ष्यते । स्मृतिरूपं निबन्धनम् । मनुयमवसिष्ठभृग्वङ्गिरोबृहस्पत्युशनोभारद्वाजगौतमापस्तम्बसंवर्तव्यासशातातपशङ्खलिखितबोधायनयाज्ञवल्क्यप्राचेता(तसा)दिभिः कृतं शीलमनुपनिबन्धस्समाचारः ।

**End:**

अ(त्र)क्षत्रियायां द्विगुणं, वैश्यायां त्रिगुणं द्रष्टव्यम् । तथा ब्राह्मणस्यापि क्षत्रियवैश्येत्याद्यपि गमनं प्रति कूश्माण्डैर्होमश्च द्रष्टव्यः । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

**Colophon:**

इति मस्करीये गौतमभाष्ये त्रयोविंशोऽध्यायः ॥

आविष्कृतैनसां तु प्रायश्चित्तमुक्तमनाविष्कृतैनसां तु वक्तव्यमित्यत आह—रहस्यप्रायश्चित्तमविख्यातदोषस्य—रहस्यमप्रकाशं कर्तव्यमिति यथान्यैर्न ज्ञायते । प्रायश्चित्तग्रहणमल्पेनापि महतः पापस्य निष्कृतिर्भवतीत्येव(मर्थम्) ।

* * * *

तदा प्रतिगृह्य जपेत् । इतरत्र पूर्वमिति द्रष्टव्यम् । तत्राप्यभोज्यश्रो.

---

## No. 14505. वामदेवसंहिता.

## VĀMADEVASAMHITĀ.

Pages, 40. Lines, 7 on a page.

Begins on fol. 306 of the MS. described under No. 3500.
Contains the Adhyāyas 64—69 only of the second part.
Same work as that described under No. 5481 ante.

---

## No. 14506. प्रतिशुक्रशान्तिः.

## PRATIŚUKRAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 141a of the MS. described under No. 3501.
Complete; as laid down in Vasiṣṭhasmṛti.

On the Śānti to be performed for averting the evils, supposed to result to one, if the planet Śukra (Venus) is found to be situated in unfavourable positions in one's horoscope.

**Beginning:**

शुक्रस्य संमुखो लोके बहुदोषकरस्सदा ।
तद्दोषशमनार्थाय शान्तिं वक्ष्ये समासतः ॥

वासिष्ठे—

भृगुलग्ने भृगोर्वारे भृगुवर्गे भृगूदये ।
उपोष्य भृगुवारेऽपि यावच्छुक्रोदयं प्रति ॥
रजतेनैव शुद्धेन कारयेत्प्रतिमां शुभाम् ।
लिखेदष्टदलं पद्मं कांस्यपात्रेण तण्डुले ॥

**End:**

तत्तत्संमुखजो दोषस्तत्क्षणादेव नश्यति ॥
सूर्याय कपिलां दद्याच्छङ्खं चन्द्रमसेऽपि च ।
कुजाय वृषभं दद्यात्स्वर्णं दद्याद्बुधाय च ॥
गुरवे पीतवस्त्रं च असितायासितां च गाम् ।
एवं प्रयत्नतः कृत्वा सर्वान् कामानवाप्स्यसे ॥

---

## No. 14507. प्रायश्चित्तवचनानि.
## PRĀYAŚCITTAVACANĀNI.

Page, 1. Lines, 4 on a page.

Begins on fol. 265*a* of the MS. described under No. 2746.

The verses describing the expiatory ceremony to be performed by one for the sin resulting from unnatural intercourse with a camel, mare or an ass.

**Beginning** and the **End:**

खरमुष्ट्रं च बडवां विप्रो यदि मदान्धकः ।
यच्छेद्यदि स पापात्मा रौरवं नरकं व्रजेत् ॥

वसिष्ठः—

बडवां खरमुष्ट्रं च विप्रः कामातुरस्सकृत ।
रमेल्लज्जां विहायाशु स वै नरकमश्नुते ॥

जाबालिः—

खरमुष्ट्रं च बडवां यच्छेद्विप्रो मदातुरः ।
रौरवं नरकं याति यावदाभूतसंप्लवम् ॥
तस्य दोषविनाशार्थं प्रायश्चित्तमुदीरितम् ।
खरे चान्द्रं तयोष्ट्रे च बराकं बडवागमे ॥
एतेन शुद्धमाप्नोति पुनस्संस्कारपूर्वकम् ।
पञ्चगव्यं पिबेत्पश्चाच्छुद्धो भवति निश्चयः ॥
क्षत्रियवैश्ययोर्विप्रोक्तात् द्विगुणं प्रायश्चित्तम् ।
अथ वत्समहिषीवत्सगमने प्रायश्चित्तमाह—देवलः.

---

## No. 14508. शुद्धिचन्द्रिका.
## ŚUDDHICANDRIKĀ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 188*a* of the MS. described under No. 2745.

Incomplete. By Kālidāsa.

Same work as that described under No. 3038 ante.

Fol. 90*a* contains a few Prastāvikaślōkas.

---

## No. 14509. ज्यौतिषविषयः.
## JYAUTIṢAVIṢAYAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 191*a* of the MS. described under No. 2745.

Incomplete.

A few stanzas taken from various texts and dealing with Puṣkarayōga and horoscopy, etc.

**Beginning :**

मेषे गङ्गा वृषे रेवा गते युग्मे सरस्वती ।
यमुना[यां] कुळीरे च सिंहे गोदावरी तथा ॥
कन्यायां कृष्णवेणी तु तुला कावेरिका स्मृता ।
भीमरथ्या वृश्चिके तु चापे पुष्करवाहिनी ॥

* * * *

राशित्रयमुपागम्य एकवर्षे गुरुस्तथा ।
वक्राभिमुखमागम्य तद्राशौ चादिपुष्करम् ॥
वक्रं त्यक्त्वा पुनर्जीव ऋजुराश्यन्त्यपुष्करम् ।

**End :**

लग्नाधिपेन सहिते यदि वाहनेशे जीवेक्षिते तनुगते बलपूर्णयुक्ते ॥
पुत्रे(श्च)दाराधिपतिर्गुरोश्चेदखण्डसाम्राज्यमुपैति लक्ष्मीम् ।

---

## No. 14510. कपिलधेनुप्रशंसा.
## KAPILADHENUPRAŚAMSĀ.

Substance, palm-leaf. Size, 17⅞ × 1⅜ inches. Pages, 18. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Incomplete.

On the importance and religious efficacy of making gifts to Brahmins of cows of brown complexion of ten different varieties.

**Beginning :**

श्रीवैशम्पायनः—

दानपुण्यफलं श्रुत्वा तपःपुण्यफलानि च ।
धर्मपुत्रः प्रहृष्टात्मा केशवं पुनरब्रवीत् ॥

या चैषा कपिला देव पूर्वमुत्पादिता विभो ।
होमधेनुस्तदा पुण्या चतुर्वक्त्रेण माधव ॥
सा कथं ब्राह्मणेभ्यो वै देया कस्मिन् दिनेऽपि वा ।
कीदृशाय च विप्राय दातव्या पुण्यलक्षणा ॥

* * * *

दशैव कपिलाः प्रोक्ताः स्वयमेव स्वयम्भुवा ।
या देवेभ्यः श्रोत्रियेभ्यो दत्वा स्वर्गाय ताः शृणु ॥
प्रथमा स्वर्णकपिला द्वितीया गौरपिङ्गला ।
तृतीया रक्तपिङ्गाक्षी चतुर्थी गलपिङ्गला ॥

**End:**

कपिलेऽथ महादेवि सर्वदेवनमस्कृते ।
नमस्ते निर्मले स्वच्छे सर्वतीर्थमये शुभे ॥
दातारं स्वजनोपेतं ब्रह्मलोकं नय स्वयम् ।

* * * *

अदातारस्समर्था ये द्रव्याणां लोभकारणात् ॥
दीनाननाथान् वध्यन्ते? बाधन्ते च पुनः पुनः ।
शस्त्राग्निगरदाश्चैव ते वै निरयगामिनः ॥
क्षान्तदान्तविहीना ये

---

## No. 14511. विभागनिर्णयः.

## VIBHĀGANIRṆAYAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 1217.

Incomplete.

A small portion dealing with the division of ancestral property taken from the Vyavahāradhyāya of Yājñyavalkyasmṛti, which work is described under No. 2675 ante.

The work contains the commentaries Vijñāneśvariya and Sarasvatī-vilāsa.

**Beginning:**

विज्ञानेश्वरः—

विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ।
ज्येष्ठो वा श्रेष्ठभागेन सर्वे वा स्युस्समांशिनः ॥
यदि कुर्यात्समा(नांशान्पत्न्यः कार्याः समांशिकाः) ।
न दत्तं स्त्रीधनं यासां भर्त्रा वा श्वशुरेण वा ॥

अत्राह सरस्वतीविलासकारः—

ब्राह्मणानां तत्पत्नीनां पुत्रास्सर्वे . . . . . . . . . . विभागो नास्ति, किं तु पतीच्छया यत्किंचिद्देयमिति वैश्यशूद्रयोः पत्नीभागः ।

**End:**

पितृद्रव्याविरोधेन यद्धनं स्वयमार्जितम् ।
मैत्रमौद्वाहिकं चैव दायादानां न तद्भवेत् ॥

---

## No. 14512. रामसप्तर्षिस्तोत्रम्.
## RĀMASAPTARṢISTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 69*a* of the MS. described under No. 1217.
Contains a small portion only.
Same work as that described under No. 10299 ante.

---

## No. 14513. पूर्वप्रयोगपद्धतिः.
## PŪRVAPRAYŌGAPADDHATIḤ.

Pages, 159. Lines, 5 on a page.

Begins on fol. 7:*a* of the MS. described under No. 1217.
Complete.
Same work as that described under R. Nos. 1709—171: of the Triennial Catalogue of the Sanskrit MSS., Vol. II, Part 1-C.

---

## No. 14514. आग्रयणप्रयोगः.
## ĀGRAYAṆAPRAYŌGAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 149*b* of the MS. described under No. 1217.
Incomplete.

On the procedure for conducting a sacrificial offering of food made of newly harvested corn on the full- or new-moon day in the autumn of every year, or whenever the crop is over. Here Āpastamba says that a fire-worshipper must offer the cooked food of Śyāmāka in the rainy season, that of Vrihi in autumn and of Yava in spring.

**Beginning:**

अथाग्रयणमुच्यते—

अग्रं प्रत्यग्रं द्रव्यं प्राणान्प्रापयतीत्याग्रयणम् । इदं कर्म[णि]शरत्काले पर्वणि कुर्यात् । अत्र कारिका—शरद्याग्रयणं कुर्यात्पर्वणि व्रीहिभिर्यवैरिति ।

पर्वणीति पौर्णमास्यां वेत्यन्ये । अपरे यदा निमित्तसंभवस्तदनन्तरमेवाचरेदिति । अत्र बोप्पनभट्टीये—निमित्तानन्तरं नैमित्तिकानि ।

* * * *

तथाचापस्तम्बः—

वर्षासु श्यामाकैर्यजेत शरदि व्रीहिभिर्वसन्ते यवैरिति । अत्र प्रयोगः—शरत्काले पर्वणि प्रातरौपासनं कृत्वा प्राणानायम्य नवान्नप्राशनार्थमाग्रयणं करिष्ये । तत्रेन्द्राग्नी विश्वे देवाः द्यावापृथिवी प्रधानदेवताः ।

**End:**

यावदुक्तविधाका(ना)वा भवेदाग्रयणक्रिया ।
शेषात्प्राश्य ततो ग्रासं शेषं संहृत्य चोदनम् ॥

परमेष्ठ्यसीति यजुषाग्नि(ग्न्य)गारवंशे विलम्ब.

**Colophon:**

इत्याग्रयणं समाप्तम् ॥

---

## No. 14515. अग्निसंसर्गप्रायश्चित्तप्रयोगः.

## AGNISAṀSARGAPRĀYAŚCITTAPRAYŌGAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 150*b* of the MS. described under No. 1217.

Contains Laukikavaidikāgnisaṁsargaprāyaścitta and Vaidikāgniprāyaścitta only.

On the performance of the expiatory ceremony to be observed when the sacred fire happens to be mixed up with the ordinary fire or when the sacred fire maintained by a person happens to be mixed up with that maintained by another person.

**Beginning:**

एवंविशिष्टे शुभेऽभ्युदयमुहूर्ते ममौपासनाग्नेर्लौकिकाग्निप्रायश्चित्तं विविचेष्टिस्थालीपाकं करिष्य इति सङ्कल्प्य . . . . . . प्रतिष्ठितमभिघार्य अग्नीन्धनाद्यग्निमुखान्ते अयाश्चाग्नेऽस्यनभिशस्तीश्च—भेषजं स्वाहा, अग्नये अयस इदम् ।

* * * *

परिधिप्रहरणं नास्ति । ब्रह्मविसर्जनान्तं कुर्यात् । ततः पुनस्सन्धानं कुर्यात् ॥

**Colophon:**

इति लौकिकाग्निवैदिकाग्निसंसर्गः ॥

**End:**

अन्यौपासनाग्निसंसर्गप्रायश्चित्तपुनस्सन्धानोक्तषोडशाज्याहुतीः पथिकृतेष्टिं सङ्कल्प्य, चतुष्पात्रं प्रयुज्य आज्यसंस्कारान्ते अयाश्चेति व्याहृतिमिश्र पुनस्सन्धानवत् त्रिंशदाज्याहुतीर्हुत्वा, ततः पथिकृतेष्टिस्थालीपाकेन शेषं पूर्ववत्कुर्यात् । ततः ब्राह्मणसन्तर्पणं कुर्यात् ॥

**Colophon:**

इति वैदिकाग्निप्रायश्चित्तम् ॥

---

## No. 14516. अश्वत्थपूजाविधिः.
## AŚVATTHAPŪJĀVIDHIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 110*a* of the MS. described under No. 2763.

Complete; as found in the Brahmāṇḍapurāṇa.

On the procedure laid down by Bōdhayana for worshipping the Aśvattha tree, the worship of which is supposed to please God Nārāyaṇa and to bestow all kinds of prosperity and remove all kinds of sin and barrenness.

**Beginning:**

एवङ्गुणविशिष्टायां शुभतिथौ सहकुटुम्बस्य क्षेमस्थैर्यायुरारोग्यैश्वर्यादिपुत्रपौत्राभिवृद्ध्यर्थं वन्ध्याचतुष्टयनिवृत्त्यर्थं धर्मार्थकाममोक्षार्थसिद्ध्यर्थं ममेह जन्मनि जन्मान्तरेषु नानाविधसम्भावितसमस्तपापक्षयार्थं

* * * *

श्रीविष्णुसायुज्यप्राप्त्यर्थमश्वत्थनारायणमुद्दिश्याश्वत्थनारायणप्रीत्यर्थं ब्रह्माण्डपुराणोक्तकल्पोक्तप्रकारेण सम्भवद्भिर्द्रव्यैः सम्भवद्भिरुपचारैस्सम्भवता नियमेन यथा(वत्) अश्वत्थपूजां करिष्ये । तदङ्गकलशार्चनं पीठार्चनं कुर्यात् । अश्वत्थमूले गोमयेनानुलिप्तरङ्गवल्ल्यादिविरचिताष्टदलपद्मकर्णिकामध्ये कृततण्डुलोपरि संस्थाप्य ।

**End:**

पत्न्या सह सङ्कल्पपूर्वकस्थण्डिलदानानि कृत्वा शतब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

---

## No. 14517. व्रतदानादिविषयवचनानि.
## VRATADĀNĀDIVIṢAYAVACANĀNI.

Pages, 4. Lines, 7 on a page.

Begins on fol. 117*a* of the MS. described under No. 2763.

A collection of stanzas dealing with the following subjects :—

१. शिवरात्रिनिर्णयः.
२. षोडशमहादानानि.
३. चित्रगुप्तबलिः.
४. यतिविषयः.
५. जीवत्पितृकप्राचीनावीतलक्षणम्.
६. गण्डपुरुषलक्षणम्.
७. शान्तिविधिः.

**Beginning:**

दिनद्वयेऽप्यर्धरात्रौ वर्तते च चतुर्दशी ।
परैव सा प्रकर्तव्या न च पूर्वा कदाचन ॥
दिनद्वये यदा न स्यान्मध्यरात्रौ चतुर्दशी ।
तदा पूर्वा परित्यज्य कर्तव्या सा नरैः परा ॥

* * * *

कनकाश्वतिला नागदासीगृहमहीरथाः ।
कन्या च कपिला धेनुः महादानानि वैदश (षोडश) ॥
चित्राय चित्रगुप्ताय भूतेभ्यश्च यमाय च ।
धर्माय च बलिं भूमौ दत्वा भुञ्जीत वै द्विजः ॥

**End:**

अकाले भाग्यदश्चैव पाताले विजयप्रदः ।
मर्त्यलोके मृत्युदस्स्याद्गण्डदोषफलं विदुः ॥
तिलपात्रं चोत्तराख्ये पुष्ये गोदानमुच्यते ।
आश्लेषायां घोटकं च मूलर्क्षे महिषं तथा ॥

* * * *

ज्येष्ठा पञ्चदशे मासे पुत्रो लोकं तु वर्ज(ये)त् ।
दानं होमं जपं कृत्वा तत्कालेऽपि शुभावहम् ॥

---

No. **14518.** दत्तहोमप्रकरणम्.

DATTAHÔMAPRAKARAṆAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 118*b* of the MS. described under No. 2763.

Complete.

Same work as that described under No. 3626 ante, but with additional stanzas in the beginning and slight difference in the end.

The procedure is laid down by Bōdhāyana.

**Beginning:**

पितृव्यपुत्रे दौहित्रे भ्रातृपुत्रस्सगोत्रजः ।
यदि लोपादि होमस्य दत्तस्वं न विमुञ्चति ॥

दाता निश्चलमना राज्ञे निवेद्य स्वभ्रातृबन्धून् गृहे सम्पूज्य तान् ज्ञापयित्वा इमं विष्णुनामधेयं कुमारममुष्मै गोविन्दाय शर्मणे पुत्रमुपपादयामीति तान् सम्यग्विज्ञाप्य ।

**End:**

पञ्चगव्यप्राशनं कारयित्वा स्वपितनुद्दिश्य शतं शतार्धं पञ्चविंशतिं वा ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

**Colophon:**

इति दत्तहोमप्रकरणं समाप्तम् ॥

---

No. 14519. चातुर्मास्यनिर्णयः.
CĀTURMĀSYANIRṆAYAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 120*b* of the MS. described under No. 2763.

Fol. 120*a* contains कन्यादानविषय and 120*b* चन्द्रसूर्यग्रहणमुद्रिका.

Incomplete.

On the determination of the Vrata of Cāturmāsya (described under Nos. 6703 to 6706 ante) for observence by Sannyāsins.

**Beginning:**

चातुर्मास्यनिर्णयः—

आषाढीं(च) श्रावणीं पौर्णमासीमारभ्यान्तं कार्तिकी मार्गशीर्षी ।
चातुर्मास्या नाम सन्न्यासिनो वै ग्रामाद् ग्रामं न व्रजेयुश्च तत्र ॥
आषाढ्यां पौर्णमास्यां च क्षौरं कुर्याद्यथाविधि ।
त्रिमुहूर्ताधिकायां तु भिक्षुर्मोक्षपरायणः ॥
तिथिक्षये विद्धमपि पर्व ग्राह्यं मनीषिभिः ।
मुहूर्तत्रितयं नो चेत् क्षौरकर्म परेऽहनि ॥

**End:**

ऋतुसन्धौ पूर्णिमायां सङ्क्रवस्त्वशि वापयेत् ।
त्रिमुहूर्ताधिकं ग्राह्यं पर्व क्षौरप्रणामयोः ॥
ऋतुसन्ध्यावतीते तु क्षौरं नास्ति कदाचन ।
मलमासे नैव कार्यं यतिभिर्मोक्षकाङ्क्षिभिः ॥

Foll. 121*b* and 122*a* contain Vaiśvadēvavidhi and Ṣaṇṇavati-śrāddhaviṣayavacanas.

---

No. 14520. ग्रहणनिर्णयः.
GRAHAṆANIRṆAYAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 122*a* of the MS. described under No. 2763.

Complete.

Similar to the work described under No. 3116 ante.

**Beginning:**

कालादर्शे ग्रहणनिर्णयः—

अहोरात्रं न भुञ्जीत ग्रस्तावेवास्तगौ तु तौ ।

तौ रवीन्दू यदा राहुग्रस्तावेवास्तगौ भवतः तदाहोरात्रं न भुञ्जीत । अयमर्थः—ग्रस्तास्तगे सूर्ये ग्रहात्पूर्वस्मिन्नहनि परस्यां रात्रौ न भुञ्जीत । ग्रस्ता(स्त)गे शशिनि ग्रहणात्पूर्वस्यां रात्रौ परस्मिन्नहनि न भुञ्जीतेति । तदुक्तं विष्णुधर्मोत्तरे—

अहोरात्रं न भोक्तव्यं चन्द्रसूर्यग्रहो यदा ।
मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम् ॥ इति

**End:**

ज्यौतिषदर्पणे—

चन्द्रसूर्योपरागे च यावद्दर्शनगोचरः ।
पुण्यकालस्स विज्ञेयः स्नानदानादिकर्मसु ॥

मेघादिना छन्ने स्नानादि न कर्त(व्य)मिति ॥

**Colophon:**

इति ग्रहणनिर्णयस्समाप्तः ॥

## No. 14521. मुखावलोकनविधिः. MUKHĀVALŌKANAVIDHIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 124*a* of the MS. described under No. 2763.

Complete.

Deals with the proper occasion and manner for seeing and conveying condolence to a woman by her relations for the recent loss of her husband.

**Beginning:**

मुखावलोकने—

सूत्रं लुठति या नारी पितृमातृसहोदराः ।
तत्काले दर्शनं कुर्युरभावे त्वाब्दिके तथा ॥
मुखावलोकनं शस्तं बन्धूनां तु दशाहके ।
तिथिदोषादिकं नास्ति इति शातातपोऽब्रवीत् ॥

दशाहातिक्रमे गतिमाह—

अयुग्ममासे द्रष्टव्यं शास्त्रोक्तं विहिते दिने ।
युग्ममासे तु हानिः स्यात्पश्चाद्गप्रबलेऽपि च ॥

**End:**

भ्रात्रीयो भागिनेयश्च पितृव्यो दुहितुः पतिः ।
एतेषां दर्शने दोषो नेतरेषां कदाचन ॥
मुखं दृष्ट्वा तु विधिवद्वस्त्रं दत्वा तथैव च ।
यजमानमपृष्ट्वा च व्रजेद्ग्रामान्तरं पुनः ॥

---

## No. 14522. मलमासमृताहनिर्णयः. MALAMĀSAMṚTAHANIRṆAYAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 124*b* of the MS. described under No. 2763.

Incomplete.

On fixing the Śrāddha day in an intercalary month. It is stated that if the first annual ceremony falls during the intercalary month, one should perform the first annual ceremony in that month as well as in the regular month, and if one does not remember or know the exact date or month of the ceremony, he should perform it on the new moon day in any of the Māgha, or Margaśira months.

**Beginning:**

मलिम्लुचे मासि मृतस्य पुंसः = मास एव द्वादशे त्रयोदशे चातीत इत्यर्थः ।

आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे ।
त्रयोदशे तु सम्प्राप्ते कुर्वीत पुनराब्दिकम् ॥

पुनराब्दिकं द्वितीयाब्दिकम् ।

वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि ।
मलमासे न तत्कार्यं व्याघ्रस्य वचनं तथा ॥

**End:**

मृताहं यो न जानाति मासं वापि कथंचन ।
तेन कार्यममायां तु श्राद्धं मार्गेऽथ माघके ॥
दिनमासौ न विज्ञातौ मरणस्य यदा पुनः ।
प्रस्थानमासदिवसौ ग्राह्यौ पूर्वोक्तया दिशा ॥
दिनमेव तु जानाति मासं नैव तु यो नरः ।
मार्गशीर्षेऽथ वा भाद्रे माघे वा तद्दिनं भवेत् ॥

---

## No. 14523. श्राद्धीयस्मृतिवचनानि.
## ŚRĀDDHĪYASMṚTIVACANĀNI.

Pages, 17. Lines, 7 on a page.

Begins on fol. 126*a* of the MS. described under No. 2763.
Wants the beginning and the end.
Similar to the work described under No. 3086 ante.

**Beginning:**

साग्निका बहवः पुत्रा यदि ज्येष्ठोऽप्यनग्निकः ।
ज्येष्ठेनैव तु कर्तव्यं कनिष्ठाग्नौ जुहोति सः ॥
सुवासिन्यां मृतायान्तु ब्राह्मणैस्सहभोजने ।
सुवासिनीं ततः पश्चादमन्त्रकमथार्चयेत् ॥ इति कपर्दिकारिका
द्वादशाहे सपिण्डाख्यं मुख्यं कलियुगे स्मृतम् ।
तदप्येकादशेऽह्नि स्यात्परतो विघ्नसंभवे ॥ इति ॥
एकादशेऽह्नि कुर्वाणः पूर्वाह्ने सर्वमाचरेत् ।
अपराह्णे तु सापिण्ड्यं कुर्यादित्याह शाण्डिलः ॥

**End:**

आवाहनस्वधाकारहित्वा(राहुत्य)ग्नौकरणादिकम् ।
ब्रह्मचर्यादिनियमः विश्वे देवास्तथैव च ॥
नित्यश्राद्धे त्यजेदेतान् भोज्यमन्नं प्रकल्पयेत् ।
दत्वा च दक्षिणां शक्त्या नमस्कारैर्विसर्जयेत् ॥

Foll. 130 and 141*a* contain Āsaucaviṣaya and Gāyatrījapaviṣaya.

---

## No. 14524. सङ्करकुललक्षणम्.
## SAṄKARAKULALAKṢAṆAM.

**Pages,** 2. Lines, 7 on a page.

Begins on fol. 142*a* of the MS. described under No. 2763.

Complete.

On the origin and the characteristics of a low hybrid class of people known as Saṅkara race as explained in the Brahmāṇḍapurāṇa.

**Beginning:**

हिरण्यगर्भदेवस्य मुखबाहूरुपादजाः ।
ब्राह्मणः क्षत्रियो वैश्यश्शूद्रो वर्णा जनोत्तमाः ॥
इतरेषान्तु वर्णानां सङ्कराश्च चतुर्दश ।
शूद्रस्त्रीवैश्यजातस्तु पुरुषो व्यावहारिकः ॥
व्यवहारवधूशूद्रजातस्यै(श्यै)वतु शिल्पिकः ।
वैश्यस्त्रीक्षत्रजातस्तु गोपालक इति स्मृतः ॥

**End:**

ब्राह्मणस्त्रीशूद्रजातश्चण्डालस्तु तथैव च ।
सर्वसङ्करवर्णानां जननाज्जन्मलक्षणम् ॥

**Colophon:**

इति ब्रह्माण्डपुराणे सङ्करकुलपरीक्षा समाप्ता ॥

Fol. 142*b* contains Grāmacakra.

---

## No. 14525. पराशरस्मृतिः, सव्याख्या.
## PARĀŚARASMṚTIḤ WITH COMMENTARY.

**Pages,** 9. Lines, 7 on a page.

Begins on fol. 146*a* of the MS. described under No. 2763.

Wants the beginning and the end.

A small portion of the work described under No. 2646 ante.

**Beginning :**

न च गान्धर्वादिविवाहेषु सप्तपदादि(श्वभिक्रम)क्रमाणा(म)भावात् पतित्वभार्यात्वाभाव इति शङ्कनीयम्, स्वीकारात्प्राक् तदभावेऽपि पश्चात्तत्सद्भावात् ।

तदाह देवलः—

गान्धर्वादिविवाहेषु पुनर्वैवाहिको विधिः ।
कर्तव्यश्च त्रिभिर्वर्णैस्समर्थेनाग्निसाक्षिकम् ॥ इति ॥

गृह्यपरिशिष्टेऽपि—

गान्धर्वासुरपैशाचा विवाहो राक्षसश्च यः ।
पूर्वं परिश्रयस्तेषां पश्चाद्धोमो विधीयते ॥

होमाकरणे तु न भार्यात्वम् । अत एव वसिष्ठबोधायनौ—

का(ब)लादपि हृता कन्या मन्त्रैर्यदि न संस्कृता ।
अन्यस्मै विधिवद्देया यथा कन्या तथैव च (सा) ॥ इति ॥

**End :**

या नारी भर्तृसुतयोरग्रे च प्रमृतिं गता ।
वृषोत्सर्गो न कर्तव्य एका ग्रौ(गौ)र्दीयते तदा ॥
एकादशाहे सम्प्राप्ते यस्य नोत्सृज(ज्य)ते वृषः ।
